உ

ஸ்ரீ குருப்யோ நம :

தக்ஷிணதேச ஆந்த்ர ஸம்ப்ரதாயானுஸாரி ஆபஸ்தம்ப ஸ்மார்த்தபூர்வ ப்ரயோகம்

(மூன்றாம் பாகம்) பூர்வ ப்ரயோகம்



தொகுத்தவர் ப்ரம்மஸ்ரீ A. சுந்தரேச சர்மா

திருவையாறு

S/o ப்ரம்மஸ்ரீ மஹாக்னிசித் வாஜ பேயயாஜி

முசிறி P.S.A.ஸோமயாஜீ அவர்கள்

பொருளடக்கம்

1.	மஹாகணபதி பூஜை -	1
2.	புண்யாஹவாசனம் -	4
3.	ஹிரண்யரூப நாந்தீ ச்ராத்தம் -	12
4.	கர்மண : புண்யாஹம் -	15
5.	அங்குராரோபணம் -	17
6.	ரக்ஷாபந்தனம் -	23
7.	பாஹித்ரயோதசஹோமம் -	25
8.	ஜாதகர்ம-	29
9.	நாமகரணம் -	37
10.	அன்னப்ராசனம் -	40
11.	சௌளம் -	41
12.	உபநயனம் -	57
13.	பலாசகர்ம -	72
14.	வ்ரதங்கள் உபக்ரமணம் -	77
15.	வ்ரதங்கள் உத்சர்ஜணம் -	84
16.	ஸமாவர்த்தனம்-	85
17.	ஸ்னாதகாக்னிகார்யம் -	90
18.	கூச்மாண்டஹோமம் -	93
19.	விவாஹம் -	104
20.	ஆக்னேயஸ்தாலீபாகம் -	128
21.	ஔபாஸனாரம்பம் -	135
22.	சேஷஹோமம் -	139
23.	நாகவல்லி -	143
24.	ப்ரதமார்த்தவசாந்தி -	150
25.	கர்ப்பாதானம் -	151
26.	ஸபத்னீபாதனகர்ம -	154
27.	அன்வாரம்பணீயாஸ்தாலீபாகம்-	154
28.	புத்ரகாமஸ்தாலீபாகம் -	156
29.	கர்ப்பஸ்ராவஹர யக்ஞோபவீததானம்-	157
30.	பும்ஸுவனம் -	158
31.	ஸீமந்தோன்னயனம் -	160
32.	நவக்ரஹமகம் -	162
33.	ஆயுஷ்யஹோமம் -	189
34.	இவைகளின் விளக்கங்கள்(தமிழில்) -	199

दक्षिणदेश आन्ध्रसम्प्रदायानुसारि आपस्तम्बपूर्वप्रयोगः

महागणपतिपूजा

आचम्य - पवित्रं धृत्वा-

इष्टदेवताभ्यो नमः । कुलदेवताभ्यो नमः ।
सर्वेभ्यो ब्राह्मणेभ्यो नमः ।
सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
लम्बोदरश्च विकटो विघ्नराजो विनायकः ॥
धूमकेतुर्गणाध्यक्षः फालचन्द्रो गजाननः ।
वक्रतुण्डश्शूर्पकर्णो हेरम्बस्कन्दपूर्वजः ॥
कलासंख्यानि नामानि यः पठेच्छृणुयादपि ।
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।
संग्रामे सर्वकार्येषु विघ्नस्तस्य न जायते ॥
अभीप्सितार्थसिध्यर्थम् पूजितो यस्सुरैरपि ।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥
शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

ओंभूः - भूर्भुवस्सुवरों ममोपात्त समस्तदुरित क्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थम् तदेवलग्नं सुदिनं तदेव ताराबलं चन्द्रबलंतदेव विद्याबलं दैवबलंतदेव लक्ष्मीपतेतेंघ्रियुगं स्मरामि ॥करिष्यमाणस्यकर्मणः अविघ्नेनपरिसमाप्त्यर्थम् आदौ महागणपतिपूजां करिष्ये ।

गणानान्त्वा गणपॅतिꣳ हवामहे कविङ्कॅवीनामुॅपमश्रॅवस्तमम्
ज्येष्ठराजम्ब्रह्मॅणांब्रह्मणस्पत आनॅश्शृण्वन्नूतिभिॅस्सीद सादॅनम् ॥
ओं महागणपतयेनमः ॥भूर्भुवस्सुवरों अस्मिन् हरिद्राबिम्बे सुमुखं महागणपतिं ध्यायामि । महागणपतिं आवाहयामि ।

महागणपतयेनमः आसनंसमर्पयामि । महागणपतयेनमः पादयोःपाद्यंसमर्पयामि ।महागणपतयेनमः ।अर्घ्यंमूसमर्पयामि । महागणपतये नमः आचमनीयं समर्पयामि ।
महागणपतयेनमः मधुपर्कम् समर्पयामि ।
महागणपतयेनमः स्नपयामि ।
स्नानानन्तरं आचमनीयं समर्पयामि ।
महागणपतयेनमः वस्त्रोत्तरीयाभरणार्थे पुष्पाणि समर्पयामि दिव्यपरिमळगन्धान्धारयामि गन्धानामुपरि हरिद्राकुङ्कमं समर्पयामि । गन्धानामुपरि हरिद्राकुङ्कमं समर्पयामि महागणपतये नमः अक्षतान् समर्पयामि महागणपतये नमः पुष्पमालिकां समर्पयामि पुष्पैः पूजयामि

1	सुमुखायनमः	2	एकदन्तायनमः
3	कपिलायनमः	4	गजकर्णकायनमः
5	लम्बोदरायनमः	6	विकटायनमः
7	विघ्नराजायनमः	8	विनायकायनमः
9	धूमकेतवनमः	10	गणाध्यक्षायनमः
11	फालचन्द्रायनमः	12	गजाननायनमः
13	वक्रतुण्डायनमः	14	शूर्पकर्णायनमः
15	हेरम्बायनमः	16	स्कन्दपूर्वजायनमः

सिद्धिविनायकाय नमः महागणपतयेनमः ।नानाविधपरिमळपत्रपुष्पाणि समर्पयामि । महागणपतयेनमःधूपमाघ्रापयामि । महागणपतयेनमः दीपन्दर्शयामि । धूपदीपानन्तरं आचमनीयंसमर्पयामि ॥

ओंभूर्भुवस्सुवॅः तत्सॅवितुर्वरेण्यं भर्गोंदेवस्यॅधीमहि ।

धियोयोनॅःप्रचोदयात् ।देवॅसवितःप्रसुॅव । सत्यन्त्वर्तेन परिंषिञ्चामि ।

अमृतमस्तु । अमृतोप स्तरॅणमसि । ओंप्राणायस्वाहा

अपानायस्वाहा ।व्यानायस्वाहा । उदानायस्वाहा । समानायस्वाहा ।
ब्रह्मणेस्वाहा ॥ महागणपतयेनमः नारिकेळखण्डद्वयंनानाविधानि
स्वादुफलानि च निवेदयामि निवेदनानन्तरं आचमनीयं समर्पयामि ।

भूर्भुवस्सुवः पूगीफलसमायुक्तंनागवल्लीदलैर्युतं ।
कर्पूरचूर्णसंयुक्तं ताम्बूलंप्रतिगृह्यताम् ॥

महागणपतयेनमःकर्पूरताम्बूलंनिवेदयामि ।
समस्तोपचारपूजास्समर्पयामि ॥

राजाधिराजायॅ प्रसह्य साहिने । नमॉ वयं वैश्रवणायॅ कुमहे ।स मे
कामान्काम कामॉय मह्यम् ।कामेश्वरो वैश्रव णो दॅदातु ।कुबेरायॅ
वैश्रवणायॅ ।महाराजाय नमॅः ॥ महागणपतये नमः
कर्पूरनीराजनन्दर्शयामि । नीराजननन्तरं आचमनीयं
समर्पयामि रक्षान्धारयामि ॥ओं हर ॥तेजसामासमनज्मि ॥
वक्रतुण्ड महाकाय सूर्यकोटि समप्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥
विघ्नेश्वर महाभाग सर्वलोक नमस्कृत ।
मयारब्धमिदङ्कर्म निर्विघ्नं कुरु सर्वदा ॥
सदाबालरूपापि विघ्नाद्रिहन्त्री
महादन्तिवक्त्रापि पञ्चास्यमान्या ।
विधीन्द्रादिमृग्या गणेशाभिधा मे
विधत्तां श्रियं कापि कल्याणमूर्त्तिः ॥
गणञ्जयो गणपतिःहेरम्बो धरणीधरः ।
महागणपतिर्लक्षप्रदः क्षिप्रप्रसादनः ॥
अमोघासिद्धिरमृतो मन्त्रश्चिन्तामणिर्निधिः ।

सुमङ्गलो बीजमाशापूरको वरदश्शिवः ॥
काश्यपो नन्दनो वाचासिद्धो ढुण्ढिविनायकः ।
मोदकैरेभिरत्रैकविंशत्या नामभिःपुमान् ॥
यःस्तौति मद्गतमना मदाराधनतत्परः ।
स्तुतो नाम्नांसहस्रेण तेनाहं नात्र संशयः ॥
महागणपतये नमः अनेककोटिप्रार्थनाःनिवेदयामि ॥ अनयापूजया महागणपतिस्सुप्रीतस्सुप्रसन्नो वरदो भवतु ओंतत्सत् ॥

पुण्याहवाचनप्रयोगः

कलशं प्रतिष्ठाप्य कलशे वरुणपूजां कुर्यात्
आपोवा इदꣳसर्वम् विश्वॉभूतान्यापॅःप्राणावा आपॅः पशव आपोन्न मापोमॄतमापॅस्सम्राडापोंविराडापॅ स्वराडापश्छन्दाꣳस्यापो ज्योतीꣳष्यापो यजूꣳष्यापॅस्सत्यमापस्सर्वंदेवता आपो भूर्भुवस्सुवराप ओम् इमम्मॅ वरुणश्श्रुधी हवॅमद्या चॅ मृडय ।त्वामॅव स्युराचॅके ॥ तत्वॉयामि ब्रह्मॅणा वन्दॅमानस्तदाशास्ते यजॅमानो हविर्भिः ।अहॅडमानो वरुणेह बोध्युरुꣳश ꣳस मान आयुः प्रमॉषीः ॥
भूर्भुवस्सुवरोम् अस्मिन्कुम्भे सकलतीर्थाधिपतिं वरुणं ध्यायामि ।वरुणं आवाहयामि । वरुणस्य इदमासनम् । वरुणायनमः -इति षोडशोपचारपूजां कुर्यात् ।अनयापूजया वरुणःप्रीयताम् ॥
सर्वेषुकालेषुकालेषु समस्तदेशेषुअशेषतीर्थेषु तथेश्वरेश्वरः ।
सर्वस्वरूपीभगवाननादिमान्ममास्तु माङ्गल्यविवृद्धये हरिः ॥
यत्र योगीश्वरः कृष्णो यत्रपार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भुतिर्ध्रुवानीतिर्मतिर्मम ॥

अनन्याश्चिन्तयन्तो मां येजनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्॥
परित्राणायसाधूनांविनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥
स्मृतेसकलकल्याण भाजनं यत्र जायते।
पुरुषस्तमजं नित्यं व्रजामि शरणं हरिम्॥
सर्वमङ्गळ माङ्गल्ये शिवे सर्वार्थसाधके।
शरण्ये त्र्यम्बिके देवि नारायणि नमोस्तुते॥

उपकलशद्वयं पूजयेत्

लक्ष्मीनारायनाभ्यांनमः उमामहेश्वराभ्यांनमः
वाणीहिरण्यगर्भाभ्यांनमः शचीपुरन्दराभ्यांनमः
अरुन्धतीवसिष्ठाभ्यांनमः सीतारामाभ्यांनमः -

अत्रपादपूजाङ्कुर्यात्

मातृभ्योनमः पितृभ्योनमः आचार्येभ्योनमः
सर्वेभ्योब्राह्मणेभ्योनमः।पृथिव्याः मेरुपृष्ठऋषिः। सुतलञ्छन्दः।
कूर्मो देवता। आसने विनियोगः॥
पृथ्वि त्वयाधृतालोकाः देवि त्वं विष्णुनाधृता।
त्वञ्च धारयमां देवि पवित्रं कुरुचासनम्॥
प्रणवस्य परब्रह्म ऋषिः। त्रिष्टुप्छन्दः। परमात्मादेवता। देवी गायत्रीच्छन्दः प्राणायामेविनियोगःओंभूः-सुवरों ममोपात्त प्रीत्यर्थम् ----कर्मकरिष्यमाणः तदङ्गत्वेन तदादौशुध्यर्थम् वृध्यर्थम् शान्त्यर्थम् अभ्युदयार्थञ्च एभिःमहाजनैस्सह स्वस्ति पुण्याहवाचनङ्करिष्ये॥
ओंपुण्याहन्दीर्घामायुरस्तु। शिवाआपस्सन्तु।सौमनस्यमस्तु।
अक्षतञ्चारिष्टञ्चास्तु।
ओंअर्चतप्रार्चँत प्रियँमेधासो अर्चँत।अर्चँन्तुपुत्रका उतपुनर्न
धृष्णवँर्चत।अर्चतप्रार्चँत॥ गन्धद्वारान्दुँराधर्षान्नित्यपुँष्टाङ्करी

षिणीम्।ईश्वरीꣳसर्वभूतानां तामिहोपह्वये श्रियम्॥ गन्धाः पान्तु।
आयनेतेपरायणे दूर्वारोहन्तु पुष्पिणीः।ह्रदाश्च पुण्डरीकाणि समुद्र स्य
गृहा इमे॥अक्षताःपान्तु। आयुष्यमस्तु। पुष्पाणिपान्तु। सौमङ्गल्य
श्चास्तु।ताम्बूलानिपान्तु। ऐश्वर्यमस्तु। दक्षिणाःपान्तु। बहुदेय
मस्तु। प्रजापतिः प्रीयताम्। प्रीयताम्भगवान्प्रजापतिः। यंकृत्वा
सर्ववेद् यज्ञक्रियाकरणकमारम्भा श्शुभा श्शोभनाः क्रियाः
प्रवर्तन्ते। तहमोङ्कारमादिं कृत्वा भवद्भिरनुज्ञातः पुण्यं पुण्याहं
वाचयिष्ये।ओंवाच्यताम्।

भद्रङ्कर्णेभिश्शृणुयामदेवाः।भद्रम्पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टु वाꣳसस्तनूभिः। व्यशेम देवहितं यदायुः॥
द्रविणोदा द्रविणसस्तुरस्य द्रविणोदास्सनरस्य प्रियंसत्।
द्रविणोदा वीरवतीमिषन्नो द्रविणोदा रासते दीर्घमायुः॥
सवितापश्चातात्सवितापुरस्तात्सवितोत्तरात्तात्सविता
धरात्तात्।सवितानस्सुवतुसर्वतातिं सवितानो रासतां दीर्घमायुः॥
नवो नवो भवति जायमानोह्नाङ्केतुरुषसामे त्यग्रे।
भागन्देवेभ्यो विदधात्यायन्प्र चन्द्रमास्तिरति दीर्घमायुः॥
आप उन्दन्तुजीवसे दीर्घायुत्वाय वर्चसे।ज्योक्च सूर्यन्दृशे॥
यस्त्वा हृदा कीरिणामन्य मानोमर्त्यममर्त्योजोहवीमि।
जातवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृत त्वमश्याम्॥

यस्मै त्वꣳ सुकृतें जातवेद उ लोकमॅग्ने कृणवॅस्योनम्।
अश्विनꣳसपुत्रिणॅं वीरवॅन्तं गोमॅन्तꣳ रयिन्नॅशते स्वस्ति॥
सन्त्वाॅ सिञ्चामि यजुॅषा प्रजामायुर्धनॅञ्च।द्विः॥

- उपकलशद्वयं प्राणसममुद्धृत्यपुनरासाद्य-उपकलशतीर्थं उद्धरण्या दायकलशेनिक्षिपेत्-

दीर्घमायुरस्तु।मनस्समाधीयताम्।समाहितमनसस्मः।
प्रसीदन्तुभवन्तः। प्रसन्नास्मः।शान्तिरस्तु। पुष्टिरस्तु। तुष्टिरस्तु।
वृद्धिरस्तु। अविघ्नमस्तु। आयुष्यमस्तु। आरोग्यमस्तु।
धनधान्यसमृद्धिरस्तु। पुत्रसमृद्धिरस्तु। वेदसमृद्धिरस्तु।
शास्त्रसमृद्धिरस्तु। गोब्राह्मणेभ्यश्शुभं भवतु। ईशान्यां बहिर्देशे अरिष्टनिरसनमस्तु। आग्नेय्या
यत्पापं तत्प्रतिहतमस्तु। यच्छ्रेयस्तदस्तु। शुक्राङ्गारकबुधबृहस्पति शनैश्चरराहुकेतुसोम सहितादित्य पुरोगास्सर्वेग्रहाः प्रीयन्ताम्।
तिथिकरणमुहूर्तजन्मनक्षत्रदिग्देवताः प्रीयन्ताम्। शाम्यन्तुघोराणि।
शाम्यन्तुपापानि।शाम्यन्तईतयः। शुभानिवर्धन्ताम्।
शिवाॠतवस्सन्तु।शिवाओषधयस्सन्तु। शिवावनस्पतयस्सन्तु।
अहोरात्रेशिवेस्याताम्। उत्तरेशुभ कर्मण्यविघ्नमस्तु।
उत्तरोत्तरमहरभिवृद्धिरस्तु। उत्तरोत्तराश्शुभाः क्रियास्सम्पद्यन्ताम्।
अग्निपुरोगाःविश्वेदेवाश्च प्रीयन्ताम्। माहेश्वरीपुरोगाः मातरःप्रीयन्ताम्।
इन्द्रपुरोगाः मरुद्गणाः प्रीयन्ताम्। वसिष्ठपुरोगाः ॠषिगणाः प्रीयन्ताम्।
श्रीविष्णुपुरोगास्सर्वेदेवाश्चप्रीयन्ताम्।ॠषयश्छन्दाꣳस्याचार्या वेदायज्ञा दक्षिणाश्च प्रीयन्ताम्।ब्रह्मच ब्राह्मणाश्च प्रीयन्ताम्।ब्रह्मविष्णु महेश्वराश्चप्रीयन्ताम्। श्रद्धामेधेप्रीयेताम्। प्रीयतांभगवान्नारायणः।
प्रीयताम्भगवान्पर्जन्यः। प्रीयताम्भगवान्स्वामीमहासेनः।
प्रीयताम्भगवा न्पितामहः।प्रीयताम्भगवान्प्रपितामहः॥

सत्या एताआशिषॅस्सन्तु।पुण्याहकाला वाच्यन्ताम्।

उद्गातेवँ शकुने सामँगायसि ब्रह्मपुत्र इँव सवँनेषु शꣳससि ॥

वृषेव वाजी शिशुँमतीरपीत्या सर्वतोनश्शकुनेभद्रमावँद

विश्वतोनश्शकुनेपुण्यमावँद ॥याज्ययायजतिप्रत्युर्वैयाज्या ।

पुण्यैवलक्ष्मीः । पुण्यामेवतल्लक्ष्मीं सम्भावयति ।पुण्यांलक्ष्मीं सꣳस्कुरुते ॥

यत्पुण्यन्नक्षँत्रम् ।तद्वदकुँर्वीतोपव्युषम् ।यदावैसूर्यँउदेतिँ ।

अथ नक्षँत्रन्नैतिँ ।यावँति तत्र सूर्यो गच्छेत् ।यत्रँ जघन्यँम्पश्येत् ।

तावँति कुर्वीत यत्कारीस्यात् ।पुण्याह एव कुँरुते ॥ओंतानिवाएतानिँ

यमनक्षत्राणिँ ।यान्येव दैँवनक्षत्राणिँ ।तेषुँ कुर्वीत यत्कारी स्यात् ।

पुण्याह एव कुँरुते ॥

ओंपुण्याहं भवन्तो ब्रुवन्तु । ओंपुण्याहम् ॥त्रिः ॥

स्वस्तयेँ वायुमुपँब्रवामहै सोमं स्वस्ति भुवँनस्ययस्पतिँः ।

बृहस्पतिं सर्वँगणं स्वस्तयेँ स्वस्तयँ आदित्यासो भवन्तुनः ॥

आतिथ्य उदयनीयः ।पथ्ययेँवैत स्वस्त्या प्रीयन्ति ।पथ्यां स्वस्ति

मभ्युद्यन्ति । स्वस्त्येवेतःप्रीयन्ति ।स्वस्त्युद्यन्ति स्वँस्त्युद्यन्ति ॥

स्वस्तिन इन्द्रोँ वृद्धश्रँवाः ।स्वस्ति नँःपूषा विश्ववेँदाः ।

स्वस्ति नस्तार्क्ष्योँअरिँष्टनेमिः ।स्वस्ति नोबृहस्पतिँर्दधातु ॥

ओꣳस्वस्ति भवन्तो ब्रुवन्तु ॥त्रिँः ॥ ओꣳस्वस्ति ॥

ऋध्यामस्तोमं सनुयामवाजमानो मन्त्रं सरथेहोपँयातम् ।

यशो न पक्वं मधु गोष्वन्तरा भूतांशो अश्विनोःकामॅमप्राः ॥

सर्वामृद्धिमृध्नुयामितितवैतेजसैवपुरस्तात्पर्यभवच्छन्दोभि र्मध्यतोक्षरै रुपरिष्टा द्वायत्र्या स्सर्वतो द्वादशाहम्परिभूयात्सर्वामृद्धिमार्ध्नोत्सर्वामृद्धिमृध्नोति यएवंवेद ॥

ऋध्यास्मॅहव्यैर्नमॅसोपसद्यॅ ।मित्रन्देवम्मॅत्रधेयॅन्नोअस्तु ।

अनूराधान् हविषॉ वर्धयॅन्तः ।शतञ्जीवेम शरदस्सवींराः ॥

त्रीणिं त्रीणि वै देवानॉमृद्धानि । त्रीणि छन्दाँसि ।त्रीणि सवॅनानि ।

त्रयॅ इमे लोकाः ।ऋध्यामेवतद्वीर्यॅएषुलोकेषुप्रतिंतिष्ठति ॥

ऋद्धिम्भवन्तोब्रुवन्तु ।कर्मऋध्यताम् ।ऋद्धिस्समृद्धिरस्तु ।

पुण्याहसमृद्धिरस्तु । वर्षशतसम्पूर्णमस्तु । गोत्राभिवृद्धिरस्तु । शान्तिःपुष्टिस्तुष्टिश्चास्तु । शुभँशुभमस्तु ।पुनरपि गोब्राह्मणेभ्यश्शुभम्भवतु ।सर्वसम्पदस्तु ॥

शुचींवोहव्यामॅरुतश्शुचींनाम् ।शुचिꣳहिनोम्यध्वरꣳशुचिँभ्यः

ऋतेनॅ सत्यमृत सापॅआयन् ।शुचिँजन्मानश्शुचॅयःपावकाः ॥

अग्निश्शुचिंव्रतत मश्शुचिर्विप्रश्शुचिंःकविः ।शुचींरोचत आहुॅतः ॥

उदॅग्ने शुचॅय स्तवॅशुक्राभ्राजॅन्त ईरते ।तव ज्योतीꣳष्यर्चयॅः ॥

पवॅमानस्सुवर्जनः ।पवित्रेॅण विचॅर्षणिः ।यःपोता स पुॅनातुमा ॥

पुनन्तुॅ मादेवजनाः ।पुनन्तु मनॅवो धिया । पुनन्तुविश्वॅआयवॅः ॥

जातॅवेदः पवित्रॅवत् ।पवित्रेॅण पुनाहि मा ।शुक्रेणॅ देव दीद्यॅत् ।अग्ने क्रत्वा क्रतूँरनुॅ ॥ यत्तें पवित्रॅमर्चिषिं ।अग्ने वितॅतमन्तरा ।ब्रह्म तेनॅ पुनीमहे ॥

उभाभ्यान्देवसवितः ।पवित्रेण सवेनच ।इदम्ब्रह्म पुनीमहे ॥

वैश्वदेवी पुनती देव्यागात् ।यस्यै बह्वीस्तनुवो वीतपृष्ठाः ।
तयामदन्तस्सधमाद्येषु ।वयꣳस्याम पतयो रयीणाम् ॥
वैश्वानरो रश्मिभिर्मा पुनातु । वातःप्राणेनेषिरो मयोभूः ।
द्यावापृथिवी पयसा पयोभिः ।ऋतावरीयज्ञिये मा पुनीताम् ॥
बृहद्भिस्सवितस्तृभिः । वरूषिष्ठैर्देव मन्मभिः ।अग्ने दक्षैः पुनाहि मा ॥
येनदेवा अपुनत ।येनापो दिव्यङ्कशः ।तेन दिव्येन ब्रह्मणा ।
इदम्ब्रह्म पुनीमहे ॥ यः पावमानीरध्येति ।ऋषिभिस्सम्भृतꣳ रसम् ।
सर्वꣳसपूतमश्नाति ।स्वदितम्मातरिश्वना ॥पावमानीर्यो अध्येति । ऋषिभि
स्सम्भृतꣳ रसम् । तस्मै सरस्वती दुहे । क्षीरꣳ सर्पि र्मधूदकम् ॥
पावमानीस्स्वस्त्ययनीः । सुदुघा हि पयस्वतीः । ऋषिभिस्सम्भृतो
रसः । ब्राह्मणेष्वमृꣳ हितम् ॥ पावमा नीर्दिशन्तुनः ।इमल्लोकमथो
अमुम् । कामा न्त्समर्धयन्तु नः ।देवीर्देवैस्समाभृताः ॥पावमानी
स्स्वस्त्ययनीः ।सुदुघा हि घृतश्चुतः ।ऋषिभिस्सम्भृतो रसः ।ब्राह्मणेष्व
मृतꣳहितम् ॥येनदेवाः पवित्रेण ।आत्मानम्पुनते सदा ।तेनसहस्रधारेण ।
पावमा न्यःपुनन्तु मा ॥प्राजापत्यम्पवित्रम् । शतोद्यामꣳहिरण्मयम् ।
तेन ब्रह्मविदो वयम् । पूतम्ब्रह्म पुनीमहे ॥इन्द्रस्सुनीती सहमा पुनातु ।
सोमस्स्वस्त्या वरुणस्समीच्या ।यमो राजा प्रमृणाभिः पुनातु मा ।जातवेदा

मोर्जयॅन्त्या पुनातु ॥भूर्भुवस्सुवॅः ॥-कलशोदकमादाय प्रति दिशं प्रोक्षेत्-
प्राच्यान्दिशि देवा ऋत्विजॉ मार्जयन्ताम्।दक्षिॅणायान्दिशि मासाः
पितरॉ मार्जयन्ताम्।प्रतीच्यान्दिशि गृहाः पशवॉ मार्जयन्ताम्।
उदीच्यान्दिश्याप ओषॅधयो वनस्पतॅयो मार्जयन्ताम्।ऊर्ध्वायान्दिशि
यज्ञस्संवत्सरोयज्ञपॅतिर्मार्जयन्ताम्॥

यथाशक्ति दक्षिणां गृहीत्वा-एतेभ्योब्राह्मणेभ्योनानागोत्रेभ्यो नानानामभ्यः लक्ष्मीनारायणउमामहेश्वर आदित्यादिनवग्रहदेवतास्वरूपेभ्यः लक्ष्मीनारायण उमामहेश्वरआदित्यादि नवग्रहदेवताप्रीत्यर्थं पुण्याहवाचनमन्त्रजपदक्षिणारूपं मनसोत्साहपरिमितं हिरण्यं तेभ्यस्तेभ्यस्संप्रददे नमः नमम ॥यजमानं सर्वोपकरणानि च प्रोक्षेत्-

वास्तोष्पते प्रतिं जानीह्यस्मान्त्स्वॉवेशो अॅनमीवो भॅवा नः।यत्वेमॅहे प्रति
तन्नॉ जुषस्व शन्नॅ एधि द्विपदे शञ्चतुॅष्पदे ॥वास्तोष्पते शग्मयॉ सꣳसदाते
सक्षीमहिं रण्वया गातुमत्या।आवःक्षेम उत योगे वरन्ना यूयम्पात स्वस्तिभि
स्सदॉ नः ॥वास्तोष्पते प्रतॅरणो न एधि गोभिरश्वॅभिरिन्दो।अजरॉसस्ते
सख्ये स्यॉम पितेवॅ पुत्रान्प्रतिं नो जुषस्व ॥ अमीवहा वास्तोष्पते
विश्वॉरूपाण्यॉविशन्।सखॉ सुशेवॅ एधि नः ॥शिवꣳ शिवम्॥
देवस्यॅत्वा सवितुः प्रॅसवे ।अश्वनोर्बाहुभ्याम्। पूष्णो
हस्ताभ्याम्।अश्विनो भैॅषॅज्येन ।तेजॅसेब्रह्मवर्चसायाभिषिञ्चामि ॥
द्रुपदादिवे न्मुॅमुचा नः। स्विन्नस्नात्वी मलॉदिव ।पूतम्पवित्रॅणेवाज्यम्।
आपॅश्शुन्धन्तु मैनॅसः ॥भूर्भुवस्सुवो भूर्भुवस्सुवो भूर्भुवस्सुवॅः ॥

तीर्थप्राशनम्- अप्सु मे सोमो अब्रवीत्। अन्तर्विश्वानिभेषजा। अग्निञ्च विश्व शम्भुवम्। आपश्च विश्वभेषजीः ॥अकालमृत्युहरणं सर्वव्याधि निवारणम्। समस्तपापक्षयकरं वरुणपादोदकं शुभम्॥

हिरण्यरूप नान्दीश्राद्धप्रयोगः

दर्भेष्वासीनः दर्भान्धारयमाणः ॥
शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
ओंभूः - भूर्भुवस्सुवरों ममोपात्त समस्तदुरित क्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थम् अद्य पूर्वोक्त एवंगुण विशेषण विशिष्टायां अस्यां--शुभतिथौ--कर्माङ्गं हिरण्यरूपेण आभ्युदयिकं करिष्ये ॥ नान्दीशोभनदेवता उद्दिश्य नान्दीशोभनदेवता प्रीत्यर्थम् नान्द्या ऽऽह्वाना ऽऽख्यं कर्म च करिष्ये ॥ अत्र देवता अनुमोदनार्थम् इडावाचनाख्यं कर्म च करिष्ये ॥तण्डुलपूरितकांस्यपात्रे फलताम्बूलादिकं गृहीत्वोत्थाय-

इडॅदेवहूर्मनुॅर्यज्ञनीर्बृहस्पतिॅरुक्थामदानिँशꣳसिषद्विश्वेॅदेवास्सूक्तवाचः पृथिॅविमात र्मामॉ हिꣳसीर्मधुॅ मनिष्ये मधुॅ जनिष्ये मधुॅ वक्ष्यामि मधुॅ वदिष्यामि मधुॅमतीन्देवेभ्यो वाचॅमुद्यासꣳशुश्रूषेण्यांमनुष्येभ्यस्तंमॉ देवा अॅवन्तुशोभायैॅ पितरोनुॅ मदन्तु।इड एहिॅ ॥

अदिॅतिद्यौॅरदिॅतिरन्तरिॅक्षमदिॅतिर्माता स पिता स पुत्रः।विश्वेॅदेवा अदिॅतिःपञ्चजनाअदिॅतिर्जातमदिॅतिर्जनिॅत्वम्॥अदिॅत एहिॅ ॥

प्रणोदेवीसरस्वतीवाजेभिर्वाजिनीवती ।धीनामवित्र्यवतु ।सरस्वत्येहि ॥

शोभनं शोभनम् ।अत्रदेवताः अत्रदेवताःनान्दीशोभन देवताः युग्मा

स्समुच्चया भूत्वाइह----- मुहूर्तवेदिकायामागत्य मां रक्षन्तु ।मम धर्मपत्नीं रक्षन्तु ।मम कुमारंरक्षन्तु । करिष्यमाण--मुहूर्तसुमुहूर्तकुर्वन्तु ॥

अत्रदेवताः अत्रदेवताः नान्दीशोभनदेवताःनान्दीमुखाःनान्दी ।
प्रपितामहिपितामहिमातरःनान्दीशोभनदेवताःनान्दीमुखाःनान्दी ।द्विः ॥
जीवन्मातृकश्चेत्जनकस्यइत्युक्त्वा प्रपितामहीत्यादि ।
प्रपितामहपितामहपितरःनान्दीशोभनदेवताःनान्दीमुखाःनान्दी ।द्विः ।
जीवत्पितृकश्चेत् सर्वत्र जनकस्येत्युक्त्वासर्वं वदेत् ।
मातामहमातुःपितामहमातुःप्रपितामहाःपत्नीसमेताःनान्दीशोभन देवताः नान्दीमुखाःनान्दी ।द्विः ।

उभाभ्यामुभाभ्यां सत्यवसुसंज्ञकान्विश्वान्देवान् नान्दीसंरक्षक महा विष्णुञ्चयथाशक्ति हिरण्यादि द्रव्येण अद्यतोषयिष्ये ॥
आसने उपविश्य दक्षिण ऊरौ नारिकेळादियुक्त कांस्यपात्रं दक्षिणेऽङ्केसंस्थाप्य नारिकेळं पूजयेत् ।नान्दीशोभनदेवताभ्यो नमः ध्यायामिआवाहयामि इत्यादि षोडशोपचार पूजां कुर्यात् ।अनया पूजया नान्दीशोभनदेवता स्सुप्रीता स्सुप्रसन्ना वरदाभवन्तु ॥
यथासम्भवं दक्षिणा वस्त्र रजतादिकं ताम्बूले निधाय-

हिरण्यगर्भ गर्भ गर्भस्थं हेम बीजं विभावसोः ।
अनन्तपुण्यफलदं अतश्शान्तिं प्रयच्छ मे ॥

-- नक्षत्रे--राशौ जातस्य--शर्मणः अस्य मम कुमारस्य अथवा --नक्षत्र--राशौजातायाः--नाम्न्याः अस्याःमम कुमार्याः--कर्माङ्गभूते हिरण्यरूपेण क्रियमाणे अस्मिन् आभ्युदयिके प्रपितामहि पितामहि मातृणां नान्दीशोभनदेवतानां नान्दीमुखाना

तुष्टयर्थं ।द्विः ।प्रपितामह पितामह पितृणां नान्दीशोभनदेवतानां नान्दीमुखानां तुष्टयर्थं ।द्विः ।
मातामह मातुःपितामह मातामहानां पत्नीसमेतानां नान्दीशोभनदेवतानां नान्दीमुखानांतुष्टयर्थं ।द्विः ।उभाभ्यामुभाभ्यां सत्यवसु संज्ञकानां विश्वेषान्देवानां नान्दीसंरक्षक महाविष्णोश्च तुष्टयर्थं यद्देयमन्नं तत्प्रतिनिधिभूतं इदमाग्नेयं हिरण्यंसदक्षिणाकं सताम्बूलं सवस्त्रं सरजतं नान्दीशोभनदेवता स्वरूपेभ्यो नानागोत्रेभ्यो ब्राह्मणेभ्यस्तेभ्यस्तेभ्य स्संप्रददे नमःनमम ।ओंतत्सत् ॥ नान्दीशोभनदेवताः पितरः प्रीयन्ताम् ॥
हिरण्यादिकं ब्राह्मणेभ्यो विनियुञ्ज्यात् ।ब्राह्मणान् प्रार्थयेत्
मया हिरण्येन कृतं आभ्युदयिकं सम्पन्नम्-सुसम्पन्नम् ।
नान्दीशोभनदेवताः पितरः प्रीयन्ताम् ॥प्रीयन्तां नान्दी शोभन देवताः पितरः ॥मनस्समाधीयताम् । समाहितमनसस्मः ॥प्रसीदन्तु भवन्तः । प्रसन्नास्मः ॥श्रीरस्त्विति भवन्तो ब्रुवन्तु ।अस्तु श्रीः ॥ पुण्याहं भवन्तो ब्रुवन्तु ।पुण्याहम् ॥आशीर्वचनम्-

ऋध्यास्मँहव्यैर्नमँसोपसद्यँ ।मित्रन्देवम्मिँत्रधेयँन्नो अस्तु ।
अनूराधान् हविषाँ वर्धयँन्तः ।शतञ्जीँवेम शरदस्सवीँराः ॥

नवोँ नवो भवति जायँमानोह्नाङ्केतुरुषसाँमेत्यग्रे ।भागन्देवेभ्यो विदँधात्या यन्प्र चन्द्रमास्तिरति दीर्घमायुँः ॥ सुमङ्गलीरियंवधूरिमाꣳ सँमेत पश्यँत ।
सौभाग्यमस्यै दत्वायाऽथास्तंविपरँेतन ॥ इमान्त्वमिँन्द्रमीढ्वस्सु पुत्राꣳसुभगांकुरु । दशास्यांपुत्रानाधँेहि पतिमेकादशंकृँधि ॥
शतमाँनम्भवति शतायुः पुरुँषश्शतेन्द्रिँय आयुँष्येवेन्द्रिये प्रतिँतिष्ठति ॥श्रीवर्चँस्वमायुँष्यमारोग्यमाविँधाच्छोभँमानम्महीयते ।

धान्यन्धनम्पशुम्बहुपुँत्रलाभंशतसंवथ्सरन्दीर्घमायुँः ॥
नान्दीशोभनदेवता प्रसाद सिद्धिरस्तु ॥

कर्मणःपुण्याहम्

दर्भेष्वासीनः दर्भान्धारयमाणः
शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
ओंभूः - भूर्भुवस्सुवरों ममोपात्त समस्तदुरित क्षयद्वारा
श्रीपरमेश्वरप्रीत्यर्थम् अद्य पूर्वोक्त एवंगुण विशेषण विशिष्टायां अस्यां-
- शुभतिथौ अभ्युदय कर्माङ्गं कर्मणः पुण्याहं वाचयिष्ये ॥

कलशं प्रतिष्ठाप्य कलशे वरुणपूजां कुर्यात्

आपोवा इदꣳसर्वम् विश्वॅभूतान्यापँःप्राणावा आपँः पशव आपोन्नमापोमृँत
मापँस्सम्राडापोंविराडापँ स्वराडापश्छन्दाꣳस्यापो ज्योतीꣳष्यापो यजूꣳ
ष्यापँस्सत्यमापस्सर्वंदेवता आपो भूर्भुवस्सुवराप ओम् ॥ इमम्मे वरुण
श्श्रुधी हवॅमद्या चॅ मृडय ।त्वामॅव स्युराचॅके ॥ तत्वॉयामि ब्रह्मॅणा वन्दॅमान
स्तदाशास्ते यजॅमानोहविर्भिः ।अहेँडमानो वरुणेह बोध्युरुँशꣳस मान
आयुः प्रमोँषीः ॥भूर्भुवस्सुवरोम् अस्मिन्कुम्भे सकलतीर्थाधिपतिं वरुणं
ध्यायामि वरुणं आवाहयामि वरुणस्य इदमासनम् ॥वरुणायनमः
इति षोडशोपचारपूजां कुर्यात्-अभ्युदयकर्मणः पुण्याहं भवन्तो ब्रुवन्तु ।
पुण्याहम् ॥त्रिः ॥यत्पुण्यन्नक्षॅत्रम् ।तद्वदक्रुँर्वीतोपव्युषम् ।यदावैसूर्यॅउदेतिं ।

अथ नक्षँत्रन्नैतिं ।यावँति तत्र सूर्यो गच्छेत् ।यत्रँ जघन्यँम्पश्येत् ।
तावँति कुवीत यत्कारीस्यात् ।पुण्याह एव कुँरुते ॥
ओंपुण्याहं भवन्तो ब्रुवन्तु ।ओं पुण्याहम् ॥त्रिः ॥
स्वस्तिन इन्द्रो वृद्धश्रँवाः ।स्वस्ति नँःपूषा विश्ववेंदाः ।
स्वस्तिनस्तार्क्ष्यो अरिँष्टनेमिः ।स्वस्ति नो बृहस्पतिँर्दधातु ॥
ओꣳस्वस्ति भवन्तो ब्रुवन्तु ।ओं ꣳस्वस्ति ॥त्रिः ॥
ऋध्यास्मँहव्यैर्नमँसोपसद्यँ ।मित्रन्देवम्मिँत्रधेयँन्नोअस्तु ।
अनूराधान्हविषाँवर्धयँन्तः ।शतञ्जीँवेम शरदस्सवीँराः ॥
त्रीणिँ त्रीणि वै देवानाँमृद्धानि । त्रीणि छन्दाँसि ।त्रीणि सवँनानि ।
त्रयँ इमे लोकाः ।ऋध्यामेव तद्वीर्यँ एषु लोकेषुप्रतिँतिष्ठति ॥
ऋद्धिम्भवन्तोब्रुवन्तु ।कर्मऋध्यताम् ।ऋद्धिस्समृद्धिरस्तु ।
पुण्याहसमृद्धिरस्तु ।वर्षशतसम्पूर्णमस्तु । गोत्राभिवृद्धिरस्तु ।
शान्तिःपुष्टिस्तुष्टिश्चास्तु ।शुभꣳ शुभमस्तु ।
पुनरपि गोब्राह्मणेभ्यश्शुभम्भवतु ।सर्वसम्पदस्तु ॥
शुचींवोहव्यामँरुतश्शुचींनाम् ।शुचिꣳहिनोम्यध्वरꣳशुचिँभ्यः
ऋतेनँ सत्यमृत सापँआयन् ।शुचिँजन्मानश्शुचँयःपावकाः ॥
अग्निश्शुचिँव्रतत मश्शुचिर्विप्रश्शुचिँःकविः ।
शुचींरोचत आहुँतः ॥उदँग्ने शुचँय स्तवँशुक्राभ्राजँन्त ईरते ।

तव ज्योतीꣳष्यर्चयः ॥

पवꣳमानस्सुवर्जनः इत्यादि जातवेँदा मोर्जयꣳन्त्या पुनातु ॥

भूर्भुवस्सुवꣳः ॥- कलशोदकमादाय प्रति दिशं प्रोक्षेत् -

प्राच्यान्दिशि देवा ऋत्विजो मार्जयन्ताम्।

दक्षिणायान्दिशि मासाःपितरो मार्जयन्ताम्।

प्रतीच्यान्दिशि गृहाः पशवो मार्जयन्ताम्।

उदीच्यान्दिश्याप ओषधयो वनस्पतयो मार्जयन्ताम्।

ऊर्ध्वायान्दि शियज्ञꣳसंवत्सरोयज्ञपतिर्मार्जयन्ताम् ॥

यथाशक्ति दक्षिणां गृहीत्वा-

एतेभ्योब्राह्मणेभ्योनानागोत्रेभ्यो नानानामभ्यः
लक्ष्मीनारायणउमामहेश्वर आदित्यादिनवग्रहदेवतास्वरूपेभ्यः
लक्ष्मीनारायणउमामहेश्वरआदित्यादि नवग्रहदेवताप्रीत्यर्थं
पुण्याहवाचनमन्त्रजपदक्षिणारूपं मनसोत्साहपरिमितं हिरण्यं
तेभ्यस्तेभ्यस्संप्रददे नमः नमम ॥

अङ्कुरारोपणम्

पवित्रं धृत्वा -दर्भेष्वासीनः दर्भान्धारयमाणः
शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ॐभूः - भूर्भुवस्सुवरों ममोपात्त समस्तदुरित क्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थम् अद्य पूर्वोक्त एवंगुण विशेषण विशिष्टायां अस्यां--शुभतिथौ-- नक्षत्रे-- जातस्य--शर्मणः अस्य मम कुमारस्य अथवा नक्षत्रे--राशौ जातायाः --नाम्न्याः

अस्याःमम कुमार्याः--कर्माङ्गं अङ्कुरारोपणाख्यं कर्म करिष्ये।
भूमिर्भूम्नेति भूमिमभिमन्त्र्य-

भूमिर्भूम्नाद्यौर्वरिणान्तरिक्षम्महित्वा ।उपस्थे ते देव्यदितेऽग्नि
मन्नादमन्नाद्यायादधे ॥आयङ्गौःपृश्निरक्रमीदसनन्मातरम्पुनः ।
पितरञ्च प्रयन्त्सुवः ॥त्रिंशद्धाम विराजति वाक्पतङ्गाय शिश्रिये ।
प्रत्यस्य वह्द्युभिः ॥अस्यप्राणादपानत्यन्तश्चरति रोचना ।
व्यख्यन्महिषस्सुवः ॥यत्वा क्रुद्धः परोवप मन्युना यदवर्त्या ।
सुकल्पमग्ने तत्तव पुनस्त्वोद्दीपयामसि ॥यत्ते मन्युपरोप्तस्य
पृथिवीमनु दध्वसे ।आदित्या विश्वेतद्देवा वसवश्च समाभरन् ॥
मनो ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञँ समिमन्दधातु ।
बृहस्पतिस्तनुतामिमन्नो विश्वेदेवा इह मादयन्ताम् ॥
मावो रिषत्खनितेति भुमिं खनति-

मावो रिषत्खनिता यस्मैचाहङ्खनामि वः ।द्विपच्चतुष्पदस्माक ꣳ
सर्वमस्त्वनातुरम् ॥
अपउपस्पृश्य- भुमिर्धेनुरिति मृदमभिमन्त्र्य-

भूमिर्धेनुर्धरिणी लोकधारिणी । पालिकाः प्रणवेन पूरयित्वा-ओं।
तिलमाषादि धान्यानि यथासम्भवं गृहीत्वा-क्षीरेण प्रक्षाळ्य निधाय-
पालिकासु दूर्वाश्वत्थादिपत्राणि निधाय सूत्रेण वेष्टयित्वा-
पालिकासु देवताः आवाहयेत्-मध्यमपालिकायां-
ओंभूः ब्रह्माणमावाहयामि ।ओंभुवः प्रजापतिमावाहयामि ।औं सुवः

चतुर्मुखमावाहयामि ।ओं भूर्भुवस्सुवः हिरण्यगर्भमाहयामि ॥
पूर्वपालिकायाम्-ओं भूः इन्द्रमावाहयामि ।ओं भुवः वज्रिणमावाहयामि ।ओँ सुवः शचीपतिमावाहयामि ।ओं भूर्भुवस्सुवः शंतक्रतुमावाहयामि ॥
दक्षिणपालिकायाम्-ओं भूः यममावाहयामि ।ओं भुवः वैवस्वतमावाहयामि ।ओँ सुवः पितृपतिमावाहयामि ।ओं भूर्भुवस्सुवः धर्मराजमावाहयामि ॥
पश्चिमपालिकायाम्-ओं भूः वरुणमावाहयामि ।ओं भुवःप्रचेतसमावाहयामि ।ओँ सुवः सुरूपिणमावाहयामि ।ओं भूर्भुवस्सुवः अपाम्पतिमावाहयामि ॥
उत्तरपालिकायां-ओं भूःशशिनमावाहयामि ।ओं भुवः निशाकरमावाहयामि ।ओँ सुवः चन्द्रमावाहयामि ।ओं भूभुवस्सुवः सोममावाहयामि ॥ब्रह्मादि सोमपर्यन्तेभ्यो नमः-
इति षोडशोपचारपूजां कुर्यात् ।मध्ये स्नपनकाले- आपो हिष्ठा इति तिसृभिः हिरण्यवर्णा इति चतसृभिःपवमानस्सुवर्जन इत्यनुवाकेन च मार्जयेत् ॥

आपो हिष्ठा मॅयो भुवॅः ।तानॅ ऊर्जे दॅधातन ।महे रणॉयचक्षॅसे ।

योवॅश्शिवतॅमो रसॅः । तस्यॅ भाजयतेह नॅः । उशतीरिॅव मातरॅः ।

तस्मा अॅरङ्गमाम वः ।यस्य क्षयॉय जिन्वॅथ । आपॉ जनयॅथा च नः ॥

हिरॅण्यवर्णाश्शुचॅयः पावका यासुॅ जातःकश्यपो यास्विन्द्रॅः ।

अग्निं या गर्भॅन्दधिरेविरूॅपास्तान आपश्शश्स्योना भॅवन्तु ॥

यासाꣳराजा वरुॅणो याति मध्यॅे सत्यानृतेअॅवपश्यञ्जनॉनाम् ।

मधुश्चुतश्शुचॅयो याः पॉवकास्तान आपश्शश्स्योनाभॅवन्तु ॥

यासान्देवा दिवि कृण्वन्तिँ भक्षंया अन्तरिक्षे बहुधा भवँन्ति ।

याः पृँथिवीपयँसोन्दन्तिँ शुक्रास्तान आपश्शꣳ स्योना भँवन्तु ॥

शिवेनँमा चक्षुँषापश्यतापश्शिवयाँ तनुवोपँस्पृशतु त्वचँम्मे ।

सर्वाꣳअग्नीꣳरँप्सुषदोँ हुवेवो मयिवर्चोँबलमोजो निधँत्त ॥

भूर्भुवस्सुवँः ॥-पूजान्ते अथैनानुपतिष्ठते-

दिशाम्पतीन्नमस्यामि सर्वकाम फलप्रदान् ।
कुर्वन्तु सफलङ्कर्म कुर्वन्तु सततं शुभम् ॥

या जाता इत्यनुवाकेन ओषधीः अभिमन्त्र्य-

या जाता ओषँधयो देवेभ्यँस्त्रियुगम्पुरा ।मन्दाँमि बभ्रूणाँम
हꣳशतन्धामाँनि सप्त चँ ॥शतंवोँ अम्ब धामाँनि सहस्रँमुतवो
रुहँः ।अथाँ शतक्रत्वो यूयमिमम्मेँ अगदं कृँत ॥पुष्पाँवतीः
प्रसूवँतीः फलिनीँरफलाउत ।अशवाँ इव सजित्वँरीर्वीरुधँः
पारयिष्णवँः ॥ओषँधीरितिँ मातरस्तद्वोँ देवीरुपँब्रुवे ।रपाꣳसि
विप्रतीरितँ रपँश्चातयँमानाः ॥अश्वत्थे वोँ निषदँनम्पर्णे वोँ
वसतिः कृता ।गोभाज इत्किलाँसथ यत्सनवथँ पूरुँषम् ॥

यदहं वाजयँन्निमा ओषँधीर् हस्तँ आददे ।आत्मा यक्ष्मँस्य नश्यति
पुरा जीँवगृभोँ यथा ॥यदोषँधयस्सङ्गच्छँन्ते राजाँनस्समिँताविव ॥
विप्रस्स उँच्यते भिषग्रँक्षोहामीँवचातँनः ॥निष्कृँतिर्नामँवो माताथाँ
यूयꣳस्थसंकृँतीः ।सराः पँतत्रिणीस्थन यदामयँतिनिष्कृँत ॥

अन्या वोंअन्यामॅवत्वन्यान्यस्या उपॉवत ।तास्सर्वा ओषॅधय
स्संविदाना इदंमे प्रावॅता वचॅः ॥ उच्छुष्मा ओषॅधीनाङ्गावों
गोष्ठादिवेरते । धनꣳसनिष्यन्तींनामात्मानन्तवॅ पूरुष ॥
अति विश्वाः परिष्ठास्तेन इॅव व्रजमॅक्रमुः ।ओषॅधयःप्राचुॅच्यवुर्य
त्किञ्चॅतनुवाꣳरपॅः ॥ यास्तॅआतस्थुरात्मानं याऑविविशुः
परुॅःपरुः ।तास्ते यक्ष्मं विबॉधन्तामुग्रोंमॅध्यमशीरिंव ॥
साकं यॅक्ष्म प्रपॅत श्येनेनॅ किकिदीविना ।साकं वातॅस्य ध्राज्यॉ
साकन्नॅश्य निहाकॅया ॥अश्वावतीꣳ सोंमवतीमूर्जयॅन्तीमुदोंजसम् ।
आविंत्सि सर्वा ओषॅधीरस्मा ॲरिष्टतॉतये ॥याः फलिनीर्या
ॲफला ॲपुष्पा याश्चॅ पुष्पिणीः ।बृहस्पतिंप्रसूतास्तानों
मुञ्चन्त्वꣳहॅसः ॥या ओषॅधयस्सोमॅराज्ञीः प्रविंष्टाः पृथिवीमनुं ।
तासान्त्वमॅस्युत्तमा प्रणों जीवातॅवे सुॅव ॥अवपतॅन्तीरवदन्दिव
ओषॅधयः परिं ।यञ्जीवमश्फावॉमहै नसरिंष्याति पूरुॅषः ॥
याश्चेदमुॅपशृण्वन्ति याश्चॅ दूरम्परॉगताः ।इहसङ्गत्य तास्सर्वाँ
अस्मै सन्दॅत्त भेषजम् ॥मावों रिषत्खनिता यस्मैंचाहञ्चनॉमि वः ।
द्विपच्चतुॅष्पदस्माकꣳ सर्वंमस्त्वनॉतुरम् ॥ओषॅधयस्संवॅदन्ते
सोमेंन सहराज्ञा ।यस्मैं करोतिं ब्राह्मणस्तꣳरॉजन्पारयामसि ॥
ब्रह्मजज्ञानम्प्रजापते नत्वदेतानीति मध्यम पालिकायाम्बीजानावपति-

ब्रह्मॅज्ञानम्प्रॅथमम्पुरस्ताद्विसींमतस्सुरुचौं वेनऑवः। सबुध्नियॉ उपमा ऑस्यविष्ठास्सतश्च योनिमसॅतश्चविवॅः॥ प्रजॉपते नत्वदे तान्यन्यो विश्वॉजातानि परिताबॅभूव॥यत्कॉमास्ते जुहुमस्तन्नौं अस्तु वयꣳ स्यॉम पतॅयो रयीणाम्॥

पूर्वपालिकायाम् यत इन्द्र स्वस्तिदा इति-

यतॅ इन्द्र भयॉमहे ततौं नो अभॅयं कृधि।मघॅवञ्छग्धितवतन्नॅ ऊतये विद्विषो विमृधौं जहि॥स्वस्तिदा विशस्पतिंर्वृत्रहा विमृधौं वशी। वृषेन्द्रॅः पुर ऍतुनस्वस्तिदा ऑभयङ्करः॥

दक्षिणपालिकायाम् यमायसोममिमंयमेति-

यमाय सोमꣳसुनुत यमायॅ जुहुता हविः।यमꣳहॅ यज्ञो गॅच्छत्वग्नि दूॅतो अरॅंकृतः॥ इमंयॅमप्रस्तरमाहि सीदाङ्गिरोभिःपितृभि ॅस्संविदा नः।आत्वा

मन्त्राः कविशस्तावॅहन्त्वेनारॉजन् हविषामादयस्व॥

पश्चिमपालिकायामिमम्मे वरुण तत्वायामीति-

इमम्मॅे वरुणश्श्रुधी हवॅमद्या चॅ मृडय।त्वामॅवस्युराचॅके॥

तत्वॉयामि ब्रह्मॅणा वन्दॅमानस्तदाशास्ते यजॅमानो हविर्भिः।

अहॅेडमानो वरुणेह बोध्युरुꣳश ँस मान आयुः प्रमौषीः॥

उत्तरपालिकायां सोमो धेनुमाप्ययस्वेति-

सोमौं धेनुꣳसोमो अर्वॅनतमाशुम्।सोमौं वीरङ्कॅर्मण्यॅन्ददातु।

सादन्यँ विदथ्यꣳ सभेयम् ।पितुश्श्रवँणंयो ददाँति तस्मै ॥

आप्याँयस्व समेँतुते विश्वतँस्सोम वृष्णियम् ।

भवा वाजँस्य सङ्गथे ॥ शुद्धाभिर्मृद्भिः प्रच्छादयेत् ॥जलेन सुमङ्गलीभिर्यथाक्रमं

से चयेत् ॥तासां ताम्बूलादीनि

दद्यात् ॥अंकुरारोपणमुहूर्तस्सुमुहूर्तोंस्त्विति

भवन्तो महान्तो ऽनुगृह्णन्तु ।सुमुहूर्तोंस्तु ॥

रक्षाबन्धन प्रयोगः

नवतन्तौ मध्ये हरिद्रां बध्वा नारिकेलोपरि प्रतिष्ठाप्य-

शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम् ।

प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

ओंभूः - भूर्भुवस्सुवरों ममोपात्त समस्तदुरित क्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थम् अद्य पूर्वोक्त एवंगुण विशेषण विशिष्टायां अस्यां --शुभतिथौ--नक्षत्रे--राशौ जातस्य--शर्मणः अस्य मम कुमारस्य अथवा नक्षत्रे--राशौ--जातायाः अस्याःमम कुमार्याः--कर्माङ्गं रक्षाबन्धनाख्यकर्मकरिष्ये । रक्षाबन्धन देवताभ्यो नमः ध्यायामि इत्यादि षोडशोपचारपूजांकुर्यात् ॥

अग्निरायुष्मानिति पञ्चभिः कुमारमभिमन्त्रयेत्-

अग्निरायुँष्मान्त्सवनस्पतिँभिरायुँष्मान्तेनत्वायुषायुँष्मन्तङ्करोमि ।

सोम आयुँष्मान्त्स ओषँधीभिरायुष्मान्तेनत्वायुषायुष्मँन्तङ्करोमि ।

यज्ञआयुँष्मान्त्स दक्षिँणाभिरायुँष्मान्तेनत्वायुषायुँष्मन्तङ्करोमि ।

ब्रह्मायुँष्मत्तद्ब्राह्मणैरायुँष्मत्तेनत्वायुषायुँष्मन्तङ्करोमि ।
देवा आयुँष्मन्तस्तेँमृतेनायुँष्मन्तस्तेनत्वायुषायुँष्मन्तङ्करोमि ॥

रक्षाबन्धन तन्तुमादाय कुमारस्य दक्षिणहस्ते बध्नीयात् ।
यदि कुमार्याः सव्यहस्ते-कुमारस्य अन्नप्राशने कुमार्याः सर्वेषु संस्कारेषु च बृहत्सामेति बध्नीयात् ।कुमारस्य चौळादिषु विश्वेत्ताति इत्यृचा बध्नीयात् ।

बृहत्सामँ क्षत्रभृद्वृद्धवँष्णियन्त्रिष्टुभौजँश्शुभितमुग्रवीँरम् ।
इन्द्रस्तोमेँन पञ्चदशेन मध्यँमिदं वातेँन सगँरेण रक्ष ॥

विश्वेत्ताते सवँनेषु प्रवाच्या या चकर्थँ मघवन्निन्द्रसुन्वते ।
पारावतं यत्पुँरुसम्भृतं वँस्वपावँणोच्छरभाय ऋषिँबन्धवे ॥

ब्राह्मणाः आयुष्यसूक्तं पठेयुः-
यो ब्रह्मा ब्रह्मण उज्जहार प्राणैश्शिरः कृत्तिवासाः पिनाकी ।
ईशानो देवस्सन आयुर्ददाति तस्मै जुहोमि हविषा घृतेन स्वाहा ॥
विभ्राजमानस्सरिरस्य मध्याद्रोचमानो घर्मरुचिर्य आगात् ।
स मृत्युपाशादपनुद्य घोरादिहायुषेणो घृतमत्तु देवस्स्वाहा ॥
ब्रह्मज्योतिर्ब्रह्मपत्नीषु गर्भं यमादधात्पुरुरूपञ्जयन्तम् ।
सुवर्णरम्भग्रहमर्कमर्च्यन्तमायुषे वर्धयामो घृतेन स्वाहा ॥
श्रियं लक्ष्मीमौबलामम्बिकाङ्गां लक्ष्मीञ्चयामिन्द्रसेनेत्युदाहुः ।
तां विद्यां ब्रह्मयोनिꣳ सरूपामिहायुषे तर्पयामो घृतेनस्वाहा ॥
दाक्षायण्यस्सर्वयोन्यस्सुयोन्यस्सहस्रशो विश्वरूपा विरूपाः ।
ससूनवस्सपतयस्सयूथ्य आयुषेणो घृतमिदञ्जुषन्ताम् स्वाहा ॥
दिव्या गणा बहुरूपाः पुराणा आयुश्छिदो नः प्रमथ्नन्तु वीरान् ।
तेभ्यो जुहोमि बहुधा घृतेन मानः प्रजाꣳरीरिषो मोत वीरान्स्वाहा ॥
एकः पुरस्ताद्य इदम्बभूव यतो बभूव भुवनस्यगोपाः ।

यमप्येति भुवनꣳसाम्पराये सनो हविर्घृतमिहायुषेत्तु देवस्वाहा ॥
वसून् रुद्रानादित्यान्मरुतोत साध्यानृभून्यक्षान्गन्धर्वाꣳश्च
पितॄꣳश्च विश्वान् ।भृगून्त्सर्पाꣳश्चाङ्गिरसोथ सर्वान् घृतꣳहुत्वा
स्वायुष्या महयाम शश्वत्स्वाहा ॥
विष्णोत्वन्नो अन्तमश्शर्मंयच्छसहन्त्य । प्रते धारॉ मधुश्चुत
उत्सॅन्दुहतेअक्षितम् ॥ अस्य मम कुमारस्य अथवा अस्याः मम कुमार्याः
रक्षाबन्धनमुहूर्तस्सुमुहूर्तोस्त्विति भवन्तो महान्तोऽनुगृह्णन्तु ॥
सुमुहूर्तोऽस्तु ॥

पाहित्रयोदशहोमः

दर्भेष्वासीनः दर्भान्धारयमाणः
शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
ओंभूः - भूर्भुवस्सुवरों ममोपात्त समस्तदुरित क्षयद्वारा
श्रीपरमेश्वरप्रीत्यर्थम् अद्य पूर्वोक्त एवंगुण विशेषण विशिष्टायां अस्यां
--शुभतिथौ --नक्षत्रे--राशौ जातस्य--शर्मणः अस्य मम कुमारस्य-
-- कर्मणः मुख्यकालातिपत्ति प्रायश्चित्तार्थं पाहित्रयोदश
होमङ्करिष्ये ॥ प्राजापत्यकृच्छ्र प्रत्याम्नायं यत्किञ्चित् हिरण्यदानञ्च
करिष्ये ॥
तिस्रस्तिस्रो रेखा लिखित्वा-अद्भिरवोक्ष्य-शकलमाग्नेय्याग्निरस्य-
अपउपस्पृश्य- भूर्भुवस्सुवरोम्-इत्यग्निं प्रतिष्ठाप्य
चत्वारि शृङ्गात्रयों अस्यपादा द्वे शीर्षे सप्तहस्तॉसो अस्य ।
त्रिधॉ बद्धो वृॅषभो रौॅरवीति महोदेवो मर्त्याꣳआविवेश ॥
सप्तहस्तश्चतुश्शृङ्गः सप्तजिह्वो द्विशीर्षकः ।

त्रिपात्प्रसन्नवदनः सुखासीनश्शुचिस्मितः ॥
स्वाहान्तु दक्षिणे पार्श्वेदेवीं वामे स्वधान्तथा ।
बिभ्रद्दक्षिणहस्तैस्तु शक्तिमन्नं स्रुचं स्रुवम् ॥
तोमरं व्यजनं वामे घृतपात्रन्तु दक्षिणे ।
मेषारूढं जटाबद्धं गौरवर्णं महौजसम् ॥
धूमध्वजं लोहिताक्षं सप्तार्चिस्सर्वकामदम् ।
आत्माभिमुखमासीनं एवं ध्यायेत् हुताशनम् ॥

एषहि देवः प्रदिशोऽनु सर्वाः पूर्वो हि जातस्स उ गर्भे अन्तः ।
सविजायॅमानस्स जनिष्यमॉणः प्रत्यङ्मुखास्तिष्ठति विश्वतोॅमुखः ॥

एह्यग्ने प्राङ्मुखदेव अग्ने मम अभिमुखो भव ।सुमुखो भव ।सुप्रसन्नो भव ।वरदो भव । यथोक्तजिह्वया हविर्गृहाण-इति अक्षतोदकं अग्नेः पुरस्तान्निनीय- भूर्भुवस्सुवॅः तत्सॅवितुर्वरेण्यं- भर्गो देवस्यॅ धीमहि -धियो यो नॅः प्रचोदयात्-इति प्रति दिशं हस्तेन परिमृज्य अलंकृत्य-

अग्नये नमः । हुतवहाय नमः ।हुताशनाय नमः । कृष्णवर्त्मने नमः । देवमुखाय नमः ।सप्तजिह्वाय नमः । वैश्वानराय नमः ।जातवेदसे नमः ।मध्ये श्री यज्ञपुरुषाय नमः ॥

प्रागादि दर्भैरग्निंपरिस्तृणाति । पुरस्तात् ।दक्षिणतः ।पश्चात् ।उत्तरतः । दक्षिणानुत्तरान् करोति उत्तरानधरान् ॥उत्तरेणाग्निं दर्भान्त्सꣳस्तीर्य द्वन्द्वं न्यञ्चिपात्राणि प्रयुनक्ति । दर्व्याऽऽज्य स्थाल्यौ प्रोक्षणस्स्रुवाविति ।समौ साग्रौ दर्भौ प्रादेशमात्रौ पवित्रे कृत्वा तृणं काष्ठं वा अन्तर्धाय छिनत्ति न नखेन ।अद्भिरनुमृज्य ।सपवित्रेण पाणिना पात्राणि सम्मृश्य प्रोक्षणी पात्रमादाय अक्षतैस्सह अप आसिच्य प्राचीस्त्रिरुत्पूय पात्राण्युत्तानानि कृत्वा पात्राणि त्रिःप्रोक्ष्य प्रोक्षणीशेषं दक्षिणतो निधाय आज्यस्थालीमादाय आज्यं विलाप्य उदीचोऽङ्गारान्निरूह्य तेष्वाज्यमधिश्रित्य ज्वलतातृणेन अधोगामिन्या दीप्त्या आज्ये प्रतिफलीकृत्य द्वे दर्भाग्रे प्रच्छिद्य प्रक्षाळ्य प्रत्यस्य आज्ये प्रास्य त्रिः

पर्य्याग्निकृत्वा उदगुद्वास्य अङ्गारान्प्रत्यूह्य उदगग्राभ्यां पवित्राभ्यां पुनराहारमाज्यं त्रिरुत्पूय पवित्रग्रन्थिं विस्रस्य अपउपस्पृश्य प्रागग्रमन्ना
प्रहरति ।येन जुहोति तदग्नौ प्रतितप्य दर्भाग्रैससम्मृज्य पुनः प्रतितप्य प्रोक्ष्य निधाय दर्भानद्भिस्सꣳस्पर्श्य अग्नौ प्रहरति ।अथाग्निं परिषिञ्चति-

अदितेऽनुॅमन्यस्व -दक्षिणतःप्राचीनम् ।

अनुॅमतेऽनुॅमन्यस्व-पश्चादुदीचीनम् ।

सरॅस्वतेऽनुॅमन्यस्व-उत्तरतः प्राचीनम् ।

देवॅसवितः प्रसुॅव-समन्तम् ।स्रुवेणाज्यं गृहीत्वा -

ओंभूर्भुवस्सुवस्स्वाहा- प्रजापतय इदं नमम ॥

ततश्चतुर्गृहीतानि जुहोति-

पुनॅरूर्जा निवॅर्तस्व पुनॅरग्न इषायुॅषा । पुनॅर्नःपाहि विश्वतःस्वाहा -

अग्नय इदं न मम ॥

सह रय्या निवॅर्तस्वाग्ने पिन्वॅस्वधारॅया ।विश्वप्स्निया विश्वतस्परि

स्वाहा- अग्नय इदंनमम ॥

भूरग्नयॅे च पृथिव्यै चॅ महते च स्वाहा-अग्नयेपृथिव्यैमहत इदं नमम ॥

भुवॉ वायवॅे चान्तरिॅक्षाय च महते च स्वाहा-

वायवेऽन्तरिक्षाय महत इदं न मम ॥

सुवॅरादित्यायॅ च दिवे चॅ महते चस्वाहा- आदित्याय दिवे

महत इदं न मम ॥

भूर्भुवस्सुवॅश्चन्द्रमॅसेचनक्षॅत्रेभ्यश्चदिग्भ्यश्चॅमहतेच स्वाहा-

चन्द्रमसेनक्षत्रेभ्योदिग्भ्यो महतइदंनमम ॥

पाहि नोअग्न एनॅसे स्वाहा-अग्नय इदं न मम ॥

पाहिनोविश्ववेदॅसे स्वाहा-विश्ववेदसइदंनमम ॥

यज्ञं पाहि विभावॅसोस्वाहा-विभावसवइदंन मम ॥

सर्व पाहि शतक्रॅतो स्वाहा-शतक्रतवइदंन मम ॥

पाहि नॊ अग्न एकॅया ।पाह्युॅत द्वितीयॅया ।पाह्यूर्जॅन्तृतीयॅया ।

पाहि गीर्भिश्चॅतसृभिॅर्वसास्वाहा-वसव इदंन मम ॥

पुनॅरूर्जा निवॅर्तस्व पुनॅरग्न इषायॅुषा । पुनॅर्नः पाहि विश्वत

स्स्वाहा-अग्नय इदं न मम ॥

सह रय्या निवॅर्तस्वाग्ने पिन्वॅस्वधारॅया । विश्वप्ॅस्निॅयाविश्वत

स्परि स्वाहा- अग्नय इदंनमम ॥

अस्मिन्पाहित्रयोदशहोमकर्मणिमध्येसम्भावित समस्तदोष
प्रायश्चित्तार्थं सर्वप्रायश्चित्तं होष्यामि-

ओंभूर्भुवस्सुवस्स्वाहा ।प्रजापतयइदंन मम ॥

द्वादशगृहीतेन स्रुचम्पूरयित्वा-

सप्त तॅं अग्नेसमिधॅस्सप्तजिह्वास्सप्तऋषॅयस्सप्तधामॅ प्रियाणिॅं ।

सप्त होत्रास्सप्तधात्वॅा यजन्ति सप्तयोनीरापॅृणस्वा घृतेन स्वाहा-

अग्नये सप्तवत इदं न मम ॥आज्यपात्रमुत्तरतो निधाय प्रायश्चित्तम् द्वादश

कृष्णस्मरणम् प्राणायामः ॥ परिषेचनम्

अदितेऽन्वँमꣳस्थाः ।अनुँमतेऽन्वँमꣳस्थाः ।सरँस्व
तेऽन्वँमꣳस्थाः ।देवँसवितः प्रासॉवीः ॥

अनेन पाहित्रयोदशहोमेन भगवान् सर्वात्मकः यज्ञेश्वरः प्रीणातु ॥कृच्छ्रदक्षिणां गृहीत्वा-
हिरण्यगर्भ गर्भस्थं हेमबीजंविभावसोः ।
अनन्तपुण्यफलदं अतश्शान्तिंप्रयच्छ मे ॥
--नक्षत्रे--राशौ जातस्य--शर्मणः अस्य मम कुमारस्य अथवा नक्षत्रे--राशौ--जातायाः अस्याःमम कुमार्याः--जातकर्म कर्मणःमुख्यकालातिपत्ति प्रायश्चित्तार्थंप्रजापत्य कृच्छ्रप्रत्याम्नायं यत्किञ्चित् हिरण्यं यज्ञेश्वरप्रीतिं कामयमानः यज्ञेश्वरस्वरूपाय ब्राह्मणाय सम्प्रददे नमः नमम ॥ओंतत्सत् ॥

जातकर्म

सङ्कल्पः-दर्भेष्वासीनः दर्भान्धारयमाणः
शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
ओंभूः - भूर्भुवस्सुवरों ममोपात्त समस्तदुरित क्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थम् अद्य पूर्वोक्त एवंगुण विशेषण विशिष्टायां अस्यां --शुभतिथौ --नक्षत्रे--राशौ जातस्य--शर्मणः अस्य मम कुमारस्य अथवा नक्षत्रे--राशौ--जातायाः अस्याःमम कुमार्याःगर्भाम्बुपानजनितसकलदोषनिबर्हणद्वारा आयुर्वर्चो यशोबलाभिवृध्यर्थं नक्षत्रे--राशौ--जातं मम कुमारं जातकर्म कर्मणा संस्करिष्यामि ॥द्विः ॥
अस्य मम कुमारस्य अथवा नक्षत्रे--राशौ--जातायाः अस्याःमम

कुमार्याःजातकर्ममुहूर्तलग्नापेक्षया आदित्यानां नवानां ग्रहाणां आनुकूल्यसिद्ध्यर्थम् यत्किञ्चित् हिरण्यदानञ्च करिष्ये ॥

उत्तरतो दर्भान्निरस्य अपउपस्पृश्य-

हिरण्यगर्भ गर्भस्थं हेमबीजंविभावसोः।
अनन्तपुण्यफलदं अतश्शान्तिंप्रयच्छ मे ॥

--नक्षत्रे--राशौ जातस्य--शर्मणः अस्य मम कुमारस्य ॥ अथवा नक्षत्रे--राशौ--जातायाः अस्याःमम कुमार्याःजातकर्ममुहूर्तलग्नापेक्षया आदित्यानां नवानां ग्रहाणां आनुकूल्यसिद्ध्यर्थम् यत्किञ्चित् हिरण्यं आदित्यादि नवग्रहदेवतास्वरूपेभ्यो नानागोत्रेभ्यो ब्राह्मणेभ्यस्तेभ्य स्तेभ्यस्सम्प्रददे नमः न मम ॥ओं तत्सत्॥

जातं कुमारं वात्सप्रेणाभिमृश्य-

दिवस्परिं प्रथमञ्जॅज्ञे अग्निरस्मद्द्वितीयं परिंजातवेंदाः।
तृतीयॅमप्सु नृमणा अजॅस्त्रमिन्धॉन एनञ्जरते स्वाधीः॥
विद्मा तें अग्ने त्रेधा त्रयाणिं विद्मा ते सद्म विभृॅतं पुरुत्रा।
विद्मा ते नामॅ परमङ्गुहायद्विद्मा तमुत्सं यतॅ आजघन्थॅ॥
समुद्रेत्वॉ नृमणॉ अप्स्वॅन्तर्नृचक्षॉ ईधे दिवो अॅग्न ऊधन्।
तृतीये त्वा रजॅसि तस्थिवाꣳसॅमृतस्य योनौं महिषा
अॅहिन्वन्॥

अक्रॅन्ददग्निस्तनयॅन्निव द्यौः क्षामा रेरिंहद्वीरुधॅस्समञ्जन्।
सद्यो जॅज्ञानो विहीमिद्धो अख्यदारोदॅसी भानुनॉ भात्यन्तः॥
उशिक्पॉवको अॅरतिस्सुॅमेधा मर्तेष्वग्निरमृतो निधॉयि।
इयॅर्तिधूममॅरुषं भरिंभ्रदुच्छुक्रेणॅ शोचिषा द्यामिनॅक्षत्॥

विश्वँस्य केतुर्भुवँनस्य गर्भ आरोदँसी अपृणाज्जायँमानः ।
वीडुञ्चिदद्रिमभिनत्परायञ्जनायदग्निमयँजन्त पञ्च ॥
श्रीणामुँदारो धरुणौँ रयीणां मँनीषाणां प्रार्पणस्सोमँगोपाः ।
वसोस्सूनुस्सहँसो अप्सु राजा विभात्यग्रँ उषसाँमिधानः ॥
यस्तेँ अद्य कृणवँद्भद्रशोचेऽपूपन्दँव घृतवँन्तमग्ने ।
प्रतन्नँय प्रतरां वस्यो अच्छाभिद्युम्नं देवभँक्तं यविष्ठ ॥
आतम्भँज सौश्रवसेष्वँग्न उक्थ उँक्थ आभँज शस्यमाँने ।
प्रियस्सूर्यँ प्रियो अग्ना भँवात्युज्जातेनँ भिनददुज्जनित्वैः ॥
त्वामँग्ने यजँमाना अनुद्यून् विश्वावसूँनि दधिरे वार्याँणि ।
त्वयाँ सह द्रविँणमिच्छमाँना व्रजङ्गोमँन्तमुशिजो विवँव्रुः ॥
दृशानो रुक्म उर्व्या व्यँद्यौद्दुर्मर्षमायुँश्श्रिये रुँचानः ।
अग्निरमृतौँ अभवद्वयोँभिर्यदैँनन्द्यौरजँनयत्सुरेताः ॥

अस्मिन्नहमिति यजुषा उपस्थ आधाय-

अस्मिन्नहꣳसहस्रँम्पुष्याम्येधँमानस्स्वे वशे ॥

अङ्गादङ्गादिति द्वाभ्यामभिमन्त्रणं मूर्धन्यवघ्राणं दक्षिणे कर्णे जापः । नक्षत्रनाम च निर्दिशति तद्रहस्यं भवति-

अङ्गाँदङ्गात्सम्भँवसि हृदँयादधिँ जायसे । आत्मा वै पुत्र
नामाँसि स जीँव शरदँश्शतम् ॥अश्मा भव परशुर्भँव हिरँण्य
मस्तृँतम्भव । पशूनान्त्वाँ हिङ्कारेणाभिजिँघ्रामि -- ॥त्रिः ॥

सम्बुद्ध्या नक्षत्रनामानि-आश्वयुज। आपभरण। कृत्तिक। रौहिण। मार्गशीर्ष। आर्द्रक। पुनर्वसो। तिष्य। आश्रेष। माघ। पूर्वफल्गुन। उत्तरफल्गुन। हस्त। चैत्र। स्वाते। विशाख। अनूराध। ज्यैष्ठ। मूलक। पूर्वाषाढ। उत्तराषाढ। श्रावण। श्रावण। श्रविष्ठ।शातभिषज। पूर्वप्रोष्ठपाद। उत्तरप्रोष्ठपाद। रैवत॥

मधुघृतमिति संसृज्य तस्मिन्दर्भेण हिरण्यन्निष्टक्यं बध्वा ऽवधाय मेधान्ते देवस्सवितेति चतुर्भिर्मन्त्रैः कुमारं सकृत्प्राशयित्वा-

मेधान्तें देवस्सॅविता मेधान्देवी सरॅस्वती। मेधान्तें अश्विनौं देवा वाधॅत्तां पुष्कॅरस्रजा॥त्वयिं मेधान्त्वयिं प्रजान्त्वय्यग्निस्तेजौं दधातु त्वयिंमेधान्त्वयिं प्रजान्त्वयीन्द्रॅइन्द्रियन्दॅधातु त्वयिं मेधान्त्वयिं प्रजान्त्वयि सूर्यौ भ्राजौं दधातु॥

क्षेत्रियैत्वेति पञ्चभिस्सकृत्स्नापयित्वा-

क्षेत्रियै त्वा निरृॅत्यै त्वा द्रुहो मुॅञ्चामि वरुॅणस्य पाशात्।
अनागसं ब्रह्मॅणेत्वा करोमि शिवेते द्यावॉपृथिवी उभे इमे॥
शन्तें अग्निस्सहाद्भिरॅस्तु शन्द्यावॉपृथिवी सहौषॅधीभिः।
शमन्तरिंक्षꣳसहवातेंन ते शन्ते चतॅस्रः प्रदिशौं भवन्तु॥
या दैवीश्चतॅस्रः प्रदिशो वातॅपत्नीरभि सूर्यौं विचष्टे।
तासान्त्वा जरस आदॅधामि प्रयक्ष्मॅ एतु निरृॅतिम्पराचैः॥
अमौंचि यक्ष्माद्दुरितादवॅर्त्यै द्रुहःपाशान्निरृॅत्यै चोदॅमोचि।
अहा अवॅर्तिमविंदत्स्योनमप्यॅभूद्भद्रे सुॅकृतस्यॅ लोके।

सूर्यँमृतन्तमँसो ग्राह्या यद्देवा अमुँञ्चन्नसृँजन्व्यँनसः ॥

एवमहमिमं क्षेत्रियाज्जाँमि शꣳसाद्बुहो मुँञ्चामि वरुँणस्य पाशात् ॥

दधि घृतमिति संसृज्य कांस्येन पृषदाज्यं व्याहृतीभिरोङ्कार चतुर्थीभिः कुमारं सकृत्प्राशयित्वा-

भूस्स्वाहा भुवस्स्वाहा सुवस्स्वाहोꣳस्वाहा ॥

अद्भिश्शेषं संसृज्य गोष्ठे निनयेत् ॥ माते कुमारमिति मातुरुस्थ आधाय-

मातेँ कुमारꣳरक्षोँऽवधीन्माधेनुरँत्यासारिणी ।प्रिया धनँस्य भूया एधमाना स्वे गृहे ॥-

अयं कुमारꣳ इति दक्षिणं स्तनं प्रतिधाप्य-अयं कुँमारो जरान्धँयतु दीर्घमायुँः । यस्मै त्वꣳस्तन प्रप्यायायुर्वर्चो यशो बलम् ॥

उत्तराभ्यां पृथिवीमभिमृश्य-

यद्भूमेरꣳहृदँयन्दिवि चन्द्रमँसि श्रितम् । तदुँर्विपश्यं माहं पौत्रमघाꣳरुदम् ॥ यत्तेँ सुसीमे हृदँयं वेदाहन्तत्प्रजापँतौ । वेदाँम तस्यँ ते वयं माहं पौँत्रमघाꣳरुदम् ॥

नामयतीति यजुषा संविष्टम्-

नामँयति नरुँदति यत्रँ वयं वँदामसि यत्रँचाभमँशामसि ॥

आपस्सुप्तेष्विति यजुषा शिरस्त उदकुम्भं निधाय-

आपँस्सुप्तेषुँ जाग्रत रक्षाꣳसि निरितो नुँदध्वम् ॥

शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
ओंभूः - भूर्भुवस्सुवरों ममोपात्त समस्तदुरित क्षयद्वारा

श्रीपरमेश्वरप्रीत्यर्थम् अद्य पूर्वोक्त एवंगुण विशेषण विशिष्टायां अस्यां --शुभतिथौ --नक्षत्रे--राशौ जातस्य--शर्मणः अस्य मम कुमारस्य अथवा नक्षत्रे--राशौ--जातायाः अस्याःमम कुमार्याः आयुष्याभिवृध्यर्थम् अनयोःबालसूतिकयोःचण्डालादि पिशाचेभ्यो रक्षणार्थम् फलीकरणहोमं करिष्ये ॥

तिस्रस्तिस्रो रेखा लिखित्वा-अद्भिरवोक्ष्य-शकलमाग्नेय्यान्निरस्य-अपउपस्पृश्य- भूर्भुवस्सुवरोम्-इत्यग्निं प्रतिष्ठाप्य

चत्वारि शृङ्गात्रयो अस्यपादा द्वे शीर्षे सप्तहस्तासो अस्य ।
त्रिधा बद्धो वृषभो रौरवीति महोदेवो मर्त्याꣳआविवेश ॥

सप्तहस्तश्चतुश्शृङ्गः सप्तजिह्वो द्विशीर्षकः ।
त्रिपात्प्रसन्नवदनः सुखासीनश्शुचिस्मितः ॥
स्वाहान्तु दक्षिणे पार्श्वेदेवीं वामे स्वधान्तथा ।
बिभ्रद्दक्षिणहस्तैस्तु शक्तिमन्नं स्रुचं स्रुवम् ॥
तोमरं व्यजनं वामे घृतपात्रन्तु दक्षिणे ।
मेषारूढं जटाबद्धं गौरवर्णं महौजसम् ॥
धूमध्वजं लोहिताक्षं सप्तार्चिस्सर्वकामदम् ।
आत्माभिमुखमासीनं एवं ध्यायेत् हुताशनम् ॥

एषहि देवः प्रदिशोऽनु सर्वाः पूर्वो हि जातस्स उ गर्भे अन्तः ।
सविजायमानस्स जनिष्यमाणः प्रत्यङ्मुखास्तिष्ठति विश्वतोमुखः ॥

एह्यग्ने प्राङ्मुखदेव अग्ने मम अभिमुखो भव ।सुमुखो भव ।सुप्रसन्नो भव ।वरदो भव । यथोक्तजिह्वया हविर्गृहाण-इति अक्षतोदकं अग्नेः पुरस्तान्निनीय-भूर्भुवस्सुवः तत्सवितुर्वरेण्यं- भर्गोदेवस्य धीमहि धिया यो नः प्रचोदयात्-इति प्रति दिशं हस्तेन परिमृज्य अलंकृत्य

अग्नये नमः । हुतवहाय नमः ।हुताशनाय नमः । कृष्णवर्त्मने नमः । देवमुखाय नमः ।सप्तजिह्वाय नमः । वैश्वानराय नमः ।जातवेदसे नमः ।मध्ये श्री यज्ञपुरुषाय नमः ॥

प्रागादि दर्भैरग्निंपरिस्तृणाति । पुरस्तात् ।दक्षिणतः ।पश्चात् ।उत्तरतः । दक्षिणानुत्तरान् करोति उत्तरानधरान् ॥अथाग्निं परिषिञ्चति-

अदितेऽनुँमन्यस्व ।अनुँमतेऽनुँमन्यस्व ।सरँस्वतेऽनुँमन्यस्व ।

देवँसवितः प्रसुँव ॥सर्षपान्फलीकरणमिश्रान् अञ्जलिना उत्तरैर्मन्त्रैःत्रिस्त्रिः प्रतिस्वाहाकारं जुहुयात्-

अयङ्कलिम्पतयँन्तश्श्वानमिवोद्वृद्धम् ।अजां वाशिँतामिव

मरुतः पर्याध्वश्स्वाहा-मरुद्भ्य इदन्न मम ।स्वाहा-मरुद्भ्य

इदन्न मम । स्वाहा-मरुद्भ्य इदन्न मम ॥

शण्डे रथश्शण्डिँकेर उलूखलः ।च्यवँनो नश्यँतादितस्स्वाहा-

मरुद्भ्य इदन्न मम । स्वाहा-मरुद्भ्य इदन्न मम ।स्वाहा-

मरुद्भ्य इदन्न मम ॥

अयश्शण्डो मर्कँ उपवीरँ उलूखलः ।च्यवँनो नश्यँतादित

स्स्वाहा-मरुद्भ्य इदन्न मम ।स्वाहा-मरुद्भ्य इदन्न मम ।

स्वाहा-मरुद्भ्य इदन्न मम ॥

केशिनीश्चलोमिनीःखजाँपाजोऽपँकाशिनीः ।

अपेँतनश्यँतादितस्स्वाहा-मरुद्भ्य इदन्न मम । स्वाहा-

मरुद्भ्य इदन्न मम ।स्वाहा-मरुद्भ्य इदन्न मम ॥

मिश्रवॉससः कौबेरका रॅक्षोराजेन प्रेषिताः ।ग्रामꣳ
सजॉनयो गच्छन्तीच्छन्तोऽपरिदाकृतान्थ्स्वाहा-मरुद्भ्य इदन्न
मम ।स्वाहा-मरुद्भ्य इदन्न मम ।स्वाहा-मरुद्भ्य इदन्न मम ॥

एतान्घॅनतैतान्गॄह्णीतेत्ययं ब्रह्मॅणस्पुत्रः । तानग्निः पर्यॅसरत्ता
निन्द्रस्तान्बृहस्पतिः ॥तानहं वॅेद ब्राह्मणः प्रॅमृशतःकॅूटदन्तान्
विंकेशान्लॅम्बनस्तनान्थ्स्वाहा-मरुद्भ्य इदन्न मम ।स्वाहा-
मरुद्भ्य इदन्न मम ।स्वाहा-मरुद्भ्य इदन्न मम ॥

नक्तञ्चारिणॅ उरस्पेशाञ्छॅूलहस्तान्कॅपालपान् ।पूर्वॅएषां
पितेत्युच्चैश्श्राव्यकर्णकॅः ।माताजॅघान्यॉसपॅति ग्रामॅं विधुर
मिच्छन्ती स्वाहा-मरुद्भ्य इदन्न मम ।स्वाहा-मरुद्भ्य इदन्न
मम ।स्वाहा-मरुद्भ्य इदन्न मम ॥

निशीथचारिणी स्वसॉ सन्धिना प्रेक्षॅते कुलम् । या स्वपॅन्तं
बोधयॅति यस्यै विजॉतायां मनॅः ॥तासान्त्वं कॄष्णवत्मॅने क्लो
मानꣳहृदॅयं यकॄत् ।अग्ने अक्षॅीणि निर्दहस्वाहा-मरुद्भ्य इदन्न
मम ।स्वाहा-मरुद्भ्य इदन्न मम ।स्वाहा-मरुद्भ्य इदन्नमम ॥उत्तर
परिषेचनम्

अदितेऽन्वॅमꣳस्थाः ।अनुॅमतेऽन्वॅमꣳस्थाः ।
सरॅस्वतेऽन्वॅमꣳस्थाः ।देवॅसवितः प्रासॉवीः ॥

प्रविष्टे प्रविष्ट एव तूष्णीमग्नावावपत-संशास्ति ॥

स्वाहा-अग्नेरुपस्थानङ्करिष्ये ।अग्ने त्वन्नो अन्तॅमः ।उतत्राता
शिवो भॅव वरूथ्यॅः । तन्त्वॉ शोचिष्ठदीदिवः ।सुम्नायॅ नूनमींमहे
सखिॅभ्यः ।वसुॅरग्निर्वसुॅश्रवाः । अच्छॉ नक्षिद्युमत्तॅमो रयिन्दाः ।
स्वस्तिश्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलम् ।
आयुष्यन्तेज आरोग्यन्देहिमेहव्यवाहन ॥
श्रियन्देहिमेहव्यवाहन ओं नम इति ॥
चतुस्सागरपर्यन्तं गोब्राह्मणेभ्यश्शुभं भवतु--आर्षेय प्रवरान्वित --
गोत्रः आपस्तम्बसूत्रः यजुश्शाखाध्यायी --शर्मा नामा अहं भो
अभिवादये ॥
अस्य मम कुमारस्य अथवा अस्याःमम कुमार्याः जातकर्म
मुहूर्तस्सुमूहूर्तोऽस्त्विति भवन्तो महान्तोऽनुगृह्णन्तु ॥ सुमुहूर्तोऽस्तु ॥

नामकरणम्

सङ्कल्पः-दर्भेष्वासीनः दर्भान्धारयमाणः
शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
ओंभूः - भूर्भुवस्सुवरों ममोपात्त समस्तदुरित क्षयद्वारा
श्रीपरमेश्वरप्रीत्यर्थम् अद्य पूर्वोक्त एवंगुण विशेषण विशिष्टायां अस्यां
--शुभतिथौ --नक्षत्रे--राशौ जातस्य--शर्मणः अस्य मम कुमारस्य
अथवा नक्षत्रे--राशौ--जातायाः अस्याःमम
कुमार्याःआयुष्याभिवृद्ध्यर्थम् सभासकलसत्पुरुषमध्ये
नामप्रकटनसिद्ध्यर्थम् लोके सद्व्यवहारार्थम् नाम धास्यावः ॥
--नक्षत्रे--राशौ जातं इमं मम कुमारं अथवा नक्षत्रे--राशौ--जातां
एनां कुमारीं मासनाम्ना नक्षत्रनाम्ना व्यावहारिकनाम्ना च
संस्करिष्यावहे ॥उत्तरतो दर्भान्निरस्य अपउपस्पृश्य-

हिरण्यगर्भ गर्भस्थं हेमबीजंविभावसोः।
अनन्तपुण्यफलदं अतश्शान्तिंप्रयच्छ मे॥
--नक्षत्रे--राशौ जातस्य--शर्मणः अस्य मम कुमारस्य अथवा नक्षत्रे--राशौ--जातायाः अस्याःमम कुमार्याःनामकरण मुहूर्तलग्नापेक्षया आदित्यानां नवानां ग्रहाणां आनुकूल्यसिद्ध्यर्थम् यत्किञ्चित् हिरण्यं आदित्यादि नवग्रहदेवतास्वरूपेभ्यो नानागोत्रेभ्यो ब्राह्मणेभ्यस्तेभ्य स्तेभ्यस्सम्प्रददे नमः न मम॥ओं तत्सत्॥

मासनाम श्लोकाः-

कृष्णोऽनन्तोऽच्युतश्चक्री वैकुण्ठोऽथ जनार्दनः।
उपेन्द्रो यज्ञपुरुषो वासुदेवस्तथा हरिः॥
गोविन्दःपुण्डरीकाक्षःमासनामान्यनुक्रमात्॥
मार्गशीर्षे चवाग्देवी पुष्ये पद्मावती तथा।
श्रीदेवीचापि सावित्री भूमिःकल्याणिका तथा॥
सत्यभामाप्लुण्यवती रूपिणीतीन्दुमत्यपि।
चन्द्रावतीच लक्ष्मीश्च स्त्रीनामकरणानि तु॥

कांस्यादिलोहपात्रे तण्डुलान्निधाय-स्वर्णेन उत्तरापवर्गं तिस्रो लेखा लिखित्वा-तासु मासनाम नक्षत्रनाम व्यवहार नाम च लिखित्वा

असुॅनीथे पुनॅरस्मासु चक्षुःपुनॅः प्राणमिह नो धेहि भोगम्।
ज्योक्पॅश्येम सूर्यमुच्चरन्तमनुॅमते मृळयानस्स्वस्ति॥
अमृतं वै प्राणा अमृतमापॅः प्राणानेव यॅथास्थानमुपॅह्वयते॥
स्थिरा भवत। वरदा भवत। सुप्रसन्ना भवत॥

नामत्रयदेवताभ्यो नमः ध्यायामि॥इत्यादि षोडशोपचार पूजां कुर्यात्॥अङ्गादङ्गादिति द्वाभ्यामभिमन्त्रणं मूर्धन्यवघ्राणम्। नाम च निर्दिशति तद्रहस्यं भवति-

अङ्गॉदङ्गात्सम्भॅवसि हृदॅयादधि जायसे । वेदो वै पुत्र नामॉसि स जीॅव शरदॅश्शतम् ॥अश्मॉ भव परशुर्भॅव हिरॅण्यमस्तॄॅतम्भव । पशू नान्त्वॉ हिङ्कारेॅणाभिर्जिघ्रामि --शर्मन् ॥द्विः ॥

मासनाम्ना--नामाऽसि ।दीर्घायुर्भव ॥नक्षत्रनाम्ना--नामाऽसि । दीर्घायुर्भव ॥व्यावहारिकनाम्ना---शर्माऽसि ।दीर्घायुर्भव ॥

दक्षिपे कर्णे अग्निरायुष्मानिति पञ्च मन्त्रान् जपेत्-

अग्निरायॅुष्मान्त्सवनस्पतिॅभिरायॅुष्मान्तेनत्वायुषायॅुष्मन्तङ्करोमि । सोम आयॅुष्मान्त्स ओषॅधीभिरायुष्मान्तेनत्वायुषायुष्मॅन्तङ्करोमि । यज्ञआयॅुष्मान्त्स दक्षिॅणाभिरायॅुष्मान्तेनत्वायुषायॅुष्मन्तङ्करोमि । ब्रह्मायॅुष्मत्तद्ब्राह्मणैरायॅुष्मत्तेनत्वायुषायॅुष्मन्तङ्करोमि । देवा आयॅुष्मन्तस्तेॅमृतेनायॅुष्मन्तस्तेनत्वायुषायॅुष्मन्तङ्करोमि ॥ अनेन नाम्ना वर्धस्व ॥अनेन नाम्ना अयं कुमारः देवान् ब्राह्मणान्नमस्करोतु ॥ सर्वे अक्षतारोपणं कुर्युः ॥

कुमार्याः नामत्रय पूजान्ते -सर्वस्मादात्मनस्सम्भॄॅताऽसि साजीॅव शरदॅश्शतम्-इति कुमारीमभिमन्त्रयते ॥

अस्य मम कुमारस्य अथवा अस्याःमम कुमार्याः नामकरण मुहूर्तस्सुमूहूर्तोऽस्त्विति भवन्तो महान्तोऽनुगृह्णन्तु ॥ सुमुहूर्तोऽस्तु ॥

अन्नप्राशनम्

सङ्कल्पः-दर्भेष्वासीनः दर्भान्धारयमाणः

शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

ओंभूः - भूर्भुवस्सुवरों ममोपात्त समस्तदुरित क्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थम् शुभे दिने -- अस्यां --शुभतिथौ --नक्षत्रे--राशौ जातस्य--शर्मणः अस्य मम कुमारस्य अथवा नक्षत्रे--राशौ--जातायाः अस्याःमम कुमार्याः मातृगर्भमलप्राशनैनो निबर्हणद्वारा अन्नाद्यब्रह्मवर्चसतेजइन्द्रियायुरभिवृध्यर्थम् --नक्षत्रे--राशौ जातं इमं मम कुमारं अथवा नक्षत्रे--राशौ--जातां एनां कुमारीं अन्नप्राशन कर्मणा संस्करिष्यामि ॥द्विः ॥

ग्रहप्रीतिकर हिरण्यदानं नान्दी कर्मणः पुण्याहं रक्षाबन्धनञ्च कृत्वा-नवतन्तुधारणं कारयेत् ॥मम कुमारस्य तूष्णीमाचमनाधिकारसिद्धयर्थं नवतन्तुधारणं कारयिष्ये ॥नवतन्तुदेवताभ्यो नमः ध्यायामि ॥ इत्यादि षोडशो पचार पूजां कुर्यात् ॥ नवों नवो भवति जायॅमानोह्नाङ्केतुरुषसॉमे त्यग्रे ।
भागन्देवेभ्यो विदॅधात्यायन्प्र चन्द्रमास्तिरति दीर्घमायुॅः ॥
नवतन्तुधारणमुहूर्तस्सुमुहूर्तोऽस्त्विति भवन्तो महान्तोऽनुगृह्णन्तु ॥ सुमुहूर्तोऽस्तु ॥तूष्णीमाचमनं कारयित्वा -जन्मनोऽधि षष्ठे मासि ब्राह्मणान्भोजयित्वाशिषो वाचयित्वा दधि मधु घृतमोदनमिति संसृज्य उत्तरैर्मन्त्रैः कुमारं भोजयेत्-

भूरपान्त्वौषॅधीनाꣳ रसं प्राशॅयामि शिवास्त आप ओषॅधयस्सन्त्व
नमीवास्त आप ओषॅधयस्सन्तु---शर्मन् ॥
भुवोपान्त्वौषॅधीनाꣳ रसं प्राशॅयामि शिवास्त आप ओषॅधयस्सन्त्व
नमीवास्त आप ओषॅधयस्सन्तु---शर्मन् ॥

सुवॅरपान्त्वौषॅधीनाꣳ रसं प्राशॅयामि शिवास्त आप ओषॅधयस्सन्त्व
नमीवास्त आप ओषॅधयस्सन्तु---शर्मन्॥
भूर्भुवस्सुवॅरपान्त्वौषॅधीनाꣳ रसं प्राशॅयामि शिवास्त आप ओषॅधय
स्सन्त्वनमीवास्त आप ओषॅधयस्सन्तु---शर्मन्॥पुनः
तूष्णीमाचमनं कारयेत्॥अस्य मम कुमारस्य अथवा अस्याःमम
कुमार्याः अन्नप्राशन मुहूर्तस्सुमूहूर्तोऽस्त्विति भवन्तो
महान्तोऽनुगृह्णन्तु॥ सुमुहूर्तोऽस्तु॥

चौळम्

गणपतिपूजनं स्वस्तिपुण्याहवाचनं ग्रहप्रीतिकर हिरण्यदानं नान्दी कर्मणः पुण्याहं अङ्कुरारोपणं बृहत्सामेति रक्षाबन्धनं नवतन्तु धारणञ्च कारयित्वा-सङ्कल्पः-दर्भेष्वासीनः दर्भान्धारयमाणः
शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
ओंभूः - भूर्भुवस्सुवरों ममोपात्त समस्तदुरित क्षयद्वारा श्रीपरमेश्वर प्रीत्यर्थम् शुभे दिने -- अस्यां --शुभतिथौ --नक्षत्रे--राशौ जातस्य--शर्मणः अस्य मम कुमारस्य आयुष्याभिवृद्ध्यर्थम्--नक्षत्रे--राशौ जातं--शर्माणं इमं मम कुमारं चौळकर्मणा संस्करिष्यामि॥द्विः॥
मात्रा सह कुमारं भोजयित्वा-जन्मनोऽधि तृतीये वर्षे चौळं पुनर्वस्वोः।
तिस्रस्तिस्रो रेखा लिखित्वा-अद्भिरवोक्ष्य-शकलमाग्नेय्यान्निरस्य-अपउपस्पृश्य-भूर्भुवस्सुवरोम्- इत्यग्निं प्रतिष्ठाप्य
चत्वारि शृङ्गात्रयों अस्यपादा द्वे शीर्षे सप्तहस्तॉसो अस्य।
त्रिधॉबद्धो वृषभो रौरवीति महोदेवो मर्त्याꣳआविवेश॥

सप्तहस्तश्चतुश्शृङ्गः सप्तजिह्वो द्विशीर्षकः ।
त्रिपात्प्रसन्नवदनः सुखासीनश्शुचिस्मितः ॥
स्वाहान्तु दक्षिणे पार्श्वेदेवीं वामे स्वधान्तथा ।
बिभ्रद्दक्षिणहस्तैस्तु शक्तिमन्नं स्रुचं स्रुवम् ॥
तोमरं व्यजनं वामे घृतपात्रन्तु दक्षिणे ।
मेषारूढं जटाबद्धं गौरवर्णं महौजसम् ॥
धूमध्वजं लोहिताक्षं सप्तार्चिस्सर्वकामदम् ।
आत्माभिमुखमासीनं एवं ध्यायेत् हुताशनम् ॥

एषहि देवः प्रदिशोऽनु सर्वाः पूर्वो हि जातस्स उ गर्भे अ न्तः ।

सविजायमानस्स जनिष्यमाणः प्रत्यङ्·मुखास्तिष्ठति विश्वतोमुखः ॥

एह्यग्ने प्राङ्मुखदेव अग्ने मम अभिमुखो भव । सुमुखो भव । सुप्रसन्नो भव ।वरदो भव । यथोक्तजिह्वया हविर्गृहाण-इति अक्षतोदकं अग्नेः पुरस्तान्निनीय-

भूर्भुवस्सुवः तत्सवितुर्वरेण्यं- भर्गोदेवस्य धीमहि- धियो यो नः प्रचोदयात्- इति प्रति दिशं हस्तेन परिमृज्य अलंकृत्य

अग्नये नमः । हुतवहाय नमः ।हुताशनाय नमः । कृष्णवर्त्मने नमः । देवमुखाय नमः ।सप्तजिह्वाय नमः । वैश्वानराय नमः ।जातवेदसे नमः ।मध्ये श्री यज्ञपुरुषाय नमः ॥

प्रागादि दर्भैरग्निंपरिस्तृणाति । पुरस्तात् ।दक्षिणतः ।पश्चात् ।उत्तरतः । दक्षिणानुत्तरान् करोति उत्तरानधरान् ॥उत्तरेणाग्निं दर्भान्त्सꣳस्तीर्य द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्ति । दर्व्याऽऽज्य स्थाल्यौ प्रोक्षणीप्रणीत्यौ इध्मस्स्रुवाविति । जलद्वयं कुशान् यवान् शलालु दर्भपुञ्जीलान् शकृत् शलली असिदमिति सहैव सादयित्वा । समौ साग्रौ दर्भौ प्रादेशमात्रौ पवित्रे कृत्वा तृणं काष्ठं वा अन्तर्धाय छिनत्ति न नखेन ।अद्भिरनुमृज्य ।सपवित्रेण पाणिना पात्राणि सम्मृश्य प्रोक्षणी

पात्रमादाय अक्षतैस्सह अप आसिच्य प्राचीस्त्रिरुत्पूय मुखसममुद्धृत्य उत्तरेणाग्निं पुनरास्तीर्णेषु दर्भेषु सादयित्वा दर्भैः प्रच्छाद्य वरुणाय नमः सकलाराधनैस्समर्चितम् ॥ब्राह्मणं दक्षिणतो दर्भेषु निषाद्य

अस्मिन् अस्य मम कुमारस्य चौळहोमकर्मणि ब्राह्मणस्य इदमासनम् सकलाराधनैस्समर्चितम् ॥

आज्यस्थालीमादाय आज्यं विलाप्य उदीचोऽङ्गारान्निरूह्य तेष्वाज्यमधिश्रित्य ज्वलतातृणेन अधोगामिन्यादीप्त्या आज्ये प्रतिफलीकृत्य द्वे दर्भाग्रे प्रच्छिद्य प्रक्षाळ्य प्रत्यस्य आज्ये प्रास्य त्रिः पर्यग्निकृत्वा उदगुद्वास्य अङ्गारान्प्रत्यूह्य उदगग्राभ्यां पवित्राभ्यां पुनराहारमाज्यं त्रिरुत्पूय पवित्रग्रन्थिं विस्रस्य अपउपस्पृश्य प्रागग्रमग्नौ प्रहरति ।येन जुहोति तदग्नौ प्रतितप्य दर्भाग्रैऽसम्मृज्य पुनः प्रतितप्य प्रोक्ष्य निधाय दर्भानद्विस्सꣳस्पर्श्य अग्नौ प्रहरति ॥परिधीन्परिदधाति स्थविष्ठं पश्चात् अणीयान् द्राघीयान्दक्षिणार्ध्यः अणिष्ठो ह्सिष्ठ उत्तरार्ध्यः ॥मध्यमं परिधिं हस्तेनोपस्पृश्य ऊर्ध्वे आधारसमिधौ दक्षिणमुत्तरमादधाति ॥ अथाग्निं परिषिञ्चति-

अदितेऽनुॅमन्यस्व-दक्षिणतः प्राचीनम् ।

अनुॅमतेऽनुॅमन्यस्व-पश्चादुदीचीनम् ।

सरॅस्वतेऽनुॅमन्यस्व- उत्तरतः प्राचीनम् ।

देवॅसवितः प्रसुॅव-समन्तम् ॥ इध्ममाज्येनाभ्यज्य अनूयाजसमिधमवशेष्य इध्ममलंकृत्य ब्रह्माणमलंकृत्य स्वयमलंकुर्यात्

चत्वारि शृङ्गात्रयो अस्यपादा द्वे शीर्षे सप्तहस्तॉसो अस्य ।

त्रिधॉबद्धो वृॅषभो रौॅरवीति महोदेवो मर्त्याꣳआविवेश ॥

भूर्भुवस्सुवरोम्

अस्मिन् अस्य मम कुमारस्य चौळहोमकर्मणि ब्राह्मण इध्ममाधास्ये । ओंआधत्स्व ॥ब्रह्मार्पणम् ॥ इतरदर्व्या जुहोति

वायव्यादाग्नेयान्तं प्रजापतिं मनसा ध्यायन् तूष्णीमाघारावाघारयति-

स्वाहा-प्रजापतय इदं नमम ।प्रधानदर्व्या जुहोति निरृत्या ईशानान्तं -

स्वाहा-इन्द्रायेदं न मम ॥ चतुर्गृहीतं गृहीत्वा उत्तरार्धेऽग्नये जुहोति

अग्नये स्वाहा- अग्नय इदं नमम ॥पुनश्चतुर्गृहीतं गृहीत्वा दक्षिणार्धे सोमाय-

सोमॉय स्वाहा- सोमाय इदं नमम ॥ सङ्कल्पप्रभृति एतत्क्षणपर्यन्तं

मध्ये सम्भावितसमस्तविध्यपराधप्रायश्चित्तार्थं सर्वप्रायश्चित्तं होष्यामि-

ओं भूर्भुवस्सुवस्स्वाहा ।प्रजापतय इदं न मम ॥

अन्वारब्धे कुमारे चतुर्गृहीतानि जुहोति-

धाता दॅदातु नो रयिमीशॉनो जगॅतस्पतिः । सनॅः पूर्णेनॅ

वावनत्स्वाहा-धात्र इदन्न मम ॥

धाता प्रजायॉ उत राय ईंशे धातेदं विश्वं भुवॅनञ्जजान ।धाता पुत्रं

यजॅमानाय दाता तस्मॉ उ हव्यं घृतवॅद्विधेम स्वाहा- धात्र इदन्न मम ॥

धाता दॅदातु नो रयिंप्राचीञ्जीवातुमक्षिंताम् ।वयन्देवस्यॅ धीमहि

सुमतिꣳसत्यरॉधसस्स्वाहा-धात्र इदन्न मम ॥

धाता दॅदातु दाशुषे वसूॅनि प्रजाकॉमाय मीढुषॅ दुरोणे । तस्मैं देवा अमृता

स्संव्यॅयन्तां विश्वेदेवासो अदितिस्सजोषास्स्वाहा-धात्र इदन्न मम ॥

यस्त्वॉ हृदा कीरिणामन्यॅ मानोमॅर्त्यममर्त्योजोहॅवीमि ।जातॅवेदो यशॉ

अस्मासुॅ धेहि प्रजाभिॅरग्ने अमृत त्वमॅश्याꣳस्वाहा-

अग्नये पुत्रवत इदन्न मम ॥

यस्मै त्वꣳ सुकृतै जातवेद उ लोकमग्ने कृणवस्योनम्।अश्विनꣳसपु
त्रिणँ वीरवन्तं गोमन्तꣳ रयिन्नशते स्वस्ति स्वाहा-
अग्नये पुत्रवत इदन्न मम ॥

त्वे सुपुत्रशवसोऽवृत्रन्कामकातयः ।नत्वामिन्द्रातिरिच्यतेस्वाहा-
इन्द्रायपुत्रिण इदन्न मम ॥

उक्थ उक्थे सोम इन्द्रम्ममाद नीथे नीथे मघवानꣳसुतासः । यदीꣳसबाधः
पितरन्नपुत्रास्समानदक्षा अवसे हवन्ते स्वाहा- इन्द्रायपुत्रिण इदन्न मम ॥

अनूयाजसमिधमग्नौ प्रहरति-स्वाहा-अग्नय इदन्न मम ॥
इध्मसन्नहनरज्जुमग्नौ प्रहरति-स्वाहा-रुद्राय तन्तिचराय इदन्न मम ॥

एतत्कर्मसमृद्ध्यर्थं ऋद्धिकामः जयादिहोमङ्करिष्ये ।

चित्तञ्च स्वाहा-चित्तायेदन्न मम ॥चित्तिश्च स्वाहा-चित्या इदन्न मम ॥
आकूतञ्च स्वाहा-आकूतायेदन्न मम ॥आकूतिश्च स्वाहा-
आकूत्या इदन्न मम ॥विज्ञातञ्च स्वाहा-विज्ञातायेदन्न मम ॥
विज्ञानञ्च स्वाहा-विज्ञानायेदन्न मम ॥मनश्च स्वाहा-मनस
इदन्न मम ॥शक्वरीश्च स्वाहा-शक्वरीभ्य इदन्न मम ॥दर्शश्च
स्वाहा-दर्शायेदन्न मम ॥पूर्णमासश्च स्वाहा-पूर्णमासायेदन्न
मम ॥ बृहच्च स्वाहा-बृहत इदन्न मम ॥रथन्तरञ्च स्वाहा-
रथन्तरायेदन्न मम ॥प्रजापतिर्जयानिन्द्रायवृष्णे प्रायच्छदुग्रः
पृतनाज्येषु तस्मैविशस्समनमन्त सर्वास्स उग्रस्सहि हव्यो

बभूव स्वाहा-प्रजापतय इदन्न मम ॥

अग्निर्भूतानामधिपतिस्समॉवत्वस्मिन्ब्रह्मॅन्नस्मिन्क्षत्रेस्यामाशि

ष्यस्यांपुॅरोधायॉ मस्मिन्कर्मॅन्नस्यान्देवहूत्या ः स्वाहा-

अग्नये भूतानामधिपतयइदन्न मम ॥

इन्द्रोज्येष्ठानामधिॅपतिस्समॉवत्वस्मिन्ब्रह्मॅन्नस्मिन्क्षत्रेस्यामा

शिष्यस्यांपुॅरोधायॅामस्मिन्कर्मॅन्नस्यान्देवहूत्या ः स्वाहा-

इन्द्राय ज्यष्ठानामधिपतय इदन्न मम ॥

यमःपृॅथिव्या अधिॅपतिस्समॉवत्वस्मिन्ब्रह्मॅन्नस्मिन्क्षत्रेस्यामा

शिष्यांपुॅरोधायॅामस्मिन्कर्मॅ न्नस्यान्देवहूत्या ः स्वाहा-

यमाय पृथिव्या अधिपतय इदन्न मम ॥

वायुरन्तरिॅक्षस्याधिॅपतिस्समॉव त्वस्मिन्ब्रह्मॅन्नस्मिन्क्षत्रेस्यामा

शिष्यस्यांपुॅरोधायॅामस्मिन्कर्मॅन्नस्यान्देवहूत्या ः स्वाहा-

वायवेअन्तरिक्षस्याधिपतयइदन्नमम ॥

सूर्योॅदिवोधिॅपतिस्समॉवत्वस्मिन्ब्रह्मॅन्नस्मिन्क्षत्रेस्यामा

शिष्यस्यांपुॅरोधायॅामस्मिन्कर्मॅन्नस्यान्देवहूत्या ः स्वाहा-

सूर्याय दिवोधिपतय इदन्न मम ॥

चन्द्रमानक्षॅत्राणामधिॅपतिस्समॉवत्वस्मिन्ब्रह्मॅन्नस्मिन्क्षत्रस्यामा

शिष्यस्यां पुॅरोधायॅामस्मिन्कर्मॅन्नस्यान्देव हूत्या ः स्वाहा-

चन्द्रमसेनक्षत्राणामधिपतयइदन्न मम ॥

बृहस्पतिर्ब्रह्मणोधिँपति स्समॉवत्वस्मिन्ब्रह्मॅन्नस्मिन्क्षत्रेस्यामा

शिष्यस्यांपुँरोधायॅामस्मिन्कर्मॅन्नस्यान्देवहूत्या ः स्वाहा-

बृहस्पतयेब्रह्मणोधिपतय इदन्न मम ॥

मित्रस्सत्यानामधिँपतिस्समॉवत्वस्मिन्ब्रह्मॅन्नस्मिन्क्षत्रस्या

माशिष्य स्यांपुँरोधायॅामस्मिन्कर्मॅन्नस्यान्देव हूत्या ः स्वाहा-

मित्रायसत्यानामधिपतय इदन्न मम ॥

वरुँणोपामधिँपतिस्समॉवत्वस्मिन्ब्रह्मॅन्नस्मिन्क्षत्रेस्यामाशिष्य

स्यांपुँरोधायॅामस्मिन्कर्मॅन्नस्यान्देवहूत्या ः स्वाहा-

वरुणाय अपामधिपतयइदन्नमम ॥

समुद्रस्त्रोत्यानामधिँपतिस्समॉवत्वस्मिन्ब्रह्मॅन्नस्मिन्क्षत्रेस्यामा

शिष्यस्यांपुँरोधायॅामस्मिन्कर्मॅन्नस्यान्देवहूत्या ः स्वाहा-

समुद्रायस्त्रोत्यानामधिपतयइदन्न मम ॥

अन्न ः साम्राज्यानामधिँपतितन्मॉवत्वस्मिन्ब्रह्मॅन्नस्मिन्क्षत्रेस्या मा

शिष्यस्यां पुँरोधायॅा मस्मिन्कर्मॅन्नस्यान्देवहूत्या ः स्वाहा-

अन्नाय साम्राज्याना मधिपतिनइदंन मम ॥

सोमओषँधीनामधिँपतिस्समॉवत्वस्मिन्ब्रह्मॅन्नस्मिन्क्षे स्यामा

शिष्यस्यांपुँरोधायॅामस्मिन्कर्मॅन्नस्यान्देवहूत्या ः स्वाहा-

सोमायओषधीनामधिपतयइदन्न मम ॥

सविताप्रॅसवानामधिॅपतिस्समॉवत्वस्मिन्ब्रह्मॅन्नस्मिन्क्षत्रे

स्यामाशिष्यस्यांपुॅरोधायॅामस्मिन्कर्मॅन्नस्यान्देवहूत्याꣳ

स्वाहा-सवित्रेप्रसवानामधिपतय इदन्न मम ॥

रुद्रःपॅशूनामधिॅपतिस्समॉव त्वस्मिन्ब्रह्मॅन्नस्मिन्क्षत्रेस्यामा

शिष्यस्यांपुॅरोधायॅामस्मिन्कर्मॅन्नस्यान्देवहूत्याꣳस्वाहा-

रुद्रायपशूनामधिपतयइदन्नमम ॥ अपउपस्पृश्य ।

त्वष्टॉरूपाणामधिॅपतिस्समॉवत्वस्मिन्ब्रह्मॅन्नस्मिन्क्षत्रेस्यामा

शिष्यस्यांपुॅरोधायॅामस्मिन्कर्मॅन्नस्यान्देव हूत्याꣳस्वाहा-

त्वष्ट्रे रूपाणामधिपतय इदन्न मम ॥

विष्णुःपर्वॅतानामधिॅपतिस्समॉवत्वस्मिन्ब्रह्मॅन्नस्मिन्क्षत्रेस्यामा

शिष्यस्यांपुॅरोधायॅामस्मिन्कर्मॅन्नस्यान्देव हूत्याꣳस्वाहा-

विष्णवेपर्वतानामधिपतय इदन्न मम ॥

मरुतोॅगणानामधिॅपतयस्तेमॉवन्त्वस्मिन्ब्रह्मॅन्नस्मिन्क्षत्रेस्या मा

शिष्यस्यांपुॅरोधायॅामस्मिन्कर्मॅन्नस्यान्देवहूत्याꣳस्वाहा-

मरुद्भ्यो गणानामधिपतिभ्य इदन्न मम ॥

पितॅरःपितामहाःपरेऽवरेततास्ततामहाइहमॉवत ।अस्मिन्ब्रह्मॅ

न्नस्मिन्क्षत्रेस्यामाशिष्यस्यांपुॅरोधायॅा मस्मिन्कर्मॅन्नस्यान्देव

हूत्याꣳस्वाहा-मन्त्रोक्तदेवताभ्य इदन्न मम ॥ - अपउपस्पृश्य

ऋताषाडृतधॉमाग्निर्गॅन्धर्वस्तस्यौषॅधयोऽप्सरस ऊर्जो नाम स इदं

ब्रह्मॅ क्षत्रं पॉतु ता इदं ब्रह्मॅ क्षत्रं पान्तु तस्मै स्वाहा-

ऋतासाहे ऋतधाम्ने अग्नये गन्धर्वायेदन्नमम ॥

ताभ्यस्स्वाहा-ओषधिभ्यः अप्सरोभ्य ऊग्भ्यॅ इदन्न मम ॥

सꣳहितो विश्वसॉमा सूर्यॊ गन्धर्वस्तस्य मरींचयोऽप्सरसॅ आयुवो

नाम स इदं ब्रह्मॅ क्षत्रं पॉतु ता इदं ब्रह्मॅ क्षत्रं पान्तु तस्मै

स्वाहा-सꣳहिताय विश्वसाम्नसूर्याय गन्धर्वायेदन्न मम ॥

ताभ्यस्स्वाहा-मरीचिभ्यःअप्सरोभ्यःआयुभ्य इदन्न मम ॥

सुषुम्नस्सूर्यॅरश्मिश्चन्द्रमॉ गन्धर्वस्तस्य नक्षॅत्राण्यप्सरसॊ

बेकुरॅयोनाम स इदं ब्रह्मॅ क्षत्रं पॉतु ता इदं ब्रह्मॅ क्षत्रं पान्तु तस्मै

स्वाहा -सुषुम्नाय सूर्यरश्मये चन्द्रमसे गन्धर्वायेदन्न मम ॥

ताभ्यस्स्वाहा -नक्षत्रेभ्योऽप्सरोभ्यो बेकुरुभ्य इदन्न मम ॥

भुज्युस्सुॅपर्णो यज्ञो गॅन्धर्वस्तस्य दक्षिॅणा अपसरसॅस्तवा

नाम स इदं ब्रह्मॅ क्षत्रं पॉतु ता इदं ब्रह्मॅ क्षत्रं पान्तु तस्मै

स्वाहा -भुज्यवे सुपर्णायॅयज्ञाय गन्धर्वायेदन्न मम ॥

ताभ्यस्स्वाहा - दक्षिणाभ्योऽप्सरोभ्यस्तवाभ्य इदन्न मम ॥

प्रजापॅतिर्विश्वकॅर्मामनौंगन्धर्वस्तस्यॅर्क्सामान्यॅप्सरसो वह्वॅयो
नामस इदं ब्रह्मॅ क्षत्रं पॉतु ता इदं ब्रह्मॅ क्षत्रं पान्तु तस्मैस्वाहा
प्रजापतये विश्वकर्मणे मनसे गन्धर्वायेदन्नमम ॥
ताभ्यस्वाहा-ऋक्सामेभ्यो ऽप्सरोभ्यो वह्निभ्य इदन्न मम ॥
इषिरो विश्वव्यॅचा वातौं गन्धर्वस्तस्यापोऽप्सरसौं मुदा नाम स
इदं ब्रह्मॅ क्षत्रपॉतु ता इदं ब्रह्मॅ क्षत्रं पान्तु तस्मै स्वाहा-
इषिरायविश्वव्यचसेवाताय गन्धर्वायेदन्नमम ॥
ताभ्यस्स्वाहा -अद्भ्यःअप्सरोभ्यःमुदाभ्य इदन्न मम ॥
भुवॅनस्यपते यस्यॅ त उपरिं गृहा इह चॅ ।
स नौं रास्वाज्यॅानिꣳरायस्पोषꣳसुवीर्यꣳ संवत्सरीणाꣳ
स्वस्तिꣳस्वाहा-भुवनस्यपत्य इदन्न मम ॥
परमेष्ठ्यधिॅपति मृत्युर्गॅन्धर्वस्तस्य विश्वॅमप्सरसो भुवो नाम
सइदं ब्रह्मॅ क्षत्रं पॉतु ता इदं ब्रह्मॅ क्षत्रं पान्तु तस्मै स्वाहा -
परमेष्ठिनेअधिपतये मृत्यवे गन्धर्वायेदन्न मम ॥
ताभ्यस्स्वाहा -विश्वस्मा अप्स्रोभ्यो भूभ्यइदन्नमम ॥
सुक्षितिस्सुभूॅतिर्भद्रकृत्सुवॅर्वान्पर्जन्यौंगन्धर्वस्तस्यॅ विद्युतो
ऽप्सरसो रुचो नाम स इदं ब्रह्मॅ क्षत्रं पॉतु ता इदं ब्रह्मॅ क्षत्रं
पान्तु तस्मै स्वाहा -सुक्षितये सुभूतये भद्रकृते सुवर्वते .

पर्जन्याय गन्धर्वायेदन्न मम ॥

ताभ्यस्स्वाहा - विद्युद्भ्यःअप्सरोभ्यःरुग्भ्य इदन्न मम ॥

दूरेहेंतिरमृडयो मृत्युर्गन्धर्वस्तस्यँ प्रजा अँप्सरसौं भीरुवो नामस इदं ब्रह्मँ क्षत्रं पाँतु ता इदं ब्रह्मँ क्षत्रं पान्तु तस्मै स्वाहा -दूरेहेतये अमृडयाय मृत्यवे गन्धर्वायेदन्न मम ॥

ताभ्यस्स्वाहा - प्रजाभ्योऽप्सरोभ्यो भीरुभ्य इदन्न मम ॥

चारुँःकृपणकाशीकामौंगन्धर्वस्तस्याधयोऽप्सरसश्शाचयँन्ती र्नाम स इदं ब्रह्मँ क्षत्रं पाँतु ता इदं ब्रह्मँ क्षत्रं पान्तु तस्मै स्वाहा-चारवे कृपणकाशिने कामाय गन्धर्वायेदन्न मम ॥

ताभ्यस्स्वाहा -आधिभ्योऽप्सरोभ्यश्शोचयन्तीभ्य इदन्न मम ॥

स नौं भुवनस्य पते यस्यँ त उपरिं गृहा इह चँ ।उरुब्रह्मँणेऽस्मैक्षत्राय महि शर्म यच्छ स्वाहा- भुवनस्यपत्य इदन्न मम ॥

प्रजाँपते नत्वदेतान्यन्यो विश्वाँ जातानि परिता बँभूव ।

यत्काँमास्ते जुहुमस्तन्नौं अस्तु वयँस्याँम पतँयो रयीणाꣳ स्वाहा-

प्रजापतय इदन्न मम ॥भूःस्वाहा-अग्नय इदन्न मम ॥भुवःस्वाहा वायव इदन्न मम ॥सुवःस्वाहा-सूर्यायेदन्न मम ॥

यदँस्यकर्मणोऽत्यरीँरिचंयद्वान्यूँनमिहाकँरम् ।अग्निष्टत्स्विँष्टकृद्विद्वान्त्सर्वꣳस्विँष्टꣳसुहुँतङ्करोतुस्वाहा-अग्नये स्विष्टकृत इदन्न

मम ॥ परिध्यञ्जनम्-लेपकार्यम्-लेपयोःप्रस्तरवत्तूष्णींबर्हिरङ्क्त्वा तृणमन्यत्रनिधाय अग्नौ प्रहरति ।तृणप्रहरः-निर्देशनञ्च-अग्निमभिमन्त्र्य-भूमौ निमार्ष्टि-परिधिप्रहरः-इतरौप्रहरन्-उत्तरार्ध्यस्याग्रं अङ्गारेषूपोहति-आघारसमिधौ प्रहृत्य- सꣳस्रावेणाभिजुहोति-

स्वाहा-वसुभ्योरुद्रेभ्य आदित्येभ्य स्सꣳस्रावभागेभ्यइदं न मम ॥

ओं भूर्भुवस्सुवस्वाहा-प्रजापतय इदन्न मम ॥अस्मिन् अस्य मम कुमारस्य चौळहोम कर्मणि अविज्ञातप्रायश्चित्तानि करिष्ये ।

अनाज्ञातं यदाज्ञॉतम् ।यज्ञस्यॅ क्रियते मिथुॅ ।अग्ने तदॅस्य कल्पय ।त्वꣳहि वेत्थॅ यथा तथꣳस्वाहा-अग्नयइदन्नमम ॥

पुरुॅषसम्मितोयज्ञः ।यज्ञःपुरुॅषसम्मितः ।अग्ने तदॅस्य कल्पय । त्वꣳहि वेत्थॅ यथा तथꣳस्वाहा-अग्नय इदन्न मम ॥

यत्पॉकत्रा मनॅसा दीनदॅक्षा न ।यज्ञस्यॅ मन्वते मर्तॉसः । अग्निष्टद्धोता क्रतुविद्विॅजानन् ।यजिॅष्ठो देवाꣳऋॅतुशो यॅजाति स्वाहा- अग्नय इदन्न मम ॥

त्वन्नॉ अग्ने वरुॅणस्य विद्वान्देवस्यहेडोऽवॅयासिसीष्ठाः । यजिॅष्ठो वह्निॅतम श्शोशुॅचानोविश्वाद्वेषाꣳसि प्रमुॅमुग्ध्य स्मत्स्वाहा-अग्नीवरुणाभ्यामिदन्न मम ॥

सत्वन्नॉ अग्नेऽवमो भॅवोती नेदिॅष्ठो अस्या उषसो व्युॅष्टौ । अवॅ यक्ष्व नो वरुॅणꣳररॉणो वीहि मॄॅडीकꣳ सुहवॉ न एधि स्वाहा- अग्नीवरुणाभ्यामिदन्न मम ॥

आभिर्गीर्भि र्यदतौ नऊनमाप्यॅायय हरिवो वर्धमानः।
यदास्तोतृभ्योमहि गोत्रा रुजासिं भूयिष्ठभाजो अधॅ ते स्याम
स्वाहा- इन्द्राय हरिवते वर्धमानायेदन्न मम॥

इदंविष्णुर्विचॅक्रमे त्रेधा निदॅधे पदम्।
समूॅढमस्य पाꣳसुरेस्वाहा-विष्णवइदन्न मम॥
त्र्यॅम्बकं यजामहे सुगन्धिंपुॅष्टिवर्धॅनम्।उर्वारुकमिॅव
बन्धॅनान्मृत्यो मुॅक्षीय मामृतात्स्वाहा-त्र्यम्बकायेदन्न मम॥
यद्विद्वाꣳसोयदविॅद्वाꣳसोमुग्धाःकुर्वन्त्यृत्विजॅः।
अग्निर्मातस्मादेनॅसःश्रद्धादेवीचॅमुञ्चताꣳस्वाहॅा-
अग्निश्रद्धाभ्यामिदन्न मम॥

अस्कान्द्यौःपॅृथिवीम्।अस्कॅान्ऋषभोयुवागाः।स्कन्नेमाविश्वा
भुवॅना।स्कन्नोयज्ञःप्रजॅनयतु। अस्कानजॅनिप्राजॅनि।आस्कन्ना
ज्जॅायतेवृषा।स्कन्नात्प्रजॅनिषीमहिस्वाहा-अग्नय इदन्न मम॥
यन्मॅ आत्मनोॅमिन्दाभूॅदग्निस्तत्पुनराहार्जातवॅेदा विचॅर्षणि
स्स्वाहा-अग्नये जातवेदसे विचर्षणय इदन्न मम॥
पुनॅरग्नि श्चक्षुॅरदात्पुनरिन्द्रो बृहस्पतिॅः।पुनॅर्मे अश्विनायुवञ्चक्षु
राधॅत्तमक्ष्योस्वाहा-अग्नीन्द्रबृहस्पत्यश्विभ्य इदन्न मम॥
पुनॅस्त्वादित्या रुद्रा वसॅवस्समिॅन्धतां पुनॅर्ब्रह्माणोॅ वसुनीथ

यज्ञैः ।घृतेन त्वन्तनुवौं वर्धयस्व सत्यास्सॅन्तु यजॅमानस्य
कामास्वाहा-वसुनीथायाग्नय इदन्न मम ॥ भूःस्वाहा-अग्नय
इदन्न मम ॥ भुवःस्वाहा-वायव इदन्न मम ॥सुवःस्वाहा-
सूर्यायेदन्न मम ॥ओंभूर्भुवस्सुवस्वाहा-प्रजापतय इदन्न मम ॥
अस्मिन् अस्य मम कुमारस्य चौळहोमकर्मणि मध्ये
नानाप्रकारेण सम्भावित समस्तविध्यपराधप्रायश्चित्तार्थं
सर्वप्रायश्चित्तं होष्यामि-
ओं भूर्भुवस्सुवस्वाहा-प्रजापतय इदन्न मम ॥
सर्वं श्री विष्णवे स्वाहा- विष्णवे परमात्मन इदन्न मम ॥
नमो रुद्राय पशुपतये स्वाहा- रुद्राय पशुपतय इदन्न मम ॥
अपउपस्पृश्य-द्वादशगृहीतेन स्रुचम्पूरयित्वा-
सप्त तैं अग्ने समिधॅस्सप्तजिह्वास्सप्त ऋषॅयस्सप्तधामॅ प्रियाणिँ ।
सप्त होत्रास्सप्तधात्वॉ यजन्ति सप्तयोनीरापॄणस्वा घृतेन स्वाहा-
अग्नये सप्तवत इदं न मम ॥आज्यपात्रमुत्तरतो निधाय प्रायश्चित्तम्
द्वादश कृष्णस्मरणम् प्राणायामः ॥ परिषेचनम्
अदितेऽन्वॅमꣳस्थाः । अनुॅमतेऽन्वॅमꣳस्थाः । सरॅस्वते
ऽन्वॅमꣳस्थाः । देवॅसवितः प्रासॉवीः ॥ वरुणाय नमः
सकलाराधनैस्समर्चितम् ॥प्रतिजलमिश्रम् -सदॅसि सन्मॅभूया
स्सर्वॅमसि सर्वम्मे भूयाः पूर्णमॅसि पूर्णं मॅभूया अक्षितमसि
मामे क्षेष्ठाः ॥प्रतिदिशं निनयेत्-प्राच्यान्दिशिदेवाऋत्विजौं

मार्जयन्ताम्।दक्षिणायान्दिशिमासाः पितरो मार्जयन्ताम्।
प्रतीच्यान्दिशि गृह्याः पशवोमार्जयन्ताम्। उदीच्यान्दिश्याप
ओषधयो वनस्पतयो मार्जयन्ताम्। ऊर्ध्वायान्दिशियज्ञ
स्सँवत्सरोयज्ञपतिर्मार्जयन्ताम्॥समुद्रंवःप्रहिणोमिस्वांयोनि
मपिगच्छत अच्छिद्रः प्रजयाभूयासम्मापरासेचि मत्पयः॥

आत्मानं कुमारञ्च प्रोक्षेत्॥

ब्रह्मन् वरन्ते ददामि। ब्रह्मणे नमः सकलाराधनैस्समर्चितम्॥

अपरेणाग्निं प्राञ्चमुपवेश्य त्रेण्या शलल्या त्रिभिर्दर्भपुञ्जीलै श्शालालुग्लप्सेनेति तूष्णीं केशान्विनीय यथर्षि शिखा निदधाति॥ यथावैषां कुलधर्मस्स्यात्॥अपां संसर्जनाद्याकेश निधानात्समानम्॥अनुवाकस्य प्रथमेन यजुषा अपस्संसृज्यउष्णाश्शतास्वानीय -

उष्णेन वायवुदकेनेह्यदितिः केशान् वपतु॥
उत्तरया शिर उनत्ति-आप उन्दन्तुजीवसे दीर्घायुत्वाय वर्चसे।
ज्योक्च सूर्यन्दृशे॥ त्रीश्स्तीन्दर्भानन्तर्धाय उत्तराभिश्चतसृभिः
प्रतिमन्त्तं प्रतिदिशं प्रवपति-येनावपत्सविता क्षुरेण सोमस्य राज्ञो
वरुणस्य विद्वान्। तेन ब्रह्माणो वपतेदमस्यायुष्माञ्जरदष्टिर्यथा
सदयं---शर्मा-पुरस्तात्।यत्क्षुरेण मर्चयता सुपेशसा वप्त्रा वपसि
केशान्। शुन्धि शिरोमास्यायुः प्रमोषीः-वपन्तमनुमन्त्रयते।
येन पूषा बृहस्पतेरग्नेरिन्द्रस्यचायुषेऽवपत्। तेनास्यायुषे वप

सौश्लोक्याय स्वस्तये-दक्षिणतः। येन भूयश्चरात्ययञ्जयोक्च पश्यॉति सूर्यम्। तेनास्यायुंषे वप सौश्लोक्याय स्वस्तये-। येनॅ पूषा बृहस्पतेंरग्नेरिन्द्रॅस्यचायुषेऽवॅपत्।तेनॅ ते वपामि---

शर्मन्नायुॅषा वर्चॅसा यथा ज्योक्सुमना असाः-उत्तरतः।

उप्त्वाय केशान् वरुॅणस्य राज्ञो बृहस्पतिंस्सविता सोमों अग्निः। तेभ्योॅ निधानॅम्बहुधाऽन्वॅविन्दन्नन्तरा द्यावॉपृथिवी अपस्सुवॅः-

आनडुहे शकृत्पिण्डे यवान्निधाय तस्मिन्केशानुपयम्य उदुम्बरमूले दर्भस्तम्बे वा निदधाति॥ नापितः संसृष्टाभिरेव अद्भिः अबर्थं कुर्वन् केशान् प्रवपति॥कुमारं स्नापयित्वा वस्त्रादिभिरलङ्कृत्य

स्वाहा-अग्नेरुपस्थानङ्करिष्ये।अग्नेत्वन्नोअन्तॅमः।उतत्रातांशि वोभॅववरूथ्यॅः। तन्त्वॉशोचिष्ठदीदिवः। सुम्नायॅनूनमींमहे सखिॅभ्यः। वसुॅरग्निर्वसुॅश्रवाः।अच्छॉनक्षि द्युमत्तॅमो रयिन्दाः। सनोॅबोधिश्रुधीहवॅमुरुष्याणोॅअघायतस्समॅस्मात्॥

स्वस्तिश्रद्धांमेधांयशःप्रज्ञांविद्यांबुद्धिंश्रियंबलम्। आयुष्यन्तेज आरोग्यं देहि मे हव्यवाहन॥ श्रियन्देहि मे हव्यवाहन ओं नम इति॥ चतुस्सागरपर्यन्तंगोब्राह्मणेभ्यश्शुभंभवतु--आर्षेय--प्रवरान्वितः--गोत्रःआपस्तम्बसूत्रःयजुश्शाखा ऽध्यायी-- शर्मा नामा अहं भो अभिवादये॥

अग्नेनयॅसुपथॉ राये अस्मान् विश्वॉनि देव वयुनॉनि विद्वान्।

युयोध्यॅस्मज्जुॅहुराणमेनोभूयिॅष्ठान्ते नमॅउक्तिं विधेम॥

अग्नये नमः ॥मन्त्रहीनं क्रियाहीनं भक्तिहीनं हुताशन ।
यद्धुतन्तु मया देव परिपूर्णन्तदस्तु ते ॥
प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै ।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥ कृष्ण कृष्ण कृष्ण ॥

उपनयनप्रयोगः

उपनयनं व्याख्यास्यामः ।गणपतिपूजनं स्वस्तिपुण्याहवाचनं ग्रहप्रीतिकर हिरण्यदानं नान्दी कर्मणः पुण्याहं अङ्कुरारोपणं विश्वेत्ताते इति रक्षाबन्धनं कारयित्वा-सङ्कल्पः-दर्भेष्वासीनः दर्भान्धारयमाणः
शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
ओंभूः - भूर्भुवस्सुवरों ममोपात्त समस्तदुरित क्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थम् शुभे दिने -- अस्यां --शुभतिथौ --नक्षत्रे-- राशौ जातस्य--शर्मणः एतावन्तं कालं अनाश्रमिणः अस्य मम कुमारस्य ब्रह्मचर्याश्रमसिद्धयर्थं वेदाध्ययनसम्पदनार्थं आयुस्तेजो यशःश्रीपुष्टयद्यभिवृध्यर्थं साङ्गापाङ्गं सकलवेदाध्ययनसिध्यर्थं चतुर्विंशत्यक्षररूपगायत्रीमन्त्रोच्चारण योग्यतासिध्यर्थं ---गोत्रोद्भवं---शर्माणं इमं ममकुमारं उपनेष्ये ।
अस्य मम कुमारस्य श्रौतस्मार्त विहित नित्यकर्मानुष्ठान योग्यता सिध्यर्थं यज्ञोपवीतधारणं कारयिष्ये ॥
यज्ञोपवीतादिदेवताभ्यो नमः-ध्यायामि इत्यादि षोडशोपचारपूजा ॥
आचमनं कारयित्वा-यज्ञोपवीतं धारयेत्-
यज्ञोपवीतधारण महामन्त्रस्य ।परब्रह्मऋषिः ।त्रिष्टुप् छन्दः ।परमात्मा देवता ।यज्ञोपवीतधारणे विनियोगः-
इति कुमारं वाचयित्वा-
यज्ञोपवीतं परमम्पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् ।

आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥
एतच्च वाचयेत्-यज्ञोपवीतं--तेजः ॥
अस्य मम कुमारस्य यज्ञोपवीतधारणमुहूर्तः सुमुहूर्तोऽस्त्विति भवन्तो महान्तोऽनुगृह्णन्तु-सुमुहूर्तोऽस्तु ॥
मात्रा सह कुमारं भोजयेत्-आचार्यः परिषेचनमन्त्रान् ब्रुवन् कुमारस्य परिषेचनादिकं कारयित्वा क्षारलवणवर्जं कुमारं भोजयेत् ॥
कुमारस्य आचमनं कारयित्वा-अपां संसर्जनाद्याकेशनिधानात् चौळव त्कृत्वा-शिरोवपनं कारयित्वा-स्नाप्यालंकृत्य-दक्षिणत उपवेश्य-
स्नातमग्नेरुपसमाधानाद्याज्यभागान्तम्-पात्रसादने विशेषः-
षट्पात्रसादनान्ते समित्कुशाम्बुकूर्चवस्त्राश्मदण्डाजिनमेखलाश्च सह सादयेत् ॥

पालाशीं समिधमुत्तरयाधाप्य-पिता मन्त्रं ब्रुवन् कुमारं समिधमाधापयेत्-

आयुर्दा देव जरसं गृणानो घृतप्रतीको घृतपृष्ठो अग्ने ।
घृतम्पिबन्नमृतञ्चारुगव्यं पितेव पुत्रञ्जरसे नयेमम् ॥आधेहि ॥

आयुर्दे अग्नय इदन्न मम-उभौ ब्रूयाताम् ॥

उत्तरेणाग्निं दक्षिणेन पदा अश्मानमास्थपयत्यातिष्ठेति-

आतिष्ठेममश्मानमश्मेव त्वꣳस्थिरो भव ।अभितिष्ठ पृतन्यत
स्सहस्वपृतनायतः ॥

वासस्सद्यःकृत्तोतं उत्तराभ्यामभिमन्त्र्य-

रेवतीस्त्वा व्यक्षण्न्कृत्तिका श्चाकृन्त ꣳस्त्वा ।
धियोऽवयन्नवग्ना अवृञ्जन्त्सहस्रमन्ताꣳ अभितो अयच्छन् ॥
देवीर्देवायं परिधी सवित्रे । महत्तदोसामभवन्महित्वनम् ॥

उत्तराभिस्तिसृभिः परिधाप्य-

या अकृन्तन्नवयन् या अतन्वत याश्च देवीरन्ताँनताऽददन्त ।

तास्त्वा देवीर्जरसे संव्ययन्त्वायुष्मानिदं परिधत्स्व वासः ॥

परिधत्त धत्त वाससैनꣳशतायुषं कृणुत दीर्घमायुः ।बृहस्पति

ःप्रायच्छद्वासस एतत्सोमाय राज्ञे परिधातवा उ ॥ जराङ्गच्छासि

परिधत्स्व वासो भवा कृष्टीनामभिशस्तिपावा ।शतञ्जीव

शरदस्सुवर्चा रायश्च पोषमुपसंव्ययस्व ॥

परिहितमुत्तरयाऽनुमन्त्रयते-

परीदं वासो अधिधास्वस्तये ऽभूरापीनामभिशस्तिपावा ।

शतञ्जीव शरदः पुरूचीर्वसूनि चार्यो विभजासिजीवन् ॥

मौञ्जीं मेखलां त्रिवृतां त्रिःप्रदक्षिणमुत्तराभ्यां परिवीय-

इयन्दुरुक्तात्परिबाधमाना शर्मवरूथम्पुनतीन आगात् ।

प्राणापानाभ्याम्बलमाभरन्ती प्रियादेवानाꣳ सुभगा मेखलेयम् ॥

ऋतस्य गोप्त्री तपसःपरस्पी घृतीरक्षस्सहमाना अराँतीः ।

सानस्समन्तमनु परीहि भद्रया भतारस्ते मेखले मारिषाम ॥

एतच्च कुमारं वाचयति-इयन्दुरुक्ता--मारिषाम ॥

अजिनमुत्तरमुत्तरया-

मित्रस्य चक्षुर्धरुणं बलीयस्तेजो यशस्वि स्थविरꣳ समिद्धम् ।

अनाहनस्यं वसॅनञ्जरिष्णु परीदं वाज्यजिॅनन्दधेहम् ॥

एतच्च कुमारं वाचयति-मित्रस्य-हम् ॥

उत्तरेणाग्निं दर्भान् सꣳस्तीर्य तेष्वेनमुत्तरयाऽवस्थाप्य-

आगन्त्रा समॅगन्महि प्रसुॅमृत्युं युॅयोतन । अरिॅष्टास्सञ्चॅरेमहि

स्वस्ति चॅरतादिह स्वस्त्या गृहेभ्यॅः ॥

एतच्च कुमारं वाचयति-आगन्त्रा -- गृहेभ्यॅः ॥

उदकाञ्जलिमस्मा अञ्जलावानीयोत्तरया त्रिः प्रोक्ष्य-

समुद्रादूॅर्मिर्मधुॅमाꣳ उदाॅरदुपाꣳशुना समॅमृतत्वमॅश्याम् ।

इमेनुते रꣳमयस्सूर्यॅस्य येभिॅस्सपित्वं पितरॊ न आयनॅ् ॥

एतच्च कुमारं वाचयति-समुद्रा--आयनॅ् ॥

उत्तरैर्दक्षिणे हस्ते गृहीत्वा-

अग्निॅष्टे हस्तॅमग्रभीत्सोमॅस्ते हस्तॅमग्रभीत्सविता ते हस्तॅमग्रभी

त्सरॅस्वती ते हस्तॅमग्रभीत्पूषा ते हस्तॅमग्रभीद् बृहस्पतिॅस्ते

हस्तॅमग्रभीदॅर्यमा ते हस्तॅमग्रभीदꣳशॅस्ते हस्तॅमग्रभीद्भगॅस्ते

हस्तॅमग्रभीन्मित्रस्ते हस्तॅमग्रभीन्मित्रस्त्वमॅसि धर्मॅणाग्नि

राॅचार्यॅस्तवॅ ॥उत्तरैर्देवताभ्यः परीदाय-

अग्नये त्वा परिॅददामि--शर्मन् ।सोमाॅय त्वा परिॅददामि--

शर्मन् ।सवित्रे त्वा परिॅददामि--शर्मन् ।सरॅस्वत्यै त्वा

परिंददामि--शर्मन्।मृत्यवे त्वा परिंददामि--शर्मन्।यमायँ
त्वा परिंददामि--शर्मन्।गदायँ त्वा परिंददामि--
शर्मन्।अन्तँकाय त्वा परिंददामि--शर्मन्।अद्भ्यस्त्वा
परिंददामि --शर्मन्। ओषँधीभ्यस्त्वा परिंददामि--शर्मन्।
पृथिव्यै त्वा स वैश्वानरायै परिंददामि--शर्मन्॥

उत्तरेण यज्ञोपनीय-

देवस्यँ त्वा सवितुः प्रँसव उपँनये--शर्मन्॥

शुभमुहूर्तचूर्णिकां पठेत्-

स्वस्त्यप्राशीति सहस्राणां द्विजगुरुदेवताः समस्तजगददाधार महामण्डूक कूर्म यज्ञवराहशेषपृथिव्यादयः पुरन्दर पावक यमनिर्ऋति वरुण वायु कुबेर ईशानाद्यष्टदिक्पालकाः जलजभव हरिहरमुख्यदेवगणाः नारद विश्वामित्रपराशरात्रि वाल्मीकि गौतम भृगु व्यासादि महर्षयः सीतारुन्धत्यहल्या द्रौपदी तारा मन्दोदरी दमयन्त्यादि महापतिव्रताः हरिश्चन्द्रनल कार्तवीर्यविक्रमार्क भोजराजादि पुण्यपुरुषाः गङ्गा नर्मदा तुङ्गभद्राकावेरी मलापहारिणी कृष्णवेणी गोदावरी भीमरथ्यादि महानद्यः जम्बूनिम्ब कदम्ब चूत क्रमुक नारिकेल खर्जूरधात्रीदाडिम्यादि फलवृक्षाः पुन्नाग जातीवकुळ केतकी चम्पक मल्लिका माधवीमालत्यादि विविधकुसुमानि कस्तूरी कुङ्कुमागरु गोरोचनादि सुगन्धाः अपरिमित कनक कलशकन्यका गृहमेधिकवीश्वर वीणादि वाद्यमेघध्वनयः अयोध्या काशीपुरुषोत्तमरामाश्वरादि पुण्यनगर्यः श्रीशैल विन्ध्यहेमाचल गोवर्धन कैलासादि महाशैलाः तर्कमीमांसा न्यायवैशेषिक भाट्टप्राभाकर व्याकरणादि शास्त्राणि ऋग्यजुस्सामाथर्ववेदाःलग्नहोरा

द्रेक्काणनवांश दशांश द्वादशांश त्रिंशांशषष्ट्यंशपर्यन्तांशाःआदित्यादि नवग्रहाः निरन्तरमनुकूलाःशुभाश्शोभनाःअस्य मम कुमारस्य उपनयनमुहूर्तस्य सुतिथि सुवार सुनक्षत्र सुलग्न सुयोग सुकरण सुचन्द्रताराबलञ्च कुर्वाणाःसुप्रीतास्सुप्रसन्ना वरदा भवन्तु ॥

सुप्रजा इति दक्षिणे कर्णे जपति-सुप्रजाःप्रजयाँभूयास्सुवीरोँ वीरैस्सुवर्चा वर्चसा सुपोषःपोषैः ॥ ब्रह्मचर्यमागामिति कुमार आह-

ब्रह्मचर्यमागामुपमानँयस्व देवेनँ सवित्रा प्रसूँतः ॥

प्रष्टं परस्य प्रतिवचनं कुमारस्य । शेषं परो जपति-

को नामाँसि ।---शर्मा नामास्मि ।कस्यँ ब्रह्मचार्यँसि --शर्मन् ।

प्राणस्यँ ब्रह्मचार्यँस्मि ।--शर्मैष तेँ देवसूर्य ब्रह्मचारी तङ्गोपाय स

मामृँतैष तेँसूर्यपुत्रस्स दीर्घायुस्समामृँत ।

याःस्वस्तिमग्निर्वायुस्सूर्यश्चन्द्रमा आपोऽनुँसञ्चरँन्ति

ताःस्वस्तिमनु सञ्चँर--शर्मन् ॥

प्रत्यगाशिषश्चैनं वाचयति-

अध्वँनामध्वपते श्रेष्ठस्याध्वँनःपारमँशीय ।

कुमारस्य हस्ते दर्वीं दत्वा वाचयन्नेव अथैनमुत्तरा आहुतीर्हावयित्वा-

योगेँ योगे तवस्तँरंवाजेँ वाजे हवामहे । सखाँय इन्द्रँमूतये

स्वाहा-इन्द्रायेदन्न मम ॥

इममग्न इति मन्त्रं आचार्य एव ब्रूयात्-त्यागस्तु उभौ ब्रूयाताम्-

इममँग्न आयुँषे वर्चँसे कृधि प्रियꣳरेतो वरुण सोम राजन्।

मातेवास्मा अदिते शर्म यच्छ विश्वेदेवा जरदष्टिर्यथासत्स्वाहा-

अग्निवरुणसोमादिति विश्वदेवेभ्य इदन्न मम॥

शतमिन्नु शरदो अन्तिँ देवा यत्रॉनश्चक्रा जरसँन्तनूनाम्।

पुत्रासो यत्रँपितरो भवँन्ति मानो मध्या रीँरिषतायु र्गन्तोस्स्वाहा-

देवेभ्य इदन्न मम॥

अग्निष्टआयुःइति मन्त्रं आचार्य एव ब्रूयात्-त्यागस्तु उभौ ब्रूयास्ताम्-

अग्निष्टआयुः प्रतरान्दधात्वग्निष्टे पुष्टिं प्रतरां कृणोतु।

इन्द्रो मरुद्भिर् ऋतुथाकृणोत्वादित्यैस्ते वसुभिरादधातु

स्वाहा- अग्नीन्द्रमरुदादित्य वसुभ्य इदन्न मम॥

मेधाम्मह्यमङ्गिरसो मेधाꣳसँप्तऋषयो ददुः।

मेधाम्मह्यँ प्रजापँतिर्मेधामग्निर्ददातु मेस्वाहा-

अङ्गिरोभ्यस्सप्तर्षिभ्यःप्रजापत्यग्निभ्य इदन्न मम॥

अप्सरासुँ च या मेधा गँन्धर्वेषुँ च यद्यशँः।

दैवी या मॉनुषी मेधा सा मामाविँशतादिहस्वाहा-

मेधा यशोभ्यामिदन्न मम॥

इमम्मेँ वरुणश्श्रुधी हवँमद्या चँ मृडय।

त्वामँव स्युराचँके स्वाहा-वरुणायेदन्न मम॥

तत्वॉयामि ब्रह्मॅणा वन्दॅमानस्तदाशास्ते यजॅमानो हविर्भिः ।
अहेॅडमानो वरुणेह बोध्युरुॅशꣳस मान आयुःप्रमोॅषीस्स्वाहा-
वरुणायेदन्न मम ॥
त्वन्नों अग्ने वरुॅणस्य विद्वान्देवस्यहेडोऽवॅयासिसीष्ठाः ।
यजिॅष्ठो वह्निॅतम श्शोशुॅचानोविश्वाद्वेषाꣳसि प्रमुॅमुग्ध्य
स्मत्स्वाहा- अग्नीवरुणाभ्यामिदन्न मम ॥
सत्वन्नों अग्नेऽवमो भॅवोती नेदिॅष्ठो अस्या उषसो व्युॅष्टौ ।
अवॅ यक्ष्व नो वरुॅणꣳरराॅणो वीहि मृॅडीकꣳसुहवो॑ न एधि स्वाहा-
अग्नीवरुणाभ्यामिदन्न मम ॥
त्वमॅग्ने अयास्ययासन्मनॅसा हितः ।अयासन् हव्यमूॅहिषेऽया नों
धेहि भेषजꣳस्वाहा- अग्नये अयस इदन्न मम ॥
जयादि प्रतिपद्यते परिषेचनान्तं कृत्वा-ब्रह्मोपदेश अनुज्ञां कुर्यात्-
नमस्सदॅसे नमस्सदॅसस्पतॅये नमस्सखींनां पुरोगाणाञ्चक्षुॅषे नमॉ
दिवे नमॅः पृथिव्यै ॥हरिःओम्॥सर्वेभ्यो ब्राह्मणेभ्यो नमः ॥
हे सदस्याः भवत्पादमूले मया समर्पितां इमां सौवर्णीं दक्षिणां यत्किञ्चिद्दक्षिणामपि यथोक्तदक्षिणामिव स्वीकृत्य --गोत्रोद्भवस्य--नक्षत्रे--राशौ जातस्य--शर्मणः अस्य मम कुमारस्य जन्मप्रभृति एतत्क्षणपर्यन्तं धात्री जनयित्र्यादि अनेकपरिपालिनीजनस्तन्यपानेन अपाङ्क्तेयभोजनेन सजातीय विजातीयजनैस्सहभोजनेन संस्पर्शनेन

तत्तत्कालशौचानाचरणेन कामचार कामवाद् कामभक्षणेन च सम्भावितानां सर्वेषां पापानां अपनोदनद्वारा मम कुमारस्य गायत्री स्वीकरणे मम च गायत्र्याः उपदेष्टृत्वे च योग्यतासिद्धिरस्त्विति भवन्तो ब्रुवन्तु ॥

कूर्चः-इति कुमारः आचार्याय कूर्चं दद्यात्-अपरेणाग्निमुदगग्रं कूर्चन्निधाय तस्मिन्नुत्तरेण यजुषोपनेतोपविशति-

राष्ट्रभृदॅस्याचार्यासन्दी मात्वद्योंषम्-आचार्यःकूर्चे उपविशेत्।

हे गुरो स्वागतम्-इदन्ते पाद्यम्-इति कुमारः पादपूजां कृत्वा-

पुरस्तात्प्रत्यङ्ङासीनःकुमारो दक्षिणेन पाणिना दक्षिणं पाद मन्वारभ्याह

सावित्रीं भो अनुब्रूहि-अनुब्रवाणि ॥

शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

ओमित्येकाक्षॅरं ब्रह्म ।अग्निर्देवताब्रह्मॅइत्यार्षम् ।गायत्रं छन्दं परमात्मं सरूपम् ।सायुज्यं विंनियोगम् ।आयॉतु वरॅदा देवी अक्षरॅं ब्रह्मसम्मिॅतम् ।गायत्रीञ्छन्दॅसाम्मातेदंब्रॅह्म जुषस्वॅ मे ।यदह्नात्कुरुॅते पापं तदह्नात्प्रतिमुच्यॅते । यद्रात्रियात्कुरुते पापंतद्रात्रियात्प्रतिमुच्यॅते । सर्वॅवर्णे मॅहादेवि सन्ध्याविॅद्ये सरस्वॅति ।ओजोंसि सहोंसिबलॅमसि भ्राजोंसि देवानान्धाम नामॉसिविश्वॅमसि विश्वायुस्सर्वॅमसि सर्वायुॅरभिभूरोंगायत्रीमावॉहयामि सावित्रीमावॉहयामि सरस्वती मावॉहयामिछन्दऋषीनावॉहयामिश्रियमावॉहयामि बलमावॉहयामि

गायत्रियागायत्रीच्छन्दो विश्वामित्र ऋषि स्सविता देवताऽग्निर्मुख ब्रह्माशिरो विष्णु र्हृदयꣳ रुद्रश्शिखापृथिवीयोनिः प्राणापान व्यानोदान समानासप्राणाश्वेतवर्णा सांख्यायनसगोत्रागायत्री चतुर्विꣳ शत्यक्षरा त्रिपदाॅ षट्कुक्षिःपञ्चशीर्षोपनयने विंनियोग ॐभूः--सुवरों श्रीपरमेश्वरप्रीत्यर्थम् गायत्री महामन्त्र जपङ्करिष्ये ॥

तत्सवितुः ब्रह्मात्मनेअङ्गुष्ठाभ्यां नमः ॥

वरेण्यं विष्ण्वात्मने तर्जनीभ्यां नमः ॥

भर्गोदेवस्य रुद्रात्मनेमध्यमाभ्यां नमः ॥

धीमहि सत्यात्मनेअनामिकाभ्यां नमः ॥

धियो योनःज्ञानात्मनेकनिष्ठिकाभ्यां नमः ॥

प्रचोदयात्सर्वात्मने करतलकरपृष्ठाभ्यां नमः

तत्सवितुः ब्रह्मात्मने हृदयाय नमः ॥

वरेण्यं विष्ण्वात्मने शिरसे स्वाहा ॥

भर्गोदेवस्य रुद्रात्मने शिखायै वषट् ॥

धीमहि सत्यात्मने कवचायहुम् ॥

धियो योनःज्ञानात्मने नेत्रत्रयाय वौषट् ॥

प्रचोदयात्सर्वात्मने अस्त्राय फट् ॥

भूर्भुवस्सुवरों इति दिग्बन्धः ॥ध्यानम्-

मुक्ताविद्रुम हेमनील धवळच्छायैर्मुखैस्त्र्यक्षणैः
युक्तामिन्दुनिबद्धरत्नमुकुटां तत्वार्थवर्णात्मिकाम् ।

गायत्रीं वरदाऽ भयाङ्कुशकशाःशुभ्रं कपालञ्चदां
शङ्खंचक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे ॥

यथाशक्ति गायत्री जपं कुर्यात्-कुमारं पट्टवस्त्रेणाच्छाद्य -तस्मा अन्वाह तत्सवितुरिति पच्छोर्धर्चशस्ततस्सर्वाम्-

ओं भूः तत्सॅवितुर्वरेण्यं-ओं भुवॅः भर्गो देवस्यॅ धीमहि-
ओःसुवॅः धियो योनॅः प्रचो दयात्- ओं भूः तत्सॅवितुर्वरेण्य
भर्गो देवस्यॅ धीमहि-ओं भुवॅः धियो योनॅः प्रचो दयात्-
ओःसुवॅः तत्सॅवितुर्वरेण्यं भर्गो देवस्यॅ धीमहि धियो योनॅः
प्रचोदयात् ॥

कुमार उत्तरेण मन्त्रेण उत्तरमोष्ठमुपस्पृशते-

अवॅधमसौ सौम्य प्राणस्वं मैं गोपाय ॥ततः कुमारःसमन्त्रकं आचमनं कुर्यात् ॥कर्णावुत्तरेण-ब्रह्मॅण आणीस्थॅः

दण्डमुत्तरेणादत्ते ।पालाशो दण्डो ब्राह्मणस्य ।वाक्षों दण्ड इत्यवर्णसंयोगेनैक उपदिशन्ति-

सुश्रवॅस्सुश्रवॅसं मा कुरु यथा त्वःसुश्रवॅस्सुश्रवॉ अस्येवमहः
सुश्रवॅस्सुश्रवॉ भूयासं यथा त्वःसुश्रवॅस्सुश्रवॉ देवानां
निधिगोपोऽस्येवमहं ब्राह्मणानां ब्रह्मॅणो निधिगोपो भूॅयासम् ॥

स्मृतश्चम इत्येतद्वाचयित्वा-

स्मृतश्चमेऽस्मॅृतश्च मे तन्मॅ उभयॅं व्रतम् ।निन्दा च मेऽनिॅन्दा च

मे तन्मॅ उभयँ व्रतम्।श्रद्धा च मेऽश्रॅद्धा च मे तन्मॅ उभयँ व्र
तम्।विद्या च मेऽविद्या च मे तन्मॅ उभयँ व्रतम्।श्रुतञ्च मेऽश्रुँतञ्च
मे तन्मॅ उभयँ व्रतम्।सत्यञ्च मेऽनृँतञ्च मे तन्मॅ उभयँ व्र
तम्।तपँश्च मेऽतँपश्च मे तन्मॅ उभयँ व्रतम्।व्रतञ्च मेऽव्रँतञ्च
मे तन्मॅ उभयँ व्रतम्।यद्ब्राह्मणानां ब्रह्मॅणि व्रतं यदग्नेस्सेन्द्रँस्य
सप्रॅजापतिकस्य सदैँवस्य सदैँवराजस्य समॅनुष्यस्य समॅनुष्य
राजस्य सपिँतृकस्य सपिँतृराजस्य सगॅन्धर्वाप्सरस्कस्यॅ ।यन्मॅ
आत्मनॅ आत्मनिँ व्रतं तेनाहꣳ सर्वँव्रतो भूयासम्॥
गुरवे वरं दद्यात्- हे गुरो वरन्ते ददामि-गुरुः सप्तदशकृत्वोपान्य-
देवस्यॅ त्वा सवितुः प्रॅसवे। अश्विनोर्बाहुभ्याम्। पूष्णो हस्ताभ्या
प्रतिँगृह्णामि। राजा त्वा वरुँणो नयतु देवि दक्षिणे रुद्राय गाम्।
तेनाँमृतत्वमॅश्याम्। वयौँ दात्रे। मयो मह्यँमस्तु प्रतिग्रहीत्रे।कइद
ङ्कस्माँ अदात्। कामः कामाँय। कामौँ दाता। कामँः प्रतिग्रहीता।
कामꣳ समुद्रमाविँश। कामेँन त्वा प्रतिँगृह्णामि। कामैतत्ते। ए
षातेँ
काम दक्षिँणा। उत्तानस्त्वाङ्गीरसः प्रतिँगृह्णातु॥
वरं प्रतिगृह्य-उदायुषेत्युत्थाप्य-
उदायुँषा स्वायुषोदोषँधीनाꣳ रसेनोत्पर्जन्यँस्य शुष्मेणो
दँस्थाममृताꣳ अनुँ॥ उत्तरैरादित्यमुपतिष्ठते-

तच्चक्षुर्देवहितम्पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदश्शतञ्जीवेम शरदश्शतन्नन्दाम शरदश्शतम्मोदाम शरदश्शतम्भवाम शरदश्शतꣳ शृणवाम शरदश्शतं प्रब्रवामशरदश्शतमजीता स्याम शरद

श्शतञ्जयोक्चसूर्यन्दृशे ॥

यङ्कामयेत नायमच्छिद्येतेति तमुत्तरया दक्षिणे हस्ते गृह्णीयात्-

यस्मिन्भूतञ्च भव्यञ्च सर्वेलोकास्समाहिताः। तेन गृह्णामि त्वामहं महाङ्गृह्णामि त्वामहं प्रजापतिना त्वा महाङ्गृह्णामि -- शर्मन्॥

ततस्समिदाधानाऽऽरम्भोऽनुज्ञा-

नमो ब्रह्मण्य देवाय--नमः ॥सर्वेभ्यो ब्राह्मणेभ्यो नमः ॥हे सदस्याः भवत्पादमूले मया समर्पितां इमां सौवर्णीं दक्षिणां यत्किञ्चिद्दक्षिणामपि यथोक्तदक्षिणामिव स्वीकृत्य --गोत्रोद्भवस्य--नक्षत्रे--राशौ जातस्य--शर्मणः मम यज्ञेश्वर प्रसादसिध्यर्थं समिदाधानाऽऽरम्भकर्म कर्तुं योग्यतासिद्धिरस्त्विति भवन्तो ब्रुवन्तु ॥

परित्वेति परिमृज्य तस्मिन्नुत्तरैर्मन्त्रैः समिध आदध्यात्-

शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

ओंभूः - भूर्भुवस्सुवरों ममोपात्तसमस्तदुरित क्षयद्वारा श्रीपरमेश्वर प्रीत्यर्थम् प्रातस्समिदाधानं करिष्ये ॥अपउपस्पृश्य भूर्भुवस्सुवरोम्-

परिंत्वाग्ने परिंमृजाम्यायुंषा च धनेंनच ।सुप्रजाः प्रजयाँ भूयासꣳ सुवीरों वीरैस्सुवर्चा वर्चसा सुपोषःपोषैस्सुगृहागृहैस्सुपतिः पत्याँ सुमेधा मेधयाँ सुब्रह्माब्रह्मचारिभिः ॥देवसवितः प्रसुव ।

अग्नयेँ समिधमाहॉर्षंम्बृहते जातवेँदसे । यथा त्वमॅग्ने समिधॉ
समिध्यसॅ एवम्मा मायुँषावर्चँसा सन्या मेधया प्रजया पशुभिँ
ब्रह्मवर्चसेनान्नाद्येँन समेँधय स्वाहा ॥
एधोस्येधिषीमहि स्वाहा ॥
समिदॅसि समेधिषीमहि स्वाहा ॥
तेजोँसि तेजो मयिँ धेहि स्वाहा ॥
अपोँ अद्यान्वॅचारिषꣳरसेँन समॅसृक्ष्महि ।पयॅस्वाꣳअग्नआगॅम
न्तम्मा सꣳसॅृजवर्चँसा स्वाहा ॥
सम्माग्ने वर्चँसा सृजप्रजयाँ च धनेँन च स्वाहा ॥
विद्युन्मेँ अस्य देवा इन्द्रोँ विद्यात्सह ऋषिँभिस्स्वाहा ॥
अग्नयेँ बृहते नाकॉय स्वाहा ॥
द्यावॉपृथिवीभ्याꣳस्वाहा ॥
एषातेँ अग्ने समित्तया वर्धँस्व चाप्यॉयस्वच तयाहं वर्धँमानो
भूयासमाप्यायॅमानश्चस्वाहा ॥
योमाग्ने भागिनꣳसन्तमथाँ ऽभागञ्चिकीँर्षति ।अभागमॅग्ने तङ्कॅरु
मामॅग्नेभागिनँङ्कुरु स्वाहा ॥
समिधॅमाधायाग्ने सर्वँव्रतो भूयासꣳस्वाहा ॥
देवॅसवितः प्रसॉवीः ॥स्वाहा ॥

अग्नेरुपस्थानङ्करिष्ये ॥

यत्तेँ अग्ने तेजस्तेनाहन्तेँजस्वी भूँयासम्।

यत्तेँ अग्ने वर्चस्तेनाहंवँर्चस्वी भूँयासम्।

यत्तेँ अग्ने हरस्तेनाह्ँहँरस्वी भूँयासम्।

मयिं मेधाम्मयिं प्रजाम्मय्यग्निस्तेजोँदधातु

मयिं मेधाम्मयिं प्रजाम्मयीन्द्रँ इन्द्रियन्दँधातु।

मयिं मेधाम्मयिं प्रजाम्मयि सूर्योभ्राजोँ दधातु ॥

स्वस्ति श्रद्धाम्मेधां यशः प्रज्ञां विद्यांबुद्धिंश्रियम्बलम्।

आयुष्यन्तेज आरोग्यन्देहि मे हव्यवाहन ॥श्रियन्देहि मे हव्यवाहनओन्नम इति ॥

चतुस्सागरपर्यन्तं गोब्रह्मणेभ्यश्शुभं भवतु---आर्षेय प्रवरान्वित---गोत्रः आपस्तम्बसूत्रः यजुश्शाखाऽध्यायी ---शर्मा नामा अहं भो अभिवादये ॥

वैश्वानरायँ विद्महेँ लालीलायँ धीमहि ।तन्नोँ अग्निःप्रचोदयात् ॥त्रिः ॥

मानँस्तोके तनँये मानआयुँषि मानो गोषुमानो अश्वँेषु रीरिषः।

वीरान्मानोँ रुद्रभामितोवँधीर् हविष्मँन्तो नमँसा विधेम ते ॥

मेधावी भूयासम्-ललाटे ।तेजस्वी भूयासम्-हृदये ।वर्चस्वी भूयासम्-दक्षिणेंसे ।ब्रह्मवर्चसी भूयासम्-सव्येंसे ।आयुष्मान्भूयासम्-नाभौ । अन्नादो भूयासम्-कण्ठे ।स्वस्ती भूयासम्-शिरसि ।सर्वसमृद्धो भूयासम्-ग्रीवायाःपृष्ठतः ॥द्विराचामेत् ॥ततस्संशास्ति-

ब्रह्मचार्यँसि । बाढम् कामचार कामवाद कामभक्षो न भवामि ॥

अपोऽशान ।बाढम् अश्नामि ॥कर्मंकुरु ।बाढम् करोमि ।मा सुषुप्थाः ।
बाढम् दिवा मा स्वपिमि ॥ भिक्षशचर्यञ्चर ।बाढम् चरामि ॥
आचार्याधीनो भव ।बाढम् भवामि ॥ वेदशास्त्राण्यधीष्व ।
अध्यैमि ॥ मातरमेवाग्रे भिक्षस्व ।ॐ ॥मातरं नमस्कृत्य -
चतुस्सागरपर्यन्तं गोब्रह्मणेभ्यश्शुभं भवतु---आर्षेय प्रवरान्वित-
--गोत्रः आपस्तम्बसूत्रः यजुश्शाखा ऽध्यायी ---शर्मा नामा
अहं भो अभिवादये ॥अभिवाद्य-
भवति भिक्षांदेहि-इति भिक्षां याचेत् ॥मात्रादि सुवासिन्यः तण्डुल भिक्षां
दद्युः ॥उपनयनदीक्षामध्ये तण्डुलभिक्षामेव दद्यात् ॥अनन्तरं
अक्षताशीर्वचनम् ॥बन्धुमित्रजनाः आशीर्वदेयुः ॥स्वस्तिवाचनानन्तरं
हारती ॥वैश्वदेवताम्बूलम् ॥कुमारस्य माध्याह्निकं कारयेत् ॥
सायं सन्ध्यां समिदाधानं कारयेत् ॥परेद्युः प्रातस्सन्ध्यासमिदाधाना
ऽनन्तरं कुमारस्य ब्रह्मयज्ञारम्भं कारयेत् ॥
दीक्षामध्ये कुमारस्य दृष्टिदोषादिनिवृत्यर्थं नवग्रहमखं कुर्यात् ॥
त्रयस्त्रिंशत्कोटिदेवता पूजापूर्वकं महदाशीर्वचनञ्च कुर्यात् ॥

पलाशकर्म

तुरीयदिवसे प्रातः कुमारस्य मङ्गळस्नानं कारयित्वा सन्ध्यां समिदाधानं
ब्रह्मयज्ञं च कारयित्वा -सङ्कल्पः-दर्भेष्वासीनः दर्भान्धारयमाणः
शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
ओंभूः - भूर्भुवस्सुवरों ममोपात्त समस्तदुरित क्षयद्वारा श्रीपरमेश्वर
प्रीत्यर्थम् शुभे दिने -- अस्यां --शुभतिथौ --नक्षत्रे--राशौ जातस्य-
-शर्मणःअस्य मम कुमारस्य आयुष्याभिवृध्यर्थं मेधाजननसिध्यर्थं
पालाशकर्म करिष्ये ॥पलाशवृक्षमूले प्रणवश्रद्धामेधा पूजां कारयेत्-

यश्छन्दॅसामृषभो विश्वरूॅपः ।छन्दोभ्योध्यमृतात्सम्बभूॅव ।
समेन्द्रौं मेधया स्पृणोतु ।अमृतस्यॅ देव धारॅणो भूयासम् ।
शरीॅरम्मे विचॅर्षणम् ।जिह्वामे मधुॅमत्तमा । कर्णाभ्यां भूरि
विश्रुॅवम् । ब्रह्मॅणः कोशोॅऽसि मेधयाऽपिॅहितः । श्रुतम्मगोपाय-
अस्मिन् स्थण्डिले प्रणवस्वरूपिणं परमात्मानं ध्यायामि ।
प्रणवस्वरूपिणं परमात्मानं आवाहयामि ॥प्रणवस्वरूपिणः
परमात्मानःइदमासनम् ॥

श्रद्धयाग्निस्समिॅध्यते ।श्रद्धयाॅ विन्दते हविः ।श्रद्धां भगॅस्य मूर्धनिं ।
वचसा वेॅदयामसि ।प्रियꣳश्रद्धे ददॅतः ।प्रियꣳश्रॅद्धे दिदॉसतः ।
प्रियं भोजेषु यज्वॅसु । इदम्मॅ उदितं कॄधि । यथाॅ देवा असुॅरेषु ।
श्रद्धामुग्रेषुॅ चक्रिरे ।एवं भोजेषु यज्वॅसु । अस्माकॅमुदितं कॄधि ।
श्रद्धान्देॅवा यजॅमानाः ।वायुगोॅपा उपॉसते ।श्रद्धाꣳहॄदय्ॅयाकूत्या ।
श्रद्धयाॅ हूयते हविः ।श्रद्धां प्रातर् हॅवामहे । श्रद्धां मध्यन्दिॅनं परिं ।
श्रद्धाꣳ सूर्यॅस्य निम्रुचिं ।श्रद्धे श्रद्धॅापयेह मा । श्रद्धादेवानधिॅवस्ते ।
श्रद्धाविश्वॅमिदञ्जगॅत् । श्रद्धाङ्कामॅस्य मातरम् । हविषाॅ वर्धयामसि ॥
अस्मिन् स्थण्डिले श्रद्धां ध्यायामि । श्रद्धां आवाहयामि ॥
श्रद्धायाः इदमासनम् ॥

मेधा देवी जुषमॉणा न आगाद्विश्वाचीं भद्रा सुॅमनस्यमॉना ।
त्वया जुष्टॉ नुदमॉना दुरुक्तान्बृहद्वॅदेम विदथेॅ सुवीराः ।
त्वया जुष्टॅ ऋषिर्भॅवति देवि त्वया ब्रह्मॉगतश्रीॅरुत त्वया ।त्वया

जुष्टँश्चित्रं विन्दते वसु सानौं जुषस्व द्रविणो नमेधे ॥ मेधाम्म इन्द्रौ ददातु मेधान्देवी सरँस्वती । मेधां मैं अश्विनॉवुभावाधँत्तां पुष्करँस्रजा ।मयिं मेधां मयिं प्रजां मय्यग्नि स्तेजौं दधातु मयिं मेधांमयिं प्रजां मयीन्द्रँइन्द्रियन्दँधातु मयिं मेधां मयिं प्रजां मयि सूर्यो भ्राजौं दधातु ॥ अस्मिन् स्थण्डिले मेधां ध्यायामि । मेधां आवाहयामि ॥मेधायाः इदमासनम् ॥ षोडशोपचारपूजां कृत्वा चणकं नारिकेलताम्बूलादिकं निवेद्य पूजां समाप्य-यश्छन्दँसां इत्यादि मन्त्रैः एता देवताः उपस्थाय सङ्कल्पः-दर्भेष्वासीनः दर्भान्धारयमाणः

शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

ओंभूः - भूर्भुवस्सुवरों ममोपात्त समस्तदुरित क्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थम् शुभे दिने -- अस्यां --शुभतिथौ --नक्षत्रे-- राशौ जातस्य--शर्मणःअस्य मम कुमारस्य आयुष्याभिवृध्यर्थं मेधाजननसिध्यर्थं पालाशहोमकर्म करिष्ये ॥

समन्तात् समिदाधानाग्निं अपूपैः परिश्रित्यमुखान्तं कुर्यात्- भूर्भुवस्सुवरोम्- इत्यग्निं प्रतिष्ठाप्यचत्वारि शृङ्गात्रयों अस्य इत्यादि मुखान्ते चतुर्गृहीतैः कुमारं हावयेत्-

आवहँन्ती वितन्वाना ।कुर्वाणा चीरँमात्मनँः । वासाँसि मम गावँश्च ।अन्नपाने चँ सर्वदा ।ततौं मे श्रियमावँह । लोमशा म्पशुभिँस्सहस्वाहा-धात्र इदन्न मम ॥

आमॉयन्तु ब्रह्मचारिणस्स्वाहा-धात्र इदन्न मम ॥

विमॉयन्तु ब्रह्मचारिणस्स्वाहा-धात्र इदन्न मम ॥

प्रमॉयन्तु ब्रह्मचारिणस्स्वाहा-धात्र इदन्न मम ॥

दमॉयन्तु ब्रह्मचारिणस्स्वाहा-धात्र इदन्न मम ॥

शमॉयन्तु ब्रह्मचारिणस्स्वाहा-धात्र इदन्न मम ॥

यशोजनेंऽसानि स्वाहा-धात्र इदन्न मम ॥

श्रेयान् वस्यॅसोऽसानि स्वाहा-धात्र इदन्न मम ॥

तन्त्वॉभग प्रविंशानि स्वाहा-भगायेदन्न मम ॥

समॉभग प्रविंश स्वाहा-भगायेदन्न मम ॥

तस्मिन्त्सहस्त्रॅशाखे । निभॅगाहन्त्वयिं मृजे स्वाहा-

भगायेदन्न मम ॥

यथापः प्रवॅता यन्तिॅ । यथामासॉ अहर्जरम् । एवम्मां ब्रॅह्मचा

रिणॅः । धातरायॅन्तु सर्वतस्स्वाहा-धात्र इदन्न मम ॥

प्रतिवेशोंऽसि प्रमॉभाहि प्रमॉपद्यस्व-इति कुमारं अग्निं उपस्थाप्य

अनूयाजसमिधमग्नौ प्रहरति-स्वाहा-अग्नय इदन्न मम ॥

इध्मसन्नहनरज्जुमग्नौ प्रहरतिस्वाहा-रुद्राय तन्तिचराय इदन्न मम ॥

एतत्कर्मसमृद्ध्यर्थं ऋद्धिकामः जयादिहोमङ्करिष्ये ।

चित्तञ्च स्वाहा- इत्यादि ब्रह्मविसर्जनान्ते-वटुः नूतनयज्ञोपवीतं धृत्वा वस्त्र

मेखलाजिन दण्डान् पलाशमूले संस्थाप्य

वासश्चतुर्थीमुत्तरयादत्तेऽन्यत्परिधाप्य

रेवतीस्त्वा इत्याभिःनूतनान् अन्यान् समन्त्रकं धरेत् ॥

कुमारः परिहितं वासः पित्रे दद्यात्-हे गुरो वासस्ते ददामि ॥

यस्यँ ते प्रथमवास्यꣳहरॉमस्तन्त्वा भ्रातॅरस्सुवृधो वर्धमान मनु
जायन्तां बहवस्सुजॉतम्- इति तद्वासः प्रतिगृह्णीयात्॥

अनन्तरं वसन्तमाधवपूजां कुर्यात्।कलशे हरिद्रसंयुक्तं तीर्थं निक्षिप्य-

वसन्तेनर्तुनॉ देवाः ।वसॅवस्त्रिवृतास्तुतम् ।रथन्तरेण तेजॅसा ।
हविरिन्द्रे वयोंदधुः-अस्मिन्कुम्भे वसन्तमाधवदेवताः ध्यायामि ।
वसन्तमाधवदेवताःआवाहयामि ।वसन्तमाधवदेवतानां
इदमासनम्॥ इत्यादि षोडशोपचारपूजां कृत्वा -
वसन्तमाधवसूक्तजपकर्मणि सर्वेभ्यो ब्राह्मणेभ्यो नमः॥

वसन्तेनर्तुनॉ देवाः ।वसॅवस्त्रिवृतास्तुतम् ।रथन्तरेण तेजॅसा ।
हविरिन्द्रे वयोंदधुः ।ग्रीष्मेणॅ देवा ऋतुना ।रुद्राः पॅञ्चदशे
स्तुतम् । हविरिन्द्रे वयोंदधुः ।वर्षाभिॅर् ऋतुनॉदित्याः ।स्तोमैं
सप्तदशे स्तुतम् ।वैरूपेणॅ विशौजॅसा ।हविरिन्द्रे वयोंदधुः ।
शारदेनर्तुनॉ देवाः ।एकविꣳशऋभवॅस्तुतम् ।वैराजेनॅ श्रिया
श्रियम् ।हविरिन्द्रे वयोंदधुः ।हेमन्तेनर्तुनॉ देवाः । मरुतॅस्त्रिणवे
स्तुतम् ।बलेॅन शक्वॅरीस्सहॅः ।हविरिन्द्रे वयोंदधुः ।शैशिरेणर्तुना
देवाः ।त्रयस्त्रिꣳशैमृतꣳस्तुतम् ।सत्येनॅ रेवतीः क्षत्रम् ।हवि
रिन्द्रे वयोंदधुः ॥इति सूक्तं पठित्वा-अग्निमुपस्थाय-

अस्मात्कुम्भात् वसन्तमाधवदेवताः उद्वासयामि ॥यज्ञेश्वरं उद्वासयामि ॥ पञ्चपालिका देवताः उद्वासयामि ॥मण्डपदेवताः उद्वासयामि ॥इष्टदेवतां उद्वासयामि ॥कुलदेवतां उद्वासयामि ॥ कङ्कणदेवताः उद्वासयामि ॥कङ्कणमोचनम्-

कङ्कणं माचयाम्यद्य रक्षां तु नकदाचन ।
मयि रक्षां स्थिरां बध्वा देव त्वं गच्छ कङ्कण ॥

पञ्चपालिकानामुपरि वैणवपात्रं सन्धार्य सर्वैः अन्वारब्धः-

नान्दीशोभनदेवतुलारा मायिण्टिकि शुभागमनमन्दु वेडलि मम्मनि आशीर्वादिम्पदगिनदि-इत्युक्त्वा तस्मिन् वसन्तमाधवकलश तीर्थंस्रावयन् वेणुपात्रस्य अधस्तात् प्रहरेत् ॥ततस्सर्वान् वसन्तमाधवकलशतीर्थेन प्रोक्षेत् ॥ अक्षताशीर्वचनम् ॥हारती ॥ततस्त्रीभिस्सह पञ्चपालिकाः आदाय नदीं गत्वा पञ्चपालिकास्थ अङ्कुरान् विसृजेत् ॥गृहमागत्य स्त्रियः पञ्चपालिकाःभूमौ निक्षिप्य मङ्गळगानं कुर्वन्त्यः सताळं प्रदक्षिणं कुर्युः ॥

प्राजापत्याादि काण्डव्रतचतुष्टयउपक्रमप्रयोगः

गणपतिपूजनं स्वस्तिपुण्याहवाचनं ग्रहप्रीतिकर हिरण्यदानं नान्दी कर्मणः पुण्याहञ्च कृत्वा-आचायस्य कुमारस्य च सङ्कल्पः-दर्भेष्वासीनः दर्भान्धारयमाणः

शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

ओंभूः - भूर्भुवस्सुवरों ममोपात्त समस्तदुरित क्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थम् अद्य पूर्वोक्त एवंगुण विशेषण विशिष्टायां अस्यां --शुभतिथौ --नक्षत्रे--राशौ जातस्य--शर्मणः अस्य मम माणवकस्य आयुर्वर्चोयशो बालाभिवृध्यर्थम् नक्षत्रे--राशौ जातं--शर्माणं इमं माणवकं प्राजापत्य सौम्य आग्नेय वैश्वदेव काण्डव्रतचतुष्टय उपक्रमकर्माणि समानतन्त्रेण चारयिष्यामि ॥ इत्याचार्यः ॥

--नक्षत्रे--राशौ जातस्य--शर्मणः मम आयुर्वर्चोयशो बालाभिवृध्यर्थम्

नक्षत्रे--राशौ जातं--शर्मा अहं प्राजापत्य सौम्य आग्नेय वैश्वदेव काण्डव्रतचतुष्टय उपक्रमकर्माणि समानतन्त्रेण चरिष्ये ॥ इति कुमारः ॥

माणवकस्य वपनम् ॥स्नानम् ॥माणवकः निवीती भूत्वा काण्डऋषि तर्पणं कुर्यात्-

प्रजापतिं काण्डर्षिम् तर्पयामि-द्विः ॥ सोमं काण्डर्षिम् तर्पयामि-द्विः ॥ अग्निं काण्डर्षिम् तर्पयामि-द्विः ॥ विश्वान्देवान् काण्डर्षीन् तर्पयामि-द्विः ॥ साꣳहितीर्देवताः उपनिषदस्तर्पयामि-द्विः ॥ याज्ञिकीर्देवताः उपनिषद स्तर्पयामि-द्विः ॥ वारुणीर्देवताः उपनिषदस्तर्पयामि-द्विः ॥ब्रह्माणं स्वयम्भवं तर्पयामि-द्विः ॥ सदसस्पतिं तर्पयामि-द्विः ॥

यज्ञोपवीती आचम्य-

आचार्यः माणवकस्य समिदादानाग्निं प्रतिष्ठाप्य-मुखान्तं कृत्वा-

अन्वारब्धे माणवके-चतुर्गृहीतैर्जुहोति-

प्रजाꣳपतये काण्डऋषये स्वाहा-प्रजापतये काण्डऋषय इदन्न मम ॥

प्रजाꣳपते नत्वदेतान्यन्यः ।विश्वाꣳ जातानि परि ता बꣳभूव । यत्कꣳामास्ते जुहुमस्तन्नो अस्तु ।वयꣳस्याम पतयो रयीणाꣳस्वाहा- प्रजापतय इदन्न मम ॥

रयीणां पतिं यजतं बृहन्तम् । अस्मिन्भरे नृतꣳमं वाजꣳसातौ । प्रजाꣳपतिं प्रथमजामृतस्यꣳ । यजꣳाम देवमधिꣳ नो ब्रवीतुस्वाहा- प्रजापतय इदन्न मम ॥

प्रजाꣳपते त्वन्निꣳधिपाः पुꣳराणः ।देवानां पिता जꣳनिता प्रजानाम् ।पति र्विश्वꣳस्य जगꣳतः परस्पाः ।हविर्नो देव विहवे जुꣳषस्वस्वाहा-

प्रजापतय इदन्न मम ॥

तवेमे लोकाः प्रदिशो दिशꣳश्च ।परावतो निवतꣳ उद्वतꣳश्च । प्रजाꣳपते

विश्वसृज्जीवधॅन्य इदन्नौ देव ।प्रतिं हर्य हव्यꣳस्वाहा-प्रजापतय इदन्न मम ॥

प्रजापॅतिं प्रथमं यज्ञियॅानाम् ।देवानामग्रें यजतं यॅजध्वम् ।सनौ ददातु द्रविंणꣳ सुवीर्यम् ।रायस्पोषं विष्यॅतु नाभिॅमस्मे स्वाहा- प्रजापतय इदन्न मम ॥

यो राय ईशें शतदाय उक्थ्यॅः ।यःपॅशूनाꣳ रॅक्षिता विष्ठितानाम् । प्रजापॅतिः प्रथमजा ऋतस्यॅ ।सहस्रॅधामा जुषताꣳ हविर्नस्वाहा- प्रजापतय इदन्न मम ॥

सोमॉय काण्डऋषयेस्वाहा-सोमाय काण्डऋषय इदन्न मम ॥

सोमौ धेनुꣳ सोमो अर्वन्तमाशुम् । सोमौ वीरङ्कर्मण्यॅन्ददातु । सादन्यॅं विदथ्यꣳसभेयम् । पितुःश्रवॅणं यो ददॉशदस्मै स्वाहा- सोमायेदन्न मम ॥

अषॉढं युत्सु पृतॅनासु पप्रिम् । सुवर्षामप्स्वां वृजनॅस्य गोपाम् । भरेषुजाꣳ सुॅक्षितिꣳ सुश्रवॅसम् ।जयॅन्तं त्वामनुॅमदेम सोमस्वाहा- सोमायेदन्न मम ॥

त्वꣳसोॅम क्रतुॅभिस्सुक्रतुॅर्भूः ।त्वन्दक्षैस्सुदक्षो विश्ववॅेदाः । त्वं वृषॉ वृषत्वेभिॅर्महित्वा । द्युम्नेभिॅर्द्युम्न्यॅभवो नृचक्षास्स्वाहा- सोमायेदन्न मम ॥

याते धामॉनि हविषा यजॅन्ति ।ताते विश्वॉ परिभूरॅस्तु यज्ञम् ।
गयस्फानॅः प्रतरॅणस्सुवीरॅः । अवीरहा प्रचॅरा सोमदुर्यान्त्स्वाहा-
सोमायेदन्न मम ॥

त्वमिमा ओषॅधीस्सोम विश्वाः ।त्वमपो अॅजनयस्त्वङ्गाः ।
त्वमातॅतन्थोर्वॅन्तरिॅक्षम् ।त्वं ज्योतिॅषा वितमों ववर्थस्वाहा-
सोमायेदन्न मम ॥

याते धामॉनि दिवि यापॄॅथिव्याम् । या पर्वतेष्वोषॅधीष्वप्सु । तेभिॅनो
विश्वैस्सुमना अहेॅडन् । राजन्त्सोम प्रतिं हव्या गृॅभायस्वाहा-
सोमायेदन्न मम ॥

अग्नयॅे काण्डऋषये स्वाहा- अग्नये काण्डऋषय इदन्न मम ॥
अग्ने नयॅ सुपथॉ राये अस्मान् । विश्वॉनि देव वयुनॉनि विद्वान् ।
युयोध्यॅस्मज्जुॅहुराणमेनॅः । भूयिॅष्ठान्ते नमॅउक्तिं विधेम स्वाहा-
अग्नय इदन्न मम ॥

प्रवॅश्शुक्रायॅ भानवॅे भरध्वम् । हव्यं मतिञ्चाग्नये सुपूॅतम् ।
यो दैव्यॉनि मानुॅषा जनूꣳषिं । अन्तर्विश्वॉनि विद्मना जिगॉति
स्वाहा-अग्नय इदन्न मम ॥

अच्छा गिरों मतयो देवयन्तीः ।अग्निं यॅन्ति द्रविॅणं भिक्षॅमाणाः ।
सुसन्दृशꣳ सुप्रतीकꣳस्वञ्चम् । हव्यवाहॅमरतिं मानुॅषाणाꣳस्वाहा-

अग्नय इदन्न मम ॥

अग्ने त्वमस्मद्युँयोध्यमीवाः । अनॅग्नित्रा अभ्यॅमन्त कृष्टीः ।
पुनॅरस्मभ्यꣳ सुवितायॅ देव ।क्षां विश्वेँभिरजरेँभिर्यजत्रस्वाहा-
अग्नय इदन्न मम ॥

अग्ने त्वम्पॉरया नव्यॊ अस्मान् । स्वस्तिभिरतिं दुर्गाणि विश्वा ।
पूश्चॅ पृथ्वी बॅहुला नॅ उर्वी । भवॉ तोकाय तनॅयाय शंयोस्वाहा-
अग्नय इदन्न मम ॥

प्रकॉरवो मनना वच्यमॉनाः ।देवद्रीचींन्नयथ देवयन्तॅः ।
दक्षिणावाड् वाजिनी प्राच्येति । हविर्भरॅन्त्यग्नयेघृताचीस्वाहा-
अग्नय इदन्न मम ॥
विश्वेभ्यो देवेभ्यॅः काण्डऋषिभ्यस्स्वाहा- विश्वेभ्यो देवेभ्यः
काण्डऋषिभ्य इदन्न मम ॥

आनो विश्वे अस्क्रॉ गमन्तु देवाः । मित्रो अॅर्यमा वरुॅणस्सजोषाः ।
भुवन् यथॉ नो विश्वेँ वृधासॅः । करन्थ्सुषाहॉ विथुरन्न शवस्स्वाहा-
विश्वेभ्यो देवेभ्य इदनन मम ॥

शन्नौ देवा विश्वदेँवा भवन्तु । शꣳ सरॅस्वती सह धीभिरॅस्तु ।
शमॅभिषाच श्शमुॅ रातिषाचॅः । शन्नौ दिव्याः पार्थिवाश्शन्नो
अप्यास्स्वाहा- विश्वेभ्यो देवेभ्य इदनन मम ॥

ये सॅवितुस्सत्यसॅवस्य विश्वे। मित्रस्यॅ व्रते वरुॅणस्य देवाः। ते सौभॅगं वीरवद्गोमदप्नॅः। दधॉतन द्रविॅणञ्चित्रमस्मे स्वाहा-विश्वेभ्यो देवेभ्य इदनन मम॥

अग्नॅे याहि दूत्यॅं वारिॅषेण्यः। देवाꣳ अच्छा ब्रह्मकृताॅ गणेणॅ। सरॅस्वतीम्मरुतोॅ अश्विनापः। यक्षि देवान्रॅत्नधेयॉय विश्वान्त्स्वाहा-विश्वेभ्यो देवेभ्य इदनन मम॥

द्यौः पिॅतः पृथिॅवि मातरध्रुॅक्। अग्नॅे भ्रातर्वसवो मृडताॅनः। विश्वॅ आदित्या अदिते सजोषाः। अस्मभ्यꣳ शर्मं बहुलं वियॅन्त स्वाहा-विश्वेभ्यो देवेभ्य इदन्न मम॥

विश्वॅे देवाश्शृणुतेमꣳ हवॅम्मे ये अन्तरिॅक्षे य उपद्यविष्ठ। ये अॅग्निजिह्वा उतवा यजॅत्राः। आसद्यास्मिन्बर्हिषॅि मादयध्वꣳस्वाहा-विश्वेभ्यो देवेभ्य इदन्न मम॥

साꣳहितीभ्यो देवताभ्य उपनिषद्भ्यस्स्वाहा-
साꣳहितीभ्यो देवताभ्य उपनिषद्भ्य इदन्न मम॥

याज्ञिकीभ्यो देवताभ्य उपनिषद्भ्यस्वाहा-
याज्ञिकीभ्यो देवताभ्य उपनिषद्भ्य इदन्न मम॥

वारुणीभ्यो देवताभ्य उपनिषद्भ्यस्वाहा-
वारुणीभ्यो देवताभ्य उपनिषद्भ्य इदन्न मम॥

ब्रह्मॅणे स्वयम्भुवे स्वाहा- ब्रह्मणे स्वयम्भुव इदन्न मम ॥
सदॅसस्पतिमद्भुॅतंप्रियमिन्द्रॅस्य काम्यम्। सनिॅम्मेधामॅयासिषꣳ
स्वाहा-सदसस्पतयइदन्नमम ॥ अथ माणवकः अग्निमुपतिष्ठते-
अग्ने व्रतपते व्रतञ्चॅरिष्यामि। तच्छॅकेयन्तन्मे राध्यताम्।
वायो व्रतपते व्रतञ्चॅरिष्यामि। तच्छॅकेयन्तन्मे राध्यताम्।
आदिॅत्य व्रतपते व्रतञ्चॅरिष्यामि। तच्छॅकेयन्तन्मे राध्यताम् ॥
व्रतानां व्रतपते व्रतञ्चॅरिष्यामि। तच्छॅकेयन्तन्मे राध्यताम् ॥
माणवकः मदन्तीरुपस्पृश्य पूर्वशान्तिजपं कुर्यात्-नमो वाचे---शान्तिः ॥
ततश्चतस्रः औदुम्बरीस्समिधः घृतान्वक्ताः अभ्यादधाति-
पृथिवी समित्। तामग्निस्समिॅन्धे। साग्निꣳ समिॅन्धे। तामहꣳ
समिॅन्धे। सामा समिद्धा। आयुॅषा तेजॅसा। वर्चॅसा श्रिया। यशॅसा
ब्रह्मवर्चसेनॅ। अन्नाद्येॅन समिॅन्ताꣳस्वाहा-अग्नय इदन्न मम ॥
अन्तरिॅक्षꣳसमित्। तां वायुस्समिॅन्धे। सा वायुꣳ समिॅन्धे।
तामहꣳ समिॅन्धे। सामा समिद्धा। आयुॅषा तेजॅसा। वर्चॅसा श्रिया।
यशॅसा ब्रह्मवर्चसेनॅ। अन्नाद्येॅन समिॅन्ताꣳस्वाहा-वायव इदन्न मम ॥
द्यौस्समित्। तामॅदित्यस्समिॅन्धे। सादित्यꣳ समिॅन्धे। तामहꣳ
समिॅन्धे। सामा समिद्धा। आयुॅषा तेजॅसा। वर्चॅसा श्रिया। यशॅसा
ब्रह्मवर्चसेनॅ। अन्नाद्येॅन समिॅन्ताꣳस्वाहा-अग्नय इदन्न मम ॥

प्राजापत्या मैं समिदॅसि सपत्नक्षयॅणी । भ्रातृव्यहा मैंऽसि

स्वाहा-प्रजापतय इदन्न मम ॥माणवकः शुक्रियस्य प्रथमोत्तमानुवाकौ जपेत् ॥

युञ्जते मनॅ उतयुॅञ्जते धियॅः--मखोंऽसि ॥

सविता भूत्वा प्रॅथमेऽहन्प्रवॅृज्यते--ऐव तॅपति ॥

आचार्यः अनूयाजसमित्प्रहरणादि परिषेचनान्तं कृत्वा-माणवकः
मदन्तीरुपस्पृश्य उत्तरशान्तिजपं कुर्यात्-शन्नो वातॅः--शान्तिॅः ॥

ततस्सम्मीलयति वाचञ्च यच्छति ।अथास्याहतेन वाससा त्रिःप्रदक्षिणं समुखं
शिरो वेष्टयित्वा वाग्यत आसीत-वेष्टनवस्त्रमपास्य-
अग्निमादित्यमुदकुम्भमश्मानं वत्सं महानग्नांहिरण्यमिति दर्शयित्वा-
शिरोवेष्टनवस्त्रं गुरवे दत्वा-वयस्सुपर्णा इत्यादित्यमुपतिष्ठते-

वयॅस्सुपर्णा उपॅसेदुरिन्द्रम् । प्रियमेंधा ऋषॅयो नाधॅमानाः ।

अपॅध्वान्तमूर्णुहि पूर्धिचक्षुॅर्मुमुग्ध्यॅस्मान्निधयैंव बद्धान् ॥

अस्य मम माणवकस्य प्राजापत्याादि काण्डव्रतचतुष्टय
उपक्रममुहूर्तस्सुमुहूर्तोऽस्त्विति भवन्तो ब्रुवन्तु ॥

प्राजापत्याादि काण्डव्रतचतुष्टयउत्सर्जनप्रयोगः

ततआचार्यस्य कुमारस्य च सङ्कल्पः-दर्भेष्वासीनः दर्भान्धारयमाणः
शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ओंभूः - भूर्भुवस्सुवरों
ममोपात्त समस्तदुरित क्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थम् अद्य पूर्वोक्त
एवंगुण विशेषण विशिष्टायां अस्यां --शुभतिथौ --नक्षत्रे--राशौ
जातस्य--शर्मणः अस्य मम माणवकस्य आयुर्वर्चोयशो

बालाभिवृध्यर्थम् नक्षत्रे--राशौ जातं--शर्माणं इमं माणवकं प्राजापत्य सौम्य आग्नेय वैश्वदेव काण्डव्रतचतुष्टय उत्सर्जनकर्माणि समानतन्त्रेण चारयिष्यामि ॥ इत्याचार्यः ॥

--नक्षत्रे--राशौ जातस्य--शर्मणः मम आयुर्वर्चोयशो बालाभिवृध्यर्थम् नक्षत्रे--राशौ जातः--शर्मा अहं प्राजापत्य सौम्य आग्नेय वैश्वदेव काण्डव्रतचतुष्टय उत्सर्जनकर्माणि समानतन्त्रेण चरिष्ये ॥ इति कुमारः ॥उपक्रमवत् वपनादि सर्वम् कुर्यात् शुक्रियमन्त्र जप सम्मीलनवर्जम् ॥अस्य मम माणवकस्य प्राजापत्याादि काण्डव्रतचतुष्टय उत्सर्जनमुहूर्त स्सुमुहूर्तोऽस्त्विति भवन्तो ब्रुवन्तु ॥

समावर्तनप्रयोगः

ततःजनकः कुमारस्य स्नानोद्वाहकर्माङ्गं रक्षाबन्धनकर्मकुर्यात् ॥

ततः कुमारःस्वयं समावर्तनसङ्कल्पं कुर्यात् ॥दर्भेष्वासीनः दर्भान्धारयमाणः

शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ओंभूः - भूर्भुवस्सुवरों ममोपात्त समस्तदुरित क्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थम् अद्य पूर्वोक्त एवंगुण विशेषण विशिष्टायां अस्यां --शुभतिथौ --नक्षत्रे--राशौजातः--शर्मा अहं स्नास्ये ॥

वेदमधीत्य स्नास्यन् प्रागुदयात् व्रजं प्रविश्य अन्तर्लोम्ना चर्मणा द्वारमपिधाय आस्ते ।

नैनमेतदहरादित्योऽभितपेत् ॥मध्यन्दिनेऽग्नेरुपसमाधानाद्याज्यभागान्ते पालाशींसमिधमुत्तरयाधाय-

इमꣳस्तोममर्हते जातवेदसे रथꣳमिव सम्महे मामनीषया ।
भद्राहि नः प्रमतिरस्य सꣳसद्यग्ने सख्ये मारिषामा वयन्तवꣳ-

अग्नये जातवेदस इदन्न मम ॥

अपरेणाग्निं कट एरकायां वोपविश्य उत्तरया क्षुरमभिमन्त्र्य-

त्र्यायुषञ्जमदग्नेः कश्यपस्य त्र्यायुषम्। यद्देवानान्त्र्यायुषन्तन्मे अस्तु त्र्यायुषम् ॥ उत्तरेण यजुषा वप्त्रे प्रदाय-शिवो नामासि स्वधितिस्ते पिता नमस्ते अस्तु मामा हिꣳसीः ॥अपां संसर्जनाद्याकेश निधानात्समानम्-

चौळवत् पिता दिग्वपनम् समन्त्रकं कुर्यात्।सर्वाङ्गवपनं कृत्वा स्नात्वा पुनस्स्नानं कृत्वा जघनार्धे व्रजस्योपविश्य विस्रस्य मेखलां ब्रह्मचारिणे प्रयच्छति। तां स उत्तरेण यजुषा उदुम्बरमूले दर्भस्तम्बे वोपगूहति-

इदमहं ---शर्मणो --गोत्रस्य पाप्मानमपगूहाम्युत्तरोऽसौ द्विषद्भ्यः ॥

सूत्रम्-एवं विहिताभिरेवाद्भिः उत्तराभिष्षड्भिस्स्नात्वा-

आपो हि ष्ठा मयोभुवस्तान ऊर्जे दधातन।महेरणाय चक्षसे ॥

यो वश्शिवतमो रसस्तस्य भाजयतेहनः।उशतीरिव मातरः ॥

तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ।आपो जनयथा च नः ॥

हिरण्यवर्णाश्शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः।

अग्निं या गर्भन्दधिरे विरूपास्तान आपश्शꣳस्योना भवन्तु ॥

यासाꣳराजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम्।

मधुश्चुतश्शुचयो याः पावकास्तान आपश्शꣳस्योनाभवन्तु ॥

यासान्देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति।

याः पृथिवीं पयसोन्दन्तिं शुक्रास्तान आपश्शꣳ स्योना भवन्तु ॥

उत्तरयोदुम्बरेण दतो धावते-अन्नाद्यायं व्यूहध्वं दीर्घायुरहमन्नादो भूयासम्।

सोमो राजायमागम त्समे मुखं प्रवेक्ष्यति भगेन सह वर्चसा ॥

स्नानीयोच्छादितस्स्नातः। उत्तरेण यज्ञुषा अहतमन्तरं वासः परिधाय -

सौमस्य तनूरसि तनुवम्मे पाहि स्वामा तनूराविंश ॥

सार्वसुरभिणा चन्दनेन उत्तरैर्देवताभ्यः प्रदाय-

नमो ग्रहाय चाभिग्रहाय च नमश्शाकजञ्जभाभ्यां नमस्ताभ्यो देवताभ्यो या अभिग्राहिणीः ॥

उत्तरयाऽनुलिप्य-

अप्सरस्सु यो गन्धो गन्धर्वेषु च यद्यशः। दैवो यो मानुषो गन्धस्समा गन्धस्सुरभिर्जुषताम् ॥मणिं सौवर्णं सोपधानं सूत्रोतमुत्तरयोदपात्रे त्रिः परिप्लाव्य-

इयमोषधे त्रायमाणा सहमाना सहस्वती ।सा मा हिरण्यवर्चसं ब्रह्मवर्चसिनं माकरोतु ॥उत्तरया ग्रीवास्वाबध्य-अपाशोऽस्युरौ मे मा सꣳशारीश्शिवो मोपतिष्ठस्व दीर्घायुत्वाय शतशारदाय। शतꣳ शरद्भ्य आयुषे वर्चसे जीवात्वै पुण्याय ॥एवमेव बादरं मणिं मन्त्रवर्जं सव्ये पाणावाबध्य अहतमुत्तरं वासो रेवतीस्त्वेति समानम्-रेवतीस्त्वा व्यक्षण्कृत्तिका श्चाकृन्त ꣳस्त्वा। धियोऽवयन्नवग्ना अवृञ्जन्त्सहस्रमन्ताꣳ अभितो अयच्छन्॥

देवीर्देवाय परिधी सवित्रे। महत्तदासामभवन्महित्वनम्॥

या अकृन्तन्नवयन् या अतन्वत याश्च देवीरन्तांनतोऽददन्त।
तास्त्वा देवीर्जरसे संव्ययन्त्वायुष्मानिदं परिधत्स्व वासः॥
परिधत्त धत्त वाससैनꣳशतायुषं कृणुत दीर्घमायुः।
बृहस्पतिःप्रायच्छद्वासः एतत्सोमाय राज्ञे परिधातवा उ॥
जराङ्गच्छासि परिधत्स्व वासो भवा कृष्टीनामभिशस्तिपावा।
शतञ्जीव शरदस्सुवर्चा रायश्च पोषमुपसंव्ययस्व॥
परीदं वासो अधिधास्वस्तये ऽभूरापीनामभिशस्तिपावा।
शतञ्जीव शरदःपुरूचीर्वसूनि चार्यो विभजासिजीवन्॥
तस्य दशायां प्रवर्तौ प्रबध्य दर्व्यामाधाय आज्येनाभ्यानायन्नुत्तरा आहुतीर्हुत्वा-
आयुष्यं वर्चस्यꣳ सुवीर्यꣳ रायस्पोषमौद्भिद्यम्। इदꣳ हिरण्यञ्त्र्या यार्विशतान्माꣳस्वाहा-हिरण्यायेदन्न मम।
उच्चैर्वादि पृतनाजि सत्रासाहन्धनञ्जयम्। सर्वास्समृद्धीर् ऋद्धयो हिरण्येऽस्मिन्त्समाहिंतास्स्वाहा-हिरण्यायेदन्न मम।
शुनमहꣳ हिरण्यस्य पितुरिव नामाग्रभैषम्। तम्माहिरण्यवर्चसं पूरुषु प्रियं कुरुस्वाहा-हिरण्यायेदन्न मम।
प्रियम्मा देवेषु कुरु प्रियम्मा ब्रह्मणे कुरु। प्रियं विश्येषु शूद्रेषु प्रियꣳ राजसु माकुरुस्वाहा-हिरण्यायेदन्न मम।
या तिरश्चीं निपद्यसेऽहं विधरणी इति। तान्त्वा घृतस्य धारया

यजे सꣳराधॅनीमहꣳस्वाहा-सꣳराधन्या इदन्न मम।

सꣳराधॅन्यै देव्यै स्वाहा-सꣳराधन्यै देव्या इदन्न मम।

प्रसाधॅन्यै देव्यै स्वाहा-प्रसाधन्यै देव्या इदन्न मम।

संराजॅञ्च विराजॅञ्चाभिश्रीर्या चॅ नो गृहे। लक्ष्मी राष्ट्रस्य या मुखे तयॉ मा सꣳसृॅजामसि स्वाहा-श्रियै लक्ष्म्या इदन्न मम॥

जयादि प्रतिपद्यते परिषेचनान्तं कृत्वा एताभिरेव दक्षिणे कर्णे आबध्नीत एताभिस्सव्ये-

आयुष्यॅ वर्चस्यꣳ सुवीर्यꣳ रायस्पोषमौद्भिॅद्यम्। इदꣳ हिरॅण्यञ्जैत्र्याया विॅशतान्माम्॥ उच्चैर्वादि पॅतनाजि सॅत्रासाहन्धॅनञ्जयम्। सर्वास्समृॅद्धी र् ऋद्धॅयो हिरॅण्येऽस्मिन्त्समाहिॅताः॥शुनमहꣳ हिरॅण्यस्य पितुरिॅव नामाग्रभैषम्। तम्माहिरॅण्यवर्चसं पूरुषॅु प्रियं कॅुरु॥प्रियम्मॉ देवेषॅु कुरु प्रियम्मा ब्रह्मॅणे कुरु। प्रियं विश्यॅेषु शूद्रेषॅु प्रियꣳ राजॅसु माकुरु॥ या तिरश्चीं निपद्यॅसेऽहं विधरॅणी इतिॅ। तान्त्वॉ घृतस्य धारॅया यजे सꣳराधॅनीमहम्॥सꣳराधॅन्यै देव्यै स्वाहा।प्रसाधॅन्यै देव्यै स्वाहा॥ संराजॅञ्च विराजॅञ्चाभिश्रीर्या चॅ नो गृहे। लक्ष्मी राष्ट्रस्य या मुखे तयॉ मा सꣳसृॅजामसि-द्विः॥

एवमुत्तरैर्यथालिङ्गं स्रजश्शिरसि-शुर्भिके शिर आरोॅह शोभयॅन्ती मुखम्ममॅ।

मुखꣳहि ममॅ शोभय भूयाꣳसञ्च भगॅं कुरु॥

ललाटे भाषिकम्-यामाहॅरज्जमदॅग्निश्श्रद्धायैं कामायान्यै। इमान्तामपिंनह्ये हम्भगेंन सह वर्चसा ॥आञ्जनम्-यदाञ्जॅनं त्रैककुदञ्जातꣳ हिमवॅत उपरिं। तेनॅवामाञ्जे तेजॅसे वर्चॅसे भगॉय च ॥

आदर्शविक्षणम्-यन्मे वर्चः परागॅतमात्मानॅमुपतिष्ठॅति। इदन्तत्पुनरादॅदे दीर्घायुत्वाय वर्चॅसे ॥उपानहौ - प्रतिष्ठेस्थौ देवताॅनाम्मामा सन्तात्तम् ॥

छत्रं-प्रजापॅतेश्शरॅणमसि ब्रह्मॅणश्छर्दिर्विश्वजन्यॅस्य छायासिं सर्वतो मा पाहि ॥

दण्डमिति-देवस्यॅत्वा सवितुः प्रॅसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्या मादॅदे द्विषतो वधायेन्द्रॅस्य वज्रोऽसि वार्त्रघ्नश्शर्मं मे भव यत्पापं तन्निवॉरय ॥

वाचं यच्छत्यानक्षत्रेभ्यः।उदितेषु नक्षत्रेषु प्राचीमुदीचीं वा दिशमुपनिष्क्रम्य उत्तरेणार्घर्चेन दिश उपस्थाय-

देवीष्षडुर्वीरुरुणॅः कृणोत विश्वॅे देवास इह वीॅरयध्वम्।

उत्तरेण नक्षत्राणि चन्द्रमसमिति-

माहास्महि प्रजया मातनूभिर्मा रॅधाम द्विषते सौमराजन्॥

रातिना सम्भाष्य यथार्थङ्गच्छति ॥

स्नातकाऽग्निकार्यम्

स्नातकोऽहं प्रातरग्निकार्यं करिष्ये-तिस्रस्तिस्रो रेखा लिखित्वा-अद्भिरवोक्ष्य-शकलमाग्नेय्यान्निरस्य-अपउपस्पृश्य- भूर्भुवस्सुवरोम्-इत्यग्निं प्रतिष्ठाप्य

चत्वारि शृङ्गात्रयो अस्यपादा द्वे शीर्षे सप्तहस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्याꣳआविवेश॥

सप्तहस्तश्चतुश्शृङ्गः सप्तजिह्वो द्विशीर्षकः।
त्रिपात्प्रसन्नवदनः सुखासीनश्शुचिस्मितः॥
स्वाहान्तु दक्षिणे पार्श्वेदेवीं वामे स्वधान्तथा।
बिभ्रद्दक्षिणहस्तैस्तु शक्तिमन्नं स्रुचं स्रुवम्॥
तोमरं व्यजनं वामे घृतपात्रन्तु दक्षिणे।
मेषारूढं जटाबद्धं गौरवर्णं महौजसम्॥
धूमध्वजं लोहिताक्षं सप्तार्चिस्सर्वकामदम्।
आत्माभिमुखमासीनं एवं ध्यायेत् हुताशनम्॥

एषहि देवः प्रदिशोऽनु सर्वाः पूर्वो हि जातस्स उ गर्भे अन्तः।
सविजायमानस्स जनिष्यमाणः प्रत्यङ्मुखास्तिष्ठति विश्वतोमुखः॥
एह्यग्ने प्राङ्मुखदेव अग्ने मम अभिमुखो भव।सुमुखो भव।सुप्रसन्नो भव।वरदो भव। यथोक्तजिह्वया हविर्गृहाण-इति अक्षतोदकं अग्नेः पुरस्तान्निनीय-

भूर्भुवस्सुवः तत्सवितुर्वरेण्यं- भर्गोदेवस्य धीमहि धियो यो नः
प्रचोदयात्-इति प्रति दिशं हस्तेन परिमृज्य अलंकृत्य

अग्नये नमः। हुतवहाय नमः।हुताशनाय नमः। कृष्णवर्त्मने नमः। देवमुखाय नमः।सप्तजिह्वाय नमः। वैश्वानराय नमः।जातवेदसे नमः।मध्ये श्री यज्ञपुरुषाय नमः॥अथाग्निं परिषिञ्चति-

अदितेऽनुमन्यस्व।अनुमतेऽनुमन्यस्व।सरस्वतेऽनुमन्यस्व।

देवॅसवितः प्रसुॅव ॥ व्याहृतीभिः व्यस्ताभिः समस्ताभिश्च हस्तेन व्रहीन् जुहुयात्-ओं भूस्स्वाहा-अग्नय इदन्न मम ।भुवस्स्वाहा-वायव इदन्न मम ॥ सुवस्स्वाहा-सूर्यायेदन्न मम ।ओं भूर्भुवस्सुवस्स्वाहा-प्रजापतय इदन्न मम ॥उत्तरपरिषेचनम्- अदितेऽन्वॅमꣳस्थाः । अनुॅमतेऽन्वॅमꣳस्थाः । सरॅस्वते ऽन्वॅमꣳस्थाः । देवॅसवितः प्रासॅावीः ॥ स्वाहा-अग्नेरुपस्थानङ्करिष्ये ।अग्ने

त्वन्नोअन्तॅमः ।उतत्राताशिवोभॅववरूथ्यॅः । तन्त्वॅाशोचिष्ठदीदिवः । सुम्नायॅ नूनमीमहेसखिॅभ्यः । वसुॅरग्निर्वसुॅश्रवाः ।अच्छॅानक्षि द्युमत्तॅमो रयिन्दाः । सनोॅबोधिश्रुधीहवॅमुरुष्याणोॅअघायतस्समॅस्मात् ॥

स्वस्तिश्रद्धांमेधांयशःप्रज्ञांविद्यांबुद्धिंश्रियंबलम् ।
आयुष्यन्तेज आरोग्यन्देहि मे हव्यवाहन ॥
श्रिय न्देहि मे हव्यवाहन ओं नम इति ॥
चतुस्सागरपर्यन्तंगोब्राह्मणेभ्यश्शुभंभवतु--आर्षेय--प्रवरान्वितः--गोत्रःआपस्तम्बसूत्रःयजुश्शाखा ऽध्यायी-- शर्मा नामा अहं भो अभिवादये ॥

अग्नेनयॅसुपथॅा राये अस्मान् विश्वॅानि देव वयुनॅानि विद्वान् ।
युयोध्यॅस्मज्जुॅहुराणमेनोभूयिॅष्ठान्ते नमॅउक्तिं विधेम ॥

अग्नये नमः ॥मन्त्रहीनं क्रियाहीनं भक्तिहीनं हुताशन ।
यद्धुतन्तु मया देव परिपूर्णन्तदस्तु ते ॥
प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै ।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥ कृष्ण कृष्ण कृष्ण ॥
रक्षां धरेत् ॥

कूश्माण्डहोमः

दर्भेष्वासीनः दर्भान्धारयमाणः
शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ओंभूः - भूर्भुवस्सुवरों ममोपात्त समस्तदुरित क्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थम् अद्य पूर्वोक्त एवंगुण विशेषण विशिष्टायां अस्यां --शुभतिथौ --नक्षत्रे--राशौ--जातस्य--शर्मणः मम दृष्टरजस्कायाः कन्यकायाः उद्वाहयोग्यतायै तामुद्वहन्वरश्चापि कूश्माण्डैर्जुहुयात्सकृत् इति आश्वलायनोक्तरीत्या सकृत्कूश्माण्डैर्होष्ये ॥

तिस्रस्तिस्रो रेखा लिखित्वा-अद्भिरवोक्ष्य-शकलमाग्नेय्यान्निरस्य-अपउपस्पृश्य- भूर्भुवस्सुवरोम् इत्यग्निं प्रतिष्ठाप्य इत्यादि मुखान्ते-आज्येन जुहोति-

यद्देवाः-देवहेळॅनं-देवॉसः-चकृम-वयम्। आदित्याः-तस्मात्-
मामुञ्चत-ऋतस्यॅ-ऋतेनॅ-मामित-स्वाहा-देवेभ्यः-आदित्येभ्यः-इदन्न
मम ॥ देवाः-जीवनकाम्याः-यत्-वाचा-अनॄतं-ऊदिम। तस्मान्नः-
इहमुॅञ्चत-विश्वेदेवाः-सजोषॅसः-स्वाहा- विश्वेभ्यः-देवेभ्यः-इदन्न
मम ॥ ऋतेनॅ- द्यावापृथिवी- ऋतेनॅ- त्वं- सरस्वति। कृतान्नॅः-
पाहि- एनॅसः- यत्किञ्चॅ- अनॄतं- ऊदिम- स्वाहा-
द्यावापृथिवीभ्यां-
सरस्वत्यै- इदन्न मम ॥ इन्द्राग्नी- मित्रावरुॅणौ- सोमों धाता-
बृहस्पतिः। ते नॅः- मुञ्चन्तु- एनॅसः- यत्- अन्यकृॅतं- आरिम-

स्वाहा- इन्द्राग्निभ्यां मित्रावरुणाभ्यां सोमाय धात्रे बृहस्पतये च इदन्न मम ॥सजातशꣳसात्- उत-जामिशꣳसात्- ज्यायꣳसः-शꣳसात्- उतवा कनीꣳयसः। अनाज्ञातं- देवकृꣳतं- यदेनꣳः-तस्मात्त्वं- अस्मान्- जातवेदः- मुमुग्धि-स्वाहा- अग्नये-जातवेदस-इदन्न मम ॥ यद्वाचा- यन्मनꣳसा- बाहुभ्यां- ऊरुभ्यां-अष्ठीवद्भ्यां- शिश्नैः- यदनृꣳतं- चकृम- वयम्। अग्निर्मा- तस्मात्-एनꣳसः- प्रमुꣳञ्चतु-चकृम- यानिꣳ- दुष्कृता- स्वाहा- अग्नये- इदन्न मम ॥ येनꣳत्रितः-अर्णवात्- निर्बभूवꣳ- येनसूर्यꣳ- तमꣳसः- निर्मुमोचꣳ। येनेन्द्रꣳः- विश्वाः-अजꣳहात्- अरꣳतीः- तेनाऽहं- ज्योतिषा- ज्योतिꣳः-आनशानः-आक्षि- स्वाहा- अग्नये- ज्योतिषे- इदन्न मम ॥ यत्कुसींदं- अप्रꣳतीत्तं- मयेह- येनꣳ- यमस्यꣳ- निधिना- चरꣳामि। एतत्- तदग्ने- अनृणः- भवामि- जीवꣳन्नेव- प्रतिꣳ- तत्ते- ददामि-स्वाहा- अग्नये- इदन्न मम ॥ यन्मयिꣳ- माता- गर्भꣳसति। एनꣳश्चकारꣳ-यत्पिता। अग्निर्मा- तस्मात्- एनꣳसः। गारꣳहपत्यः- प्रमुꣳञ्चतु। दुरिता-यानिꣳ-चकृम- करोतुꣳ-मां- अनेनसं- स्वाहा- अग्नये- गारꣳहपत्याय-इदन्न मम ॥ यदꣳपिपेषꣳ- मातरं-पितरम्। पुत्रः- प्रमुꣳदितः- धयनꣳ। अहिꣳंसितौ- पितरौ- मयातत्। तदग्ने- अनृणः- भवामि- स्वाहा-अग्नये- इदन्न मम ॥ यदन्तरिꣳक्षं- पृथिवीं- उतद्याम्। यन्मातरं-

पितरँ वा- जिहिꣳसिम। अग्निर्मा- तस्मात्- एनँसः- गार्हँपत्यः- प्रमुँञ्चतु- दुरिता- यानिँचकृम- करोतुँ-मां- अनेनसं- स्वाहा- अग्नये-

गार्हपत्याय- इदन्न मम॥ यदाशसा- निशसा- यत्पँराशसा। यदेनँः- चकृम- नूतँनं- यत्पुँराणम्। अग्निर्मा- तस्मात्- एनँसः- गार्हँपत्यः- प्रमुँञ्चतु- दुरिता- यानिँचकृम- करोतुँ-मां- अनेनसं- स्वाहा- अग्नये- गार्हपत्याय- इदन्न मम॥ अतिँक्रामामि- दुरितं- यदेनँः। जहाँमि- रिप्रं- परमे- सधस्थे। यत्रयन्तिँ- सुकृतँः- नापिँ- दुष्कृतँः। तमारोँहामि- सुकृतान्नु- लोकं स्वाहा- अग्नये- इदन्न मम॥ त्रितेदेवाः- अमृजत- एतदेनँः। त्रित एतत्- मनुष्येँषु- मामृजे। ततौमा- यदि किञ्चित्- आनशे। अग्निर्मा- तस्मात्- एनँसः- गार्हँपत्यः- प्रमुँञ्चतु- दुरिता- यानिँचकृम- करोतुँ-मां- अनेनसं- स्वाहा- अग्नये- गार्हपत्याय- इदन्न मम॥ दिविजाताः-अप्सुजाताः। या जाताः- ओषँधीभ्यः। अथो याः- अग्निजाः-आपँः। तानँः- शुन्धन्तु- शुन्धँनीः- स्वाहा-अद्भ्यः- शुन्धनीभ्यः-इदन्न मम॥ यदापँः- नक्तं- दुरितं- चरँाम। यद्वादिवा- नूतँनं- यत्पुँराणम्।

हिरँण्यवर्णाः-

ततँः- उत्पुँनीतनः- स्वाहा- अद्भ्यः- हिरण्यवर्णाभ्यः- इदन्न मम॥

इमम्मे वरुण-श्रुधी हवम्-अद्या च॑-मृडय। त्वां-अव स्युः- आच॑के-
स्वाहा-वरुणाय- इदन्न-मम ॥ तत्वा॑यामि-ब्रह्म॑णा- वन्दमानः-
तदाशास्ते -यज॑मानः-हविर्भिः। अहे॑डमानः-वरुण-इह बो॑धि-
उरु॑शꣳस- मान आयुः-प्रमो॑षीः- स्वाहा- वरुणाय- इदन्न मम ॥
त्वन्नो॑ अग्ने-वरु॑णस्य- विद्वान्-देवस्य॑- हे॒डः-अव॑-यासिसीष्ठाः।
यजि॑ष्ठः-वह्नि॑तमः- शोशु॑चानः-विश्वा- द्वेषाꣳसि- प्रमु॑मुग्धि-अस्मत्-
स्वाहा- अग्नीवरुणाभ्यां- इदन्न मम ॥संत्वन्नः॑- अग्ने-अवमः- भवोती-
नेदि॑ष्ठः- अस्याः- उषस॑ः-व्यु॑ष्टौ। अव॑ यक्ष्व नः-वरु॑णं-रराणः-वीहि
मृडीकं- सुहवो॑ नः- एधि स्वाहा- अग्नीवरुणाभ्यां- इदन्न मम ॥
त्वम॑ग्ने- अयासि॑-अयासन्-मन॑सा हितः। अयासन् -हव्यमू॑हिषे-
अया नो॑ धेहि- भेषजं-स्वाहा- अग्नये अयस इदन्न मम ॥
यददी॒व्यन्-ऋणमहं- बभूव॑- अदि॑त्सन्वा- सञ्जग॑र- जनेभ्यः। अग्निर्मा-
तस्मात्- इन्द्र॑श्च- संविदानौ- प्रमु॑ञ्चतां- स्वाहा- अग्नीन्द्राभ्यां- इदन्न
मम ॥यद्धस्ताभ्यां- चकर॑- किल्बि॑षाणि- अक्षाणां- वग्नुं- उपजिघ्र॑मानः-
उग्रंपश्या च॑- राष्ट्रभृच्च॑- तानि॑- अप्सरसौ- अनु॑दत्तां- ऋणानि॑- स्वाहा-
उग्रंपश्या- राष्ट्रभृद्भ्यां- अप्सरोभ्यां- इदन्न मम ॥
उग्र॑म्पश्ये- राष्ट्र॑भृत्- किल्बि॑षाणि- यत्- अक्षवृ॑त्तं- अनु॑दत्तं-एतत्।
नेन्न॑ ऋणान्- ऋणव॑ः- इत्स॑मानः- यमस्य॑ लोके- अधि॑रज्जुरायं-

स्वाहा- उग्रंपश्या- राष्ट्रभृद्भ्यां- अप्सरोभ्यां- इदन्न मम ॥ अवॅते-
हेडॅः- वरुण- नमौभिः- अवॅ- यज्ञेभिः- ईमहे- हविर्भिः । क्षयन्ॅ-
अस्मभ्यं- असुरप्रचेतः- राजन्ॅ- एनाꣳसि- शिश्रथः- कृतानिं-स्वाहा-
वरुणाय- इदन्न मम ॥उदुॅत्तमं- वरुणपाशं- अस्मत्- अवॉधमं-
विमॅध्यमं- श्रथाय । अथॉवयं- आदित्य- व्रते तवॅ- अनॉगसः- अदितये-
स्याम- स्वाहा- वरुणाय- इदन्न मम ॥इमम्मे वरुण-श्रुधी हवम्-
अद्या चॅ-मृडय । त्वां-अव स्युः- आचॅके- स्वाहा-वरुणाय- इदन्न
मम ॥ तत्वॉयामि-ब्रह्मॅणा- वन्दॅमानः-तदाशास्ते -यजॅमानः-हविर्भिः ।
अहेॅडमानः-वरुण-इह बॉधि-उरुꣳशꣳस- मान आयुॅः-प्रमॉषीः-स्वाहा-
वरुणाय- इदन्न मम ॥त्वन्नॉ अग्ने-वरुॅणस्य- विद्वान्-देवस्यॅ-हेडॅः-
अवॅ-यासिसीष्ठाः ।यजिॅष्ठः-वह्नितमः- शोशुॅचानः-विश्वा- द्वेषाꣳसि-
प्रमुॅमुग्धि-अस्मत्-स्वाहा- अग्नीवरुणाभ्यां- इदन्न मम ॥
सत्वन्नॅः- अग्ने-अवमः- भवोती- नेदिॅष्ठः- अस्याः- उषसॅः-व्युॅष्टौ ।
अवॅ यक्ष्व- नः-वरुॅणं-ररॉणः-वीहि- मृडीकं-सुहवॉ नः-एधि स्वाहा-
अग्नीवरुणाभ्यां- इदन्न मम ॥संकुॅसुकः- विकुॅसुकः- निरृॅथः-
यश्चॅ- निस्वॅनः । तेर-एस्मत्- यक्ष्मं- अनॉगसः- दूरात्- दूरं- अचीचतं-
स्वाहा- संकुसुक- विकुसुक- निरृॅथ- निस्वनेभ्यः- इदन्न मम ॥
निर्यॅक्षमं- अचीचते- कृत्यां- निरृॅतिञ्च । तेनयोर-ओस्मत्- समॅृच्छातै-

तमॅस्मै- प्रसुॅवामसि- स्वाहा-निर्यक्ष्माय- इदन्न मम ॥ दुश्शꣳस-
अनुशꣳसाभ्यां- घणेनॅ- अनुघणेनॅ च । तेनान्योर- ओस्मत्-समॄच्छातै-
तमॅस्मै- प्रसुॅवामसि- स्वाहा- दुश्शꣳस- अनुशꣳस- घण-
अनुघणेभ्यः- इदन्न मम ॥ संवर्चॅसा- पयॅसा- सन्तनूभिः- अगॅन्महि-
मनॅसा- सꣳशिवेनॅ । त्वष्टॉ नः- अत्रॅ- विदॅधातु- रायः- अनुॅमार्ष्टु-
तन्वोर-ओयत्- विलिॅष्टं-स्वाहा- त्वष्ट्रे- इदन्न मम ॥ आयुॅष्टे-विश्वतॉ
दधत्- अयमग्निः- वरेण्यः । पुनॅस्ते- प्राणः- आयॉति- परा यक्ष्मं-
सुवामि ते- स्वाहा- आयर्दधते- अग्नये- इदन्न मम ॥ आयुर्दाः- अग्ने-
हविषॅः- जुषाणः- घृतप्रॅतीकः- घृतपॄॅष्ठः- अग्ने । घृतंपिबनॄॅ- अमृतं-
चारुॅ- गव्यं- पितेवॅपुत्रं- अभिरॅक्षतात्- इमं- स्वाहा-
आयर्दे- अग्नये- इदन्न मम ॥ अग्ने- आयूꣳषि- पवसे- आसुॅव- ऊर्ज-
इषॅञ्च नः । आरे- बाधस्व- दुच्छुनां- स्वाहा- अग्नये- पवमानाय-
इदन्न मम ॥ अग्ने- पवॅस्व- स्वपाः- अस्मे- वर्चः- सुवीर्यम् । दधॅत्-
रयिं- मयि पोषं-स्वाहा-अग्नये- पवमानाय- इदन्न मम ॥ अग्निर् ऋषिः-
पवॅमानः- पाञ्चॅजन्यः- पुरोहितः । तमीमहे- महागयं- स्वाहा- अग्नये-
पवमानाय- इदन्न मम ॥ अग्नॅे जातान्- प्रणुॅदानः- सपत्नानॄॅ-
प्रत्यजॉतान्- जातवेदः- नुदस्व । अस्मेदींदिहि- सुमनाः- अहॅेडन्-
राजन्त्सोम- प्रतिॅहव्या- गृभाय-स्वाहा- अग्नये- जातवेदसे- इदन्न

मम ॥ सहँसा जातान्- प्रणुँदानः- सपत्नान्ँ- प्रत्यजाँतान्- जातवेदः-
नुदस्व । अधिनः- ब्रूहि- सुमनस्यमानः- वयꣳस्याम- प्रणुँदानः-
सपत्नान्ँ- स्वाहा-अग्नये- जातवेदसे-इदन्न मम ॥ अग्ने योनँः- अभितो
जनँः । वृको वारँः- जिघाꣳसति । ताꣳस्त्वं- वृत्रहञ्जहि- वस्वस्मभ्यं-
आभँर- स्वाहा-अग्नये- वृत्रघ्ने- इदन्न मम ॥ अग्ने योनँः- अभिदासँति-
समानः- यश्चनिष्ट्यँः । तं वयं- समिधँ कृत्वा- तुभ्यँमग्ने- अपिदधमसि-
स्वाहा- अग्नये- इदन्न मम ॥ यो नश्शपात्- अशँपतः- यश्चँ नः-
शपँतः- शपात् । उषाश्चँ- तस्मै- निम्रुक्चँ- सर्वम्पापं- समूँहतां-स्वाहा-
उषः-निम्रुग्भ्यां- इदन्न मम ॥ योनँस्सपत्नँः- यो रणँः- मतँः- अभिदासँति-
देवाः । इध्मस्येव- प्रक्षायँतः । मातस्योच्छेषि- किञ्चन- स्वाहा- देवेभ्यः-
इदन्न मम ॥ यो मां- द्वेष्टि- जातवेदः- यञ्चाऽहं- द्वेष्मि- यश्च माम् ।
सर्वान्ँ- तानँग्ने- सन्दँह- याꣳश्चँ- अहं द्वेष्मि- ये च मां- स्वाहा-
अग्नये- जातवेदसे-इदन्न मम ॥ यो अस्मभ्यं- अरातीयात्- यश्चँ नः-
द्वेषँते- जनँः । निन्दाद्यः- अस्मान्- दिप्साच्च- सर्वान्ँ- तान्- मष्मषा
कृँरु- स्वाहा- अग्नये- इदन्न मम ॥ सꣳशिँतं- मे ब्रह्मँ- सꣳशिँतं-
वीर्या- अम्बलम् । सꣳशिँतं- क्षत्रम्मे- जिष्णु- यस्याहमस्मि- पुरोहितः-
स्वाहा- ब्रह्मक्षत्राभ्यां- इदन्न मम ॥ उदँषां- बाहू अँतिरं- उद्वर्चँः-
अथोबलम् । क्षिणोमि- ब्रह्मँणा- अमित्रान्ँ- उन्नँयामि- स्वाꣳअहं-

स्वाहा- ब्रह्मणे- इदन्न मम ॥ पुनर्मनः- पुनः- आयुर्मे- आगात्- पुनः प्राणः-पुनः-आकूतम्मे- आगात्- पुनः-चक्षुः-पुनः-श्रोत्रम्मे-आगात्- पुनश्चित्तं- पुनः- आधीतम्मे-आगात्। वैश्वानरः- मेऽदब्धः- तनूपाः- अवबाधतां- दुरितानि- विश्वा- स्वाहा- अग्नये- वैश्वानराय- अदब्धाय- तनूपे- इदन्न मम ॥ सिंहे- व्याघ्रे- उतया- पृदाकौ। त्विषिः- अग्नौ- ब्राह्मणे- सूर्ये या। इन्द्रं या- देवी- सुभगा- जजान। सान आगन्- वर्चसा- संविदाना- स्वाहा- इन्द्रजनन्यै- देव्यै- इदन्न मम ॥

या राजन्ये- दुन्दुभौ- आयतायाम्। अश्वस्य- क्रन्दे- पुरुषस्य- मायौ। इन्द्रं या- देवी- सुभगा- जजान। सान आगन्- वर्चसा- संविदाना- स्वाहा- इन्द्रजनन्यै- देव्यै- इदन्न मम ॥ या हस्तिनि- द्वीपिनि- या हिरण्ये। त्विषिः- अश्वेषु- पुरुषेषु- गोषु। इन्द्रं या- देवी- सुभगा- जजान। सान आगन्- वर्चसा- संविदाना- स्वाहा- इन्द्रजनन्यै- देव्यै- इदन्न मम ॥ रथे अक्षेषु- वृषभस्यं- वाजे। वाते- पर्जन्ये- वरुणस्य- शुष्मे। इन्द्रं या- देवी- सुभगा- जजान। सान आगन्- वर्चसा- संविदाना- स्वाहा- इन्द्रजनन्यै- देव्यै- इदन्न मम ॥ अग्ने-अभ्यावर्तिन्- अभि नः- आवर्तस्व-आयुषा- वर्चसा- सन्या- मेधया प्र जया- धनेन-स्वाहा-अग्नये -अभ्यावर्तिने- इदन्न मम ॥अग्नेऽङ्गिरः-शतन्ते- सन्तु-आवृतः-सहस्रन्ते- उपावृतः ।तासां- पोषस्य- पोषेण- पुनर्नः-

नष्टमाकृधि- पुनर्नः-रयिमाकृधि-स्वाहा- अग्नये- अङ्गिरसे- इदन्न मम ॥ पुनरूर्जा- निवर्तस्व- पुनरग्ने-इषायुषा । पुनर्नः- पाहि- विश्वतः स्वाहा-अग्नये इदन्न मम ॥सहरय्या- निवर्तस्व-अग्ने- पिन्वस्व- धारया । विश्वप्स्निया:- विश्वतस्परि- स्वाहा- अग्नय इदन्न मम ॥ समित्पाणिः यजमानलोकेऽवस्थाय उपतिष्ठते- वैश्वानराय- प्रतिवेदयामः- यदीनृणं- सङ्गरः- देवतासु । स एतान्-पाशान्- प्रमुचन्- प्रवेद- स नो मुञ्चातु- दुरितात्- अवद्यात् । वैश्वानरः- पवयान्नः- पवित्रैः- यत्सञ्जरं- अभिधावामि- आशाम् ॥ अनाजानन्- मनसा- याचमानः- यदत्रैनः- अव- तत्सुवामि । अमी ये- सुभगे- दिवि- विचृतौ- नाम- तारके । प्रेह- अमृतस्य- यच्छतां- एतद्बुध्नक- मोचनम् । विजिहीर्ष्व- लोकान्कृधि- बन्धात्- मुञ्चासि- बद्धकम् ॥ योनेरिव- प्रच्युतः- गर्भः- सर्वान्- पथः- अनुष्व ॥ स प्रजानन्- प्रतिगृभ्णीत- विद्वान्- प्रजापतिः- प्रथमजाः- ऋतस्य । अस्माभिः- दत्तं- जरसः- परस्तात्- अच्छिन्नं- तन्तुं- अनु- सञ्चरेम ॥ततन्तन्तुं- अन्वेके- सञ्चरन्ति- येषान्दत्तं- पित्र्यं- आयनवत् । अबन्ध्वेके- ददतः- प्रयच्छात्- दातुश्चेत्- शक्वाꣳसः- स्वर्ग एषाम् ॥ आरभेथां- अनु- सꣳरभेथां- समानं- पन्थां- अवथः-घृतेन । यद्वां- पूर्तं- परिविष्टं- यदग्नौ- तस्मै- गोत्राय- इह- जायापती- सꣳरभेथाम् ॥

यदन्तरिक्षं- पृथिवी- उतद्यां- यन्मातरं- पितरँ वा-जिहिꣳसिम । अग्निर्मा-
तस्मात्- एनँसः- गार्हपत्यः-उन्नौ नेषत्- दुरिता- यानिँचकृम ॥
भूमिर्माता- अदितिर्नः- जनित्रं- भ्रातान्तरिक्षं- अभिशँस्त एनः । द्यौर्नः-
पिता- पितृयात्- शम्भँवासि- जामि मित्वा- मार्विवित्सि- लोकात् ॥
यत्रँ सुहार्दः- सुकृतँः- मदँन्ते- विहाय रोगं- तन्वा२- आꣳस्वायाम् ।
अश्लेगाङ्गैः- अह्रुँता- स्वर्गे- तत्रँ पश्येम- पितरँञ्च-पुत्रम् ॥ यदन्नमद्मि-
अनृँतेन देवाः- दास्यन्- अदास्यन्- उतवा- अकरिष्यन् । यद्देवानां-
चक्षुँषि- आगो अस्तिँ- यदेव किञ्चँ- प्रतिजग्राहं- अग्निर्मा- तस्मात्-
अनृणं-कृणोतु ॥ यदन्नमद्मि- बहुधा- विरूँपं- वासो हिरँण्यं- उतगां-
अजामविम् । यद्देवानां- चक्षुँषि- आगो अस्तिँ-यदेव किञ्चँ- प्रतिजग्राहं-
अग्निर्मा- तस्मात्- अनृणं-कृणोतु ॥ यन्मया- मनँसा वाचा-
कृतमेनँः- कदाचन । सर्वस्मात्- तस्मात्- मेळिँतः- मोग्धि- त्वꣳहि-
वेत्थँ- यथातथम् ॥ यथेतं प्रत्येत्य एतेनैव अग्नौ समिधमादधाति-
यन्मया- मनँसा वाचा- कृतमेनँः- कदाचन । सर्वस्मात्- तस्मात्-
मेळिँतः- मोग्धि- त्वꣳहि- वेत्थँ- यथातथम् ॥

अनूयाजसमिधमग्नौ प्रहरति इत्यादि जयादि प्रतिपद्यते परिषेचनान्तं कृत्वा-
ब्रह्मोद्वासनान्ते-कृच्छ्रप्रत्याम्नायत्वेन हिरण्दानं कृत्वा अग्निमुपतिष्ठेत् ॥

कन्या दाता-दद्यात्तद्दतुसंख्या गाःशक्तः कन्यापिता यदि । दातव्यैकापि

निस्स्वेन दाने तस्या यथाविधि ॥ दृष्टरजस्का कन्या- अदृष्टरजसे दद्यात् कन्यायै रत्नभूषणम् ॥

देवालये-वधूजनकजनन्यौ इष्टकुलदेवता प्रार्थनापूर्वकं विघ्नेश्वरपूजां कृत्वा-सङ्कल्पं कुर्यात्-सीमान्ते आगतं वरं पूजयिष्ये ॥

लक्ष्मीनारायणस्वरूप वर स्वागतम् ॥वरपूजा वस्त्रं आशीर्वचन पुरस्सरं दद्यात् ॥अर्चत प्रार्चत-शतायस्वाहेत्याॅह-श्रेयो वसीयः-कल्याणः ॥

वधू पक्षीयाः वरपक्षीयाणां सर्वेषां गन्धकुंकुमपुष्प फलयुक्तक्षीरादिकं दद्युः ॥

स्यालकः वरं गन्धादिभिः पुष्पादिभिश्च अलंकुर्यात् ।वधूमाता वराय फलयुक्तक्षीरं त्रिवारं दद्यात्- वरः प्राश्याऽऽचामेत् ॥हारती ॥आलये देवदर्शनं कृत्वा यथाविभवं वरं विवाहमण्डपमागमय्य-वरवधूजनकजनन्यौ मण्डपे उपविश्य आचान्तौ इष्टकुलदेवता प्रार्थनापूर्वकं विघ्नेश्वरपूजां कृत्वा-उभौ सङ्कल्पं कुर्यास्ताम्-

--नक्षत्रे --राशौ जातस्य --शर्मणः --नक्षत्रे --राशौ जातायाः -- नाम्न्याश्च अनयोः वधूवरयोः उद्वाह वाङ्निश्चयं करिष्ये ॥ग्रहप्रीतिं कृत्वा वधूपूर्वकं प्रवरं वदेयुः ॥
चतुस्सागरपर्यन्तं गोब्राह्मणेभ्यश्शुभंभवतु--आर्षेय--प्रवरान्वित--गोत्रोद्भवस्य--शर्मणो नप्त्रीं चतुस्सागरपर्यन्तं गोब्राह्मणेभ्यश्शुभंभवतु--आर्षेय--प्रवरान्वित-- गोत्रोद्भवस्य--शर्मणः पौत्रीम् चतुस्सागरपर्यन्त
गोब्राह्मणेभ्यश्शुभंभवतु--आर्षेय--प्रवरान्वित-- गोत्रोद्भवस्य--शर्मणः पुत्रीं चतुस्सागरपर्यन्तं गोब्राह्मणेभ्यश्शुभंभवतु--आर्षेय--प्रवरान्वित-- गोत्रोद्भवाम् --नाम्नीं इमां कन्यां चतुस्सागरपर्यन्तं गोब्राह्मणेभ्यश्शुभंभवतु--आर्षेय--प्रवरान्वित-- गोत्रोद्भवस्य--शर्मणो नप्त्रे चतुस्सागरपर्यन्तं गोब्राह्मणेभ्यश्शुभंभवतु--आर्षेय--

प्रवरान्वित-- गोत्रोद्भवस्य--शर्मणः पौत्राय चतुस्सागरपर्यन्तं गोब्राह्मणेभ्यश्शुभंभवतु--आर्षेय--प्रवरान्वित-- गोत्रोद्भवस्य--शर्मणः पुत्राय चतुस्सागरपर्यन्तंगोब्राह्मणेभ्यश्शुभंभवतु--आर्षेय--प्रवरान्वित-- गोत्रोद्भवाय --शर्मणे यजुश्शाखाध्यायिने लक्ष्मीनारायणस्वरूपिणे वराय -एवं त्रिवारमुक्त्वा वधूपिता -दास्यामि- इति त्रिवारं ब्रूयात्।वरपिता शोभनम्-इति त्रिवारं ब्रूयात्।

वधूमानयित्वा वध्वै वाङ्निश्चयचेलं आशीर्वचन पुरस्सरं दद्यात्॥वरपक्षीयाः वधूपक्षीयाणां सर्वेषां गन्धकुंकुमपुष्प फलयुक्तक्षीरादिकं दद्युः॥ स्यालकः वरं गन्धादिभिः पुष्पादिभिश्च अलंकुर्यात्। ननान्दा वधूं गन्धादिभिः पुष्पादिभिश्च अलंकुर्यात्। वधूवरौ समासने उपविश्य अङ्गुलीयकद्वयं निधाय लक्ष्मीं सम्पूज्य परस्परं धृत्वा फलदानताम्बूलदानञ्च कुर्यात्॥ अक्षताशीर्वचनानन्तरं मङ्गल स्नानार्थम् व्रीह्यवहन्त्रीणां पञ्च सुवासिनीनां गन्धकुङ्कुमप्रदानम्॥सर्वेषां हारती॥ एतद्वरपूजादिकं सर्वम् सम्प्रदाय प्राप्तम्॥अकरणेपि न दोषः॥

विवाहप्रयोगः

उषःकाले वधूवरौ पट्टवस्त्रप्रावृतौ अन्योन्याभिमुखौ आनयेयुः॥ यथासम्प्रदायं मङ्गल स्नानं कारयेत्॥ वरः प्रातस्सन्ध्यां प्रातरग्निकार्यञ्च कुर्यात्।

विवाहमुहूर्तवेळायाः सार्धघण्टातः पूर्वं स्यालकः वरं गन्धादिभिःअलङ्करोति। श्वश्रूःअञ्जयति।आवुत्तेन छत्रीकृतः वरः मङ्गलद्रव्यहस्तैः बन्धुभिर्वृतः काशीयात्रार्थम् किञ्चित् प्राचीमुदीचीं वा दिशं गच्छेत्॥कल्याणमण्डपद्वारि तिष्ठन्तं श्वशुरं दृष्ट्वा वदेत्-चरितब्रह्मचर्योऽहं कृतव्रतचतुष्टयः। काशीयात्रां गमिष्यामि अनुज्ञां देहि मे शुभाम्॥

श्वशुरःप्रार्थयति-सालङ्कारां मम सुतां कन्यां दास्यामि ते द्विज। पाणिं गृहीत्वा साऽग्निस्त्वं गच्छ स्वागच्छ मद्गृहम्॥

श्वशुरः वरं प्राङ्मुखं आसने उपवेश्य पादौ दुग्धेन तीर्थेन च प्रक्षाळयीत- लक्ष्मीनारायणस्वरूप वर स्वागतम्।इदन्ते पाद्यम्॥तद्विष्णोः

परमम्पदं--पदम् ॥उभावाचम्य-वरं गन्धादिभिरभ्यर्च्य वधूमाता वराय फलयुक्तक्षीरं त्रिवारं दद्यात सम्प्रदायमनुसृत्य अत्र मातुलेन वधूमानीय वधूवरौ स्वस्वमातुलेन बिभृतौ परस्परं त्रिवारं पुष्पमाला विनिमयं कुर्याताम्॥ अत्र मन्त्रः-

मम हृदॅये हृदॅयन्ते अस्तु। मम चित्ते चित्तॅमस्तु ते। मम वाचमेकॅ मनाश्शृणु।सहचॅर्या मया भॅव॥ हारतीभिः आरार्तितौ मङ्गलवाद्यपुरस्सरं विवाहमण्डपं प्रविश्य समासने उपविशेताम्॥

पवित्रपाणिः वरः इष्टकुलदेवता प्रार्थनापूर्वकं विघ्नेश्वरपूजां कृत्वा पाणिग्रहणकर्मार्हं पुण्याहवाचनं कुर्यात्। वध्वै दीक्षावस्त्रं आशीर्वचनपुरस्सरं दद्यात्। सा तं धृत्वा गुडजीरकं हस्तेकृत्वा वैणवपुटिकायां उपविश्य गुडजीरकं हस्ते कृत्वा गौरीं ध्यायमानाऽऽस्ते।

मम आयष्याभिवृध्यर्थम् आचन्द्रार्कम् अनेक वैशेषिकसुखानुभव सिद्धयर्थम् पाणिग्रहणाख्य कर्मकरिष्ये।

अनुहवं पॅरिहवं पॅरीवादं पॅरिक्षपम्।दुस्वॅप्नं दुरुॅदितं तद्विषद्भ्यौ दिशाम्यहम्। अनुॅहूतं परिॅहूतꣳ शकुनेर्यदशॉकुनम्।मृगस्यॅ सृत मॅक्ष्णया तद्विषद्भ्यौ दिशाम्यहम्। आरात्तें अग्निरॅस्त्वारात्पॅरशुरॅस्तु ते।निवाते त्वाऽभिवॅर्षतु स्वस्ति तेऽस्तु वनस्पते स्वस्ति मेऽस्तु वनस्पते। नमॅश्शकृत्सदें रुद्राय नमों रुद्रायॅ शकृत्सदे। गोष्ठमॅसि नमॅस्ते अस्तु मामॉहिꣳसीस्सिगॅसि नसि वज्रो नमॅस्ते अस्तु मामॉहिꣳसीः।उद्गातेवॅ शकुने सामॅगायसि ब्रह्मपुत्र इॅव सवॅनेषु शꣳससि। स्वस्तिनॅश्शकुनें अस्तु प्रतिॅन्स्सुमनॉ भव॥

सङ्कल्पं कुर्यात्-धर्मप्रजासम्पत्यर्थम् स्त्रियमुद्वहे ॥

वरः श्वशुरदत्तं द्वितीययज्ञोपवीतं मन्त्रेण धृत्वा -सुहृदस्समवेतान्मन्त्रवतो वरान्प्रहिणुयात् तानादितो द्वाभ्यामभिमन्त्रयेत-

प्रसुग्मन्ताँ धियसानस्यँ सक्षणिँ वरेभिर्वराꣳ अभिषुप्रसींदत।
अस्माकमिन्द्रँ उभयँञ्जुजोषति यत्सौम्यस्यान्धँसो बुबोँधति ॥
अनृक्षरा ऋजवँस्सन्तु पन्था येभिस्सखाँयो यन्तिँ नो वरेयम्।
समँर्यमा सम्भगोँ नो निनीयात्सञ्जास्पत्यꣳ सुयमँमस्तु देवाः ॥
मदर्थम् --कुलात् कन्यां वृणीध्वम् ॥

अनन्तरं वरस्य जनकजनन्यौ वधूपितरौ च कलशे स्वस्वकुलदेवतां आवाह्य पूजयेयुः। ततः ब्राह्मणाः वरपूर्वम् प्रवरमुक्त्वा कन्यां वृणीयुः-चतुस्सागरपर्यन्तं गोब्राह्मणेभ्यश्शुभंभवतु--आर्षेय--प्रवरान्वित-- गोत्रोद्भवस्य--शर्मणो नप्त्रे चतुस्सागरपर्यन्तं गोब्राह्मणेभ्यश्शुभंभवतु--आर्षेय--प्रवरान्वित-- गोत्रोद्भवस्य--शर्मणः पौत्राय चतुस्सागरपर्यन्तं गोब्राह्मणेभ्यश्शुभंभवतु--आर्षेय--प्रवरान्वित-- गोत्रोद्भवस्य--शर्मणः पुत्राय चतुस्सागरपर्यन्तंगोब्राह्मणेभ्यश्शुभंभवतु--आर्षेय--प्रवरान्वित--गोत्रोद्भवाय --शर्मणे यजुश्शाखाध्यायिने लक्ष्मीनारायणस्वरूपिणे वराय चतुस्सागरपर्यन्तं गोब्राह्मणेभ्यश्शुभंभवतु--आर्षेय--प्रवरान्वित-- गोत्रोद्भवस्य--शर्मणो नप्त्रीं चतुस्सागरपर्यन्तं गोब्राह्मणेभ्यश्शुभंभवतु--आर्षेय--प्रवरान्वित-- गोत्रोद्भवस्य--शर्मणः पौत्रीम् चतुस्सागरपर्यन्तं गोब्राह्मणेभ्यश्शुभंभवतु--आर्षेय--प्रवरान्वित-- गोत्रोद्भवस्य--शर्मणः पुत्रीं चतुस्सागरपर्यन्तं गोब्राह्मणेभ्यश्शुभंभवतु--आर्षेय--प्रवरान्वित--गोत्रोद्भवाम् --नाम्नीं भवदीयां कन्यां धर्मप्रजार्थम् वृणीमहे ।

वधूपिता - वृणीध्वम् तस्मै दास्यामि-इति वदेत्॥ ब्राह्मणाः-सिद्धार्था वयम्-इति ब्रूयुः॥वधूपिता आसने उपविश्य -आगतं वरं मधुपर्केण पूजयिष्ये-इति सङ्कल्प्य सूत्रम्-यत्रस्था अपचितिं कुर्वन्ति तत्कूर्च उपविशति यथा पुरस्तात्

राष्ट्रभृदॅस्याचार्याऽऽसन्दी मात्वद्यौषम्।

आपः पाद्या इति प्राह-उत्तरयाऽभिमन्त्र्य-

आपॅः पादावनेजॅनीर्द्विषन्तॅन्नाशयन्तु मे।अस्मिन्कुले ब्रह्मवर्च्चस्यॅं सानि॥

दक्षिणं पादं पूर्वम् ब्राह्मणाय प्रयच्छेत्-प्रक्षाळयितारमुपस्पृश्य उत्तरेण यजुषा आत्मानमुपस्पृशेत्- आसनम्, स्वागतम्, पाद्यम् (तीन वचनों का प्रयोग)

मयि महो मयि यशो मयीन्द्रियं वीर्यम्॥ -उसी आचम्य

कूर्चाभ्यां परिगृह्य मृन्मयेन अर्हणीया आप इति प्राह-अर्हणीया आप :

सूत्रम्-उत्तरयाऽभिमन्त्र्य-आमॅगन् यशॅसा वर्चॅसा सꣳसॅृज पयॅसा तेजॅसा च। तम्मा प्रियं प्रजानां कुर्वाधॅिपतिम्पशूनाम्॥अञ्जलावेकदेश आनीयमाने

उत्तरं यजुर्जपेत्-विराजो दोहौऽसि विराजो दोहॅमशीय मम पद्यॉय विरॉज॥ शेषं पुरस्तान्निनीयमानमनुमन्त्रयते-

समुद्रंवःप्रहिॅणोमि स्वांयोनिमपिॅगच्छत अच्छिॅद्रः प्रजयॉभूयासं मापरॉसेचि मत्पयॅः॥ दधि मध्विति संसृज्य कांस्येन वर्षीयसा पिधाय कूर्चाभ्यां परिगृह्य मधुपर्कॅ इति प्राह-उत्तराभ्यामभिमन्त्र्य त्रय्यै विद्यायै यशौऽसि यशॅसो यशौऽसि ब्रह्मॅणो दीप्तिॅरसि। तम्मा प्रियं प्रजानां कुर्वाधॅिपति

म्पशूनाम्।आमॉगन् यशॉसा वर्चॅसा सꣳसृॅज पयॅसा तेजॅसा च। तम्मा
प्रियं प्रजानां कुर्वीधॅपतिम्पशूनाम्॥ यजुर्भ्यामप आचामति पुरस्ता दुपरिष्टाच्च।
अमृतोपस्तरॅणमसि॥ उत्तरया त्रिः प्राश्य-यन्मधुॅनो मधव्यॅं परममन्नाद्यॅं
वीर्यम्।तेनाहं मधुॅनो मधव्येन परमेणाऽन्नाद्येॅन वीर्येॅण परमोऽन्नादो
मॅधव्यौऽसानि॥अनुकम्प्याय प्रयच्छेत्॥ गौरिति गां प्राह-गौः
उपांशूत्तरां जपित्वा ओमुत्सृजतेत्युच्चैः-यज्ञो वॅर्धतां यज्ञस्य वृद्धिमनुॅवधा
ऽपॅचितिरस्यपॅचितिं मा कुर्वपॅचितोऽहं मॅनुष्यॅेषु भूयासम्। गौर्धॅेनु भव्या
माता रुद्राणान्दुहिता वसूॅनाꣳ स्वसॉ ऽऽदित्यानॉममृतॅस्य नाभिः।प्रणु
वोचॅञ्चिकितुषे जनॉय मागामनॉगामदितिं वधिष्ट। पिबॅतूदकं तृणान्यत्तु।
ओमुत्सृजत॥

अन्नं प्रोक्तमुपांशूत्तरैरभिमन्त्र्य ओं कल्पयतेत्युच्चैः-
सुभूतꣳ सावि॒राद् तन्माक्षॉयि तस्यतेशीॅय तन्म ऊर्जॅन्धाः।ओं कल्पयत॥

वरः(अग्निं प्रतिष्ठापयति-)वधूजनकः विघ्नेश्वरपूजां कृत्वा-पत्न्या अन्वारब्धः
कन्यादानार्थम् महासङ्कल्पं कुर्यात्- दर्भेष्वासीनः दर्भान्धारयमाणः
शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये॥
ओंभूः - भूर्भुवस्सुवरों ममोपात्त समस्तदुरित क्षयद्वारा
श्रीपरमेश्वरप्रीत्यर्थम् अनन्तवीर्यस्य आदिनारायणस्य अचिन्त्यया
अपरिमितया शक्त्या म्रियमाणस्य महाजलौघस्य मध्ये परिभ्रममाणानां
अनेककोटि ब्रह्माण्डानां एकतमे अव्यक्तप्रकृति महदहङ्कार आकाश
वायु वह्निजलपृथिव्यावरणैः सप्तभिरावृते अस्मिन्महति ब्रह्माण्डकरण्ड

मण्डले आधारशक्तिवराह कूर्मानन्तादि अष्टदिग्गजोपरि प्रतिष्ठितस्य अतल वितल सुतल रसातल तलातल महातल पाताळाख्य लोकसप्तकस्य उपरितले प्रतिलोमेन तपो जन महस्सुवर्भुवाख्य लोकषट्कस्य अधोभागे महालाळायमान फणि राजशेषस्य सहस्रफणामणिमण्डल मण्डिते दिग्दन्तिशुण्डादण्डोत्तम्भिते लोकालोकाचलेन वलयिते लवण इक्षु सुरा सर्पिःदधि क्षीर शुद्धोदकार्णवैः परिवृते जम्बू प्लक्ष कुश क्रौञ्च शाक शाल्मलि सप्तद्वीपैरावृते इन्द्र कशेरु ताम्र गभस्ति नाग सौम्य गन्धर्व चारण भरताख्य नवखण्डमण्डिते महासरोरुहाकारे पञ्चाशत्कोतियोजन विस्तीर्ण भूमण्डले लक्षयोजनविस्तीर्ण जम्बूद्वीपे सुमेरु निषध हेमकूट हिमाचलानां हरिवर्ष किम्पुरुषवर्षयोश्च दक्षिणे सेतुबन्ध मलयाचलयोश्च उत्तरे सहस्रयोजन विस्तृते भारतवर्षे भरतखण्डे प्रजापतिक्षेत्रे दण्डकारण्ये कर्मभूमौ अयोध्या काशी कुरुक्षेत्र गया प्रयाग काञ्ची श्रीरङ्ग श्रीवेङ्कटाचलादि पुण्यक्षेत्रैः गङ्गा यमुना सरयू नर्मदादि पुण्यनदीभिश्च विराजिते समभूमध्यरेखायाः पूर्व दिग्भागे श्रीशैलस्य इशानदिग्भागे कृष्णा गोदावरी कावेर्योः मध्यदेशे समस्तदेवता ब्राह्मणसन्निधौ अस्मिन् कल्याणमण्डपे परब्रह्मणा नियुक्तस्य सकलजगत्स्रष्टुः परार्धद्वयजीविनः कारणब्रह्मणः पञ्चाशत्तमवत्सरे प्रथमे मासे प्रथमेपक्षे प्रथमेदिवसे अहनि द्वितीये यामे तृतीये मुहूर्ते श्वेतवराहकल्पे स्वायम्भुव स्वारोचिष उत्तम तामस रैवत चाक्षुषाख्येषु षट्सु मनुषु व्यतीतेष सप्तमे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे प्रथमे पादे शालिवाहनशके चान्द्रमानेन प्रभवादि षष्टिसंवत्सराणां मध्ये --संवत्सरे --अयने --ऋतौ-- मासे-- पक्षे-- शुभतिथौ-- वासरयुक्तायां-- नक्षत्रयुक्तायां-- योग-- करण--एवंगुणविशेषण विशिष्टायां अस्यां -- शुभतिथौ अनाद्यविद्यावासनया अस्मिन्महति संसारचक्रे विचित्राभिः कर्मगतिभिः विचित्रासु योनिषु पुनःपुनः अनेकधा जनित्वा केनापि भाग्यविशेषेण इदान्न्तिनमानुष्ये द्विजजन्मविशेषं

प्राप्तवतो मम जन्मप्रभृति एतत्क्षणपर्यन्तं मनोवाक्काय कर्मभिः ज्ञानतः अज्ञानतश्च कृतानां महापातकानां उपपातकानां समपातकानां सङ्कलीकरणानां मलिनीकरणानां अपात्रीकरणानां जातिभ्रंशकराणां प्रकीर्णकानां रहस्यकृतानां प्रकाशकृतानां सर्वेषां पापानां सद्यः अपनोदनद्वारा श्री परमेश्वरप्रीत्यर्थम् गङ्गावालुकाभिः सप्तर्षिमण्डलपर्यन्तं कृतराशेः वर्षसहस्रावसाने एकैकवालुकापकर्षक्रमेण सर्वराश्यपकर्ष सम्मितकाले ब्रह्मलोके निवाससिद्ध्यर्थम् तिलैःसूर्यमण्डलपर्यन्तं कृतराशेः वर्षसहस्रावसाने एकैकतिलापकर्षक्रमेण सर्वराश्यपकर्ष सम्मितकाले ब्रह्मलोके निवाससिद्ध्यर्थम् यवैःग्रहमण्डलपर्यन्तं कृतराशेः वर्षसहस्रावसाने एकैकयवापकर्षक्रमेण सर्वराश्यपकर्ष सम्मितकाले ब्रह्मलोके निवाससिद्ध्यर्थम् माषैःध्रुवमण्डलपर्यन्तं कृतराशेः वर्षसहस्रावसाने एकैकमाषापकर्षक्रमेण सर्वराश्यपकर्ष सम्मितकाले ब्रह्मलोके निवाससिद्ध्यर्थम् पञ्चाशद्गव्यूतिगणनासम्मितदेशे वृषलोमभिः नक्षत्रमण्डलपर्यन्तं कृतराशेः वर्षसहस्रावसाने एकैकलोमापकर्षक्रमेण सर्वराश्यपकर्ष सम्मितकाले ब्रह्मलोके निवाससिद्ध्यर्थम् त्रिगुणीकृत अग्निष्टोम अतिरात्र अप्तोर्याम वाजपेय पौण्डरीक अश्वमेधादि शतक्रतु पुण्यफलावाप्त्यर्थम् मया सह दशानां पूर्वेषां दशानां परेषां मद्वंश्यानां सर्वेषां नित्यनिरतिशय आनन्दावाप्त्यर्थम् शाश्वतब्रह्मलोक निवाससिध्यर्थम् स्वगृह्योक्तप्रकारेण सालंकृत सहिरण्य कन्यका दानाख्य महादानमहं करिष्ये ॥

सुवासिन्यः कांस्यपात्रेषु विंशतिदीपान् आदाय पार्श्वयोः तिष्ठन्ताम्।

कन्याबन्धवः प्राङ्मुखाः वरबन्धवः प्रत्यङ्मुखाः उपविश्य मध्ये पट्टवस्त्रेण आवरणं कृत्वा-मातुलेन सपुटिकां कन्यां आनाय्य -

कन्यां कनकसम्पन्नां कनकाभरणैर्युताम्।
दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया ॥
कन्ये ममाग्रतो भूयाः कन्ये मे देवि पार्श्वयोः।

कन्ये मे सर्वतो भूयाः त्वद्दानान्मोक्षमाप्नुयाम्॥
विश्वम्भरास्सर्वभूताः साक्षिण्यस्सर्वदेवताः।
इमां कन्यां प्रदास्यामि पितृणां तारणाय वै॥
कन्यां सालंकृतां साध्वीम् सुशीलाय सुधीमते।
प्रयतोऽहं प्रयच्छामि धर्मकामार्थ सिद्धये॥
चतुस्सागरपर्यन्तं गोब्राह्मणेभ्यश्शुभंभवतु--आर्षेय--प्रवरान्वित--गोत्रोद्भवस्य--शर्मणो नप्त्रीं -आर्षेय--प्रवरान्वित-- गोत्रोद्भवस्य--शर्मणः पौत्रीम्--आर्षेय--प्रवरान्वित-- गोत्रोद्भवस्य--शर्मणः पुत्रीं --आर्षेय--प्रवरान्वित-- गोत्रोद्भवाम् --नाम्नीं महालक्ष्मी स्वरूपीम् मदीयां कन्यां चतुस्सागरपर्यन्तं गोब्राह्मणेभ्यश्शुभंभवतु--आर्षेय--प्रवरान्वित-- गोत्रोद्भवस्य--शर्मणो नप्त्रे --आर्षेय--प्रवरान्वित-- गोत्रोद्भवस्य--शर्मणः पौत्राय --आर्षेय--प्रवरान्वित--गोत्रोद्भवस्य--शर्मणः पुत्राय --आर्षेय--प्रवरान्वित-- गोत्रोद्भवाय --शर्मणे यजुश्शाखाध्यायिने लक्ष्मीनारायणस्वरूपिणे वराय तुभ्यं प्रजासहत्वकर्मभ्यः प्रतिपादयामि- उदकपूर्वम् वरहस्ते दद्यात्॥वरः मन्त्रेण गुडजीरकहस्तस्सन् प्रतिगृह्णाति-

देवस्यॅ त्वा सवितुः प्रॅसवे। अश्विनोर्बाहुभ्याम्। पूष्णो हस्ताभ्यां प्रतिंगृह्णामि। राजा त्वा वरुॅणो नयतु देवि दक्षिणेमनॅवे तल्पम्। अथवा-प्रजापॅतये कन्याम्। तेनॉमृतत्वमॅश्याम्। वयो दात्रे। मयो मह्यॅमस्तु प्रतिग्रहीत्रे। क इदङ्कस्मॉ अदात्। कामः कामॉय। कामो दाता। कामॅः प्रतिग्रहीता। कामश्ँ समुद्रमाविंश। कामेंन त्वा प्रतिंगृह्णामि। कामैतत्ते। एषातैं काम दक्षिंणा। उत्तानस्त्वाङ्गीरसः प्रतिंगृह्णातु॥
कन्या पिता वरं प्रति वदेत्- धर्मे च अर्थे च कामे च नातिचरितव्या।

वरः-नातिचरामि ॥एवं त्रिः ॥

अनन्तरं मङ्गलाष्टकं पठेत्-

श्रीमत्पङ्कजहरिहरौ वायुर्महेन्द्रोऽनलः चन्द्रो भास्कर वित्तपाल वरुणो धर्मादि पालग्रहाः । प्रद्युम्नो नलकूबरस्सुरगुरुः चिन्तामणिः कौस्तुभः स्वामी शक्तिधरश्च लाङ्गलधरः कुर्वन्तु वां मङ्गळम् ॥

सुलग्ने सावधान । सुमुहूर्ते सावधान ।----शर्मणोः विवाह समये कुर्वन्तु वां मङ्गळम् ॥

वाल्मीकिस्सनकस्सनन्दनमुनिः व्यासो वसिष्ठो भृगुः जमदग्निरत्रि कपिलो गर्गाङ्गिरो गौतमाः ।मान्धाता नहुषः प्रदीपसगरौ वेनो दिलीपो नलः रामो धर्मसुतो ययाति भरतः कुर्वन्तु वां मङ्गळम् ॥

सुलग्ने सावधान । सुमुहूर्ते सावधान ।----शर्मणोः विवाह समये कुर्वन्तु वां मङ्गळम् ॥

अश्वत्थो बदरी च चन्दनतरुः मन्दारकल्पद्रुमौ जम्बूनिम्ब कदम्ब चूत सरलाः वृक्षाश्च ये क्षीरिणः । सर्वे ते फलमिश्रितं वनचरैः वैभ्राजितं भ्राजितं रम्यं चैत्ररथं सुनन्दनवनं कुर्वन्तु वां मङ्गळम् ॥

सुलग्ने सावधान । सुमुहूर्ते सावधान ।----शर्मणोः विवाह समये कुर्वन्तु वां मङ्गळम् ॥

गङ्गासिन्धु सरस्वती सुयमुना गोदावरी नर्मदा कावेरी सरयूः महेन्द्रतनया चमण्वती रेणुकाः ।क्षिप्रा वेत्रवती महासुरनदी ख्याता च या गण्डकी पूर्णाः पुण्यजलैः समुद्रसहिताः कुर्वन्तु वां मङ्गळम् ॥

सुलग्ने सावधान । सुमुहूर्ते सावधान ।----शर्मणोः विवाह समये कुर्वन्तु वां मङ्गळम् ॥

गौरी श्रीरदितिश्च शुद्धविनता भूमिस्सुपर्णा शुभा सावित्री च सरस्वती च सुरभिः सत्यव्रताऽरुन्धती । स्वाहा जाम्बवती च रुक्मभगिनी दुस्वप्नविध्वंसिनी वेलाचाम्बुनिधेः समीनमकराः कुर्वन्तु वां मङ्गळम् ॥

सुलग्ने सावधान । सुमुहूर्ते सावधान ।----शर्मणोः विवाह समये कुर्वन्तु वां मङ्गळम् ॥

स्निग्धान्नं दधि पायसं रुचिकरं कुम्भपूर्णम् जलम् शङ्खं चन्दनमौक्तिकं सुविमलं गोरोचनं श्रीफलम्। विप्रा वेदविदः प्रभातसमयः गौः काञ्चनं व्रीहयः दूर्वाग्रं सिततण्डुलाः प्रतिदिनं कुर्वन्तु वां मङ्गळम्॥
सुलग्ने सावधान। सुमुहूर्ते सावधान।----शर्मणोः विवाह समये कुर्वन्तु वां मङ्गळम्॥
नेत्राणां त्रितयं शुभं पशुपतेः अग्नित्रयं पावनं पुण्यं विष्णुपदत्रयं त्रिभुवनं ख्यातञ्च रामत्रयम्। गङ्गावाहपथत्रयं सर्विमलं वेदत्रयं सुस्वरं सन्ध्यानां त्रितयं द्विजैरभिमतं कुर्वन्तु वां मङ्गळम्॥
सुलग्ने सावधान। सुमुहूर्ते सावधान।----शर्मणोः विवाह समये कुर्वन्तु वां मङ्गळम्॥
श्रीशैलेन्द्रसुवेलविन्ध्य मलया श्रीचित्रकूटाचलः चन्द्रद्रोण महेन्द्रमन्थरगिरि श्रीकण्ठवासोदयाः। अस्ताद्रिस्तु रवेः तुरङ्गमुखर प्रक्षुण्णशृङ्गाचलः सर्वे ते गिरयः सुमेरुसहिताः कुर्वन्तु वां मङ्गळम्॥
सुलग्ने सावधान। सुमुहूर्ते सावधान।----शर्मणोः विवाह समये कुर्वन्तु वां मङ्गळम्॥
शुभमुहूर्तचूर्णिकां पठेत्-
स्वस्त्यष्टाशीति सहस्राणां द्विजगुरुदेवताः समस्तजगददाधार महामण्डूक कूर्म यज्ञवराहशेषपृथिव्यादयः पुरन्दर पावक यमनिरृत्रति वरुण वायु कुबेर ईशानाद्यष्टदिक्पालकाः जलजभव हरिहरमुख्यदेवगणाः नारद विश्वामित्रपराशरात्रि वाल्मीकि गौतम भृगु व्यासादि महर्षयः सीतारुन्धत्यहल्या द्रौपदी तारा मन्दोदरी दमयन्त्यादि महापतिव्रताः हरिश्चन्द्रनल कार्तवीर्यविक्रमार्क भोजराजादि पुण्यपुरुषाः गङ्गा नर्मदा तुङ्गभद्राकावेरी मलापहारिणी कृष्णवेणी गोदावरी भीमरथ्यादि महानद्यः जम्बूनिम्ब कदम्ब चूत क्रमुक नारिकेल खर्जूरधात्रीदाडिम्यादि फलवृक्षाः पुन्नाग जातीवकुळ केतकी चम्पक मल्लिका माधवीमालत्यादि विविधकुसुमानि कस्तूरी कुङ्कुमागरु गोरोचनादि सुगन्धाः अपरिमित कनक कलशकन्यका गृहमेधिकवीश्वर

वीणादि वाद्यमेघाध्वनयः अयोध्या काशीपुरुषोत्तमरामाश्वरादि पुण्यनगर्यः श्रीशैल विन्ध्यहेमाचल गोवर्धन कैलासादि महाशैलाः तर्कमीमांसा न्यायवैशेषिक भाट्टप्राभाकर व्याकरणादि शास्त्राणि ऋग्यजुस्सामाथर्ववेदाःलग्नहोरा द्रेक्काणनवांश दशांश द्वादशांश त्रिंशांशषष्ट्यंशपर्यन्तांशाःआदित्यादि नवग्रहाः निरन्तरमनुकूलाःशुभाश्शोभनाःअनयोः वधूवरयोः विवाहमुहूर्तस्य सुतिथि सुवार सुनक्षत्र सुलग्न सुयोग सुकरण सुचन्द्रताराबलञ्च कुर्वाणाः सुप्रीतास्सुप्रसन्ना वरदा भवन्तु ॥

ध्रुवन्ते राजा वरुणो ध्रुवन्देवो बृहस्पतिः। ध्रुवन्त इन्द्रश्चाग्निश्च राष्ट्रन्धारयतां ध्रुवम्-उभौ गुडजीरकं अन्योन्यं शिरसि धृत्वा आवरणवस्त्रमपास्य

-स्वयं दृष्ट्वा तृतीयाञ्जपेत्-

अभ्रातृघ्नीं वरुणाऽपतिघ्नीं बृहस्पते। इन्द्राऽपुत्रघ्नीं लक्ष्म्यन्तामस्यै सवितस्सुव ॥ चतुर्थ्या समीक्षेत- अघोरचक्षुरपतिघ्नियेधि शिवापतिभ्यस्सु मनास्सुवर्चाः। जीवसूर्देवकामास्योना शन्नो भव द्विपदे शञ्चतुष्पदे ॥

आवयोः आयुर्वर्चो यशो बलाभिवृध्यर्थम् आवभ्यां कर्माणि कर्तव्यानि प्रजाश्चोत्पादयितव्याः-इति सङ्कल्प्य वधूदीक्षावस्त्रं आशीःपूर्वकं दद्यात् ॥

माङ्गल्यं सदस्येभ्यो निवेदयेत् ॥अङ्गुष्ठेनोपमध्यमयाचाङ्गुल्या दर्भं सङ्गृह्य उत्तरेण यजुषा तस्याश्रुवोरन्तरं सम्मृज्य प्रतीचीनं निरस्येत्-

इदमहं या त्वयि पतिघ्नयॅलक्ष्मिस्तान्निर्दिशामि ॥प्राप्ते निमित्त उत्तराञ्जपेत्-

जीवाश रुदन्ति विमयन्ते अध्वरे दीर्घामनु प्रसितिन्दीधियुर्नरः। वामं

पितृभ्यो य इदꣳ सꣳमेरिरे मयः पतिभ्यो जनयः परिष्वजे ॥
युग्मान्त्समवेतान्मन्त्रवत उत्तरयाऽद्भ्यः प्रहिणुयात्-
व्युक्षत्कूरमुदचन्त्वाप आस्यै ब्राह्मणास्नपनꣳ हरन्तु ।अवीरघ्नीरुदचन्त्वापः ॥ उत्तरेण यजुषा तस्याश्शिरसि दर्भेष्वन्निधाय -अर्यम्णो अग्निं परियन्तु क्षिप्रं प्रतीक्षन्ताꣳश्श्वश्रूर्वो देवराश्च ॥तस्मिन्नुत्तरया दक्षिणं युगच्छिद्रं प्रतिष्ठाप्य-खेनसः खेरथः खेयुगस्य शचीपते । अपालामिन्द्र त्रिःपूत्व्यंकरत्सूर्यं वर्चसम् ॥ छिद्रे सुवर्णमुत्तरयाऽन्तर्धाय-
शन्ते हिरण्यꣳ शमुसन्त्वापश्शन्ते मेधी भवतु शं युगस्य तृचं ।
शन्त आपश्शतपवित्रा भवन्त्वथा पत्या तन्वꣳ सꣳसृजस्व ॥
उत्तराभिः पञ्चभिस्स्नापयित्वा-हिरण्यवर्णाश्शुचयः पावकाः प्रचक्रमुर्
हित्वाऽवद्यमापः । शतं पवित्रा वितताह्यासु ताभिष्ट्वा देवस्सविता
पुनातु ॥हिरण्यवर्णाश्शुचयः पावका यासु जातः कश्यपो यास्वग्निः ।
या अग्निं गर्भन्दधिरे सुवर्णास्तास्त आपश्शꣳस्योना भवन्तु ॥
यासाꣳराजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम् ।
या अग्निं गर्भन्दधिरे सुवर्णास्तास्त आपश्शꣳस्योना भवन्तु ॥
यासान्देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा निविष्टाः ।
या अग्निं गर्भन्दधिरे सुवर्णास्तास्त आपश्शꣳस्योना भवन्तु ॥

शिवेनॅत्वा चक्षुॅषापश्यन्त्वापश्शिवयाॅ तन्वोपॅस्पृशन्तु त्वचॅन्ते।

घृतश्चुतश्शुचॅयो याः पॉवकास्तास्त आपश्शꣳस्योना भॅवन्तु॥

उत्तरयाऽहतेन वाससाच्छाद्य-परिॅत्वा गिर्वणो गिरॅ इमा भॅवन्तु विश्वतॅः।

वृद्धायुमनु वृद्धॅयो जुष्टाॅ भवन्तु जुष्टॅयः॥ आवयोः आयुर्वर्चो यशो

बलाभिवृध्यर्थम् योक्त्रमाङ्गल्यपूजां करिष्ये।श्रीसूक्तविधानेन

योक्त्रमाङ्गल्य पूजां कुर्यात्॥माङ्गल्यधारणम्-

माङ्गल्यं तन्तुनानेन मम जीवनहेतुना।

कण्ठे बध्नामि सुभगे त्वञ्जीव शरदां शतम्॥

उत्तरया योक्त्रेण सन्नह्यति-

आशासॉना सौमनसं प्रजाꣳ सौभाग्यन्तनूम्। अग्नेरनुॅव्रता भूत्वा

सन्नॅह्ये सुकृतायकम्॥ अस्याः वध्वाः माङ्गल्यधारणमुहूर्तस्सुमुहूर्तो

ऽस्त्विति भवन्तो महान्तोऽनुगृह्णन्तु॥ सुमुहूर्तोऽस्तु॥

अक्षतारोपणम्-वरः वध्वाः अञ्जलौ क्षीरघृतं द्विरुपस्तीर्य द्विः तण्डुलान्

अञ्जलिनावपति।द्विरुपरिष्टादभिघारयति।वराञ्जलौ अन्यः पूर्ववत् तण्डुलपूरणं

कुर्यात्। कन्या दाता अञ्जल्योः हिरण्यमवदधाति।वरः कन्याञ्जलौ स्वाञ्जलिं

धारयेत्।कन्या दातावदेत्-कन्या तारयतु।दक्षिणाः

पान्तु।बहुदेयञ्चाऽस्तु।

पुण्यं वर्धताम्।शान्तिःपुष्टिस्तुष्टिश्चास्तु। तिथिकरणमुहूर्तनक्षत्र

सम्पदस्तु। दम्पत्योः नामजन्मनक्षत्रे सग्रहे सदैवते सह सोमेन

क्रियेताम्॥

वरः वदेत्-प्रजापॅतिस्त्रियां यशॅः। मुष्कयौरददात्सपम्। कामॅस्य

तृप्तिमानन्दम्। तस्याऽग्ने भाजयेह मा।मोदः प्रमोद ऑनन्दः। मुष्कयोर्निहितस्सपः।सृत्वेव कामस्य तृप्याणि। दक्षिणानां प्रतिग्रहे। मनसश्चित्तमाकूतिम्। वाचस्सत्यमशीमहि। पशूनाꣳ रूपमन्नस्य। यशश्रीश्रयताम्मयि। यथाहमस्या अतृपꣳस्त्रियै पुमान्। यथा स्त्री तृप्यति पुꣳसि प्रिये प्रिया। एवं भगस्य तृप्याणि। यज्ञस्य काम्यः प्रियः। ददानीत्यग्निर्वदति। तथेति वायुराह तत्। हन्तेति सत्यञ्चन्द्रमाः। आदित्यस्सत्यमोमिति। आपस्तत्सत्यमाभरन्। यशो यज्ञस्य दक्षिणाम्। प्रजा मे कामस्समृध्यताम्-कन्यामुद्धृत्य तदञ्जल्यक्षतान् वरमूर्धन्यारोपयेत्।वरोऽपि तन्मूर्धनि स्वाञ्जल्यक्षतान् आरोपयेत्। एवं समन्त्रकं त्रिः ॥द्वितीये-पशवो मे कामस्समृध्यताम्।तृतीये-यज्ञो मे काम स्समृध्यताम्।चतुर्थे अन्योन्यं युगपत्-श्रियो मे कामस्समृध्यताम्॥ अग्ने विश्वेभिस्स्वनीक देवैरूर्णावन्तं प्रथमस्सीदयोनिम्। कुलायिनं घृतवन्तꣳसवित्रे यज्ञन्नय यजमानाय साधु-उभयोः ब्रह्मग्रन्थिं कुर्यात्॥ योवैतां ब्रह्मणो वेद। अमृतेनावृताम्पुरीम्। तस्मै ब्रह्म च ब्रह्मा च। आयुः कीर्तिम् प्रजान्ददुः॥

अथैनामुत्तरया दक्षिणे हस्ते गृहीत्वा अग्निमभ्यानीय- पूषात्वेतो नयतु हस्त गृह्याश्विनौ त्वा प्रवहताꣳ रथेन। गृहान्गच्छ गृहपत्नी यथासो वशिनी त्वं विदथमावदासि॥ अपरेणाग्निमुदग्ग्रङ्कटमास्तीर्य तस्मिन्नुपविशत उत्तरो वरः॥

अग्नेरुपसमाधाद्याज्यभागान्ते अथैनामादितो द्वाभ्यामभिमन्त्रयेत-

सोमॅः प्रथमो विविदे गन्धर्वो विविद उत्तरः। तृतीयो अग्निष्टेपतिस्तुरीयस्ते मनुष्यजाः ॥सोमो ददद्गन्धर्वाय गन्धर्वो दददग्नये। रयिञ्च पुत्राश्चादादग्निर्मह्यमथो इमाम्॥ अथास्यै दक्षिणेन नीचा हस्तेन दक्षिणमुत्तानं हस्तं गृह्णीयात् गम्भ्णामि त इत्येताभिश्चतसृभिः-गृभ्णामि ते सुप्रजास्त्वाय हस्तं मया पत्या जरदॅष्टिर्यथासॅः। भगो अर्यमा सविता पुरन्धिर्मह्यन्त्वादुर्गार्हपत्याय देवाः॥ तेह पूर्वे जनासो यत्रपूर्ववहो हिताः। मूर्धन्वान् यत्र सौभ्रवः पूर्वो देवेभ्य आतपत्॥ सरस्वति प्रेदमव सुभगे वाजिनीवति। तान्त्वा विश्वस्य भूतस्य प्रगायामस्यग्रतः॥ य एति प्रदिशस्सर्वा दिशोऽनु पवमानः। हिरण्यहस्त ऐरम्मस्सत्वा मन्मनसं कृणोतु ॥अथैनामुत्तरेणाग्निन्दक्षिणेन पदा प्राचीमुदीचीं वा दिशमभिप्रक्रम्य-एकमिषे विष्णुस्त्वान्वेतु द्वे ऊर्जे विष्णुस्त्वान्वेतु त्रीणि व्रताय विष्णुत्वान्वेतु चत्वारि मायोभवाय विष्णुस्त्वान्वेतु पञ्चपशुभ्यो विष्णुस्त्वान्वेतु षड्ऋतुभ्यो विष्णुस्त्वान्वेतु सप्त सप्तभ्यो होत्राभ्यो विष्णुस्त्वाऽन्वेतु॥ सखेति सप्तमे पदे जपति- सखा सप्तपदा भव सखायौ सप्तपदा बभूव सख्यन्ते गमेयꣳ सख्यात्ते मायोषꣳ सख्यान्मे मायोष्ठास्समायावसङ्कल्पावहै सम्प्रियौ रोचिष्णू सुमनस्यमानौ ।इषमूर्जमभि संवसानौ सन्नौ मनाꣳसि सं व्रता समुचित्तान्याकरम्॥ सात्वमस्यमूहममूह मस्मि सात्वन्द्यौरहं पृथिवीत्वꣳ रेतोऽहꣳ रैतोभृत्वम्मनोऽहमस्मि

वाक्त्वꣳ सामाहमस्म्यृक्त्वꣳ सामामनुव्रता भव पुꣳसे पुत्राय वेत्तॅव श्रियै पुत्राय वेत्तॅवा एहिं सूनृते ॥प्राघ्घोमात् सब्रह्माणं प्रदक्षिणमग्निं कृत्वा यथास्थानमुपविश्य अन्वारब्धायामुत्तरा आहुतीर्जुहोति सोमायजनिविदे स्वाहेत्येतैः

प्रतिमन्त्रम् ॥चतुर्गृहीतानि जुहोति-

सोमॉय जनिविदे स्वाहा-सोमायजनिविद इदन्न मम ॥

गन्धर्वायॅ जनिविदे स्वाहा- गन्धर्वाय जनिविद इदन्न मम ॥

अग्नयॅे जनिविदे स्वाहा-अग्नये जनिविद इदन्न मम ॥

कन्यला पितृभ्यौ यती पॅतिलोकमवॅ दीक्षामॅदास्थ स्वाहा-वध्वै सूर्यायेदन्न मम ॥प्रेतो मुञ्चाति नामुतॅस्सुबद्धाममुतॅस्करत्। यथेयमिॅन्द्र मीढ्वस्सुपुत्रा सुभगासॅति स्वाहा-इन्द्राय मीढुष इदन्न मम ॥

इमान्त्वमिॅन्द्रमीढ्वस्सुपुत्राꣳ सुभगां कुरु। दशास्यां पुत्रानाधॅेहि पॅतिं मेकादशं कृॅधि स्वाहा-इन्द्राय मीढुष इदन्न मम ॥

अग्निरॅैतु प्रथमो देवतॅानाꣳ सोऽस्यै प्रजां मुॅञ्चतु मृत्युपाशात्।तदयꣳ राजा वरुणोनुॅमन्यतां यथेयꣳस्त्री पौत्रॅमघन्नरोदात्स्वाहा-

अग्नीवरुणा

-भ्यामिदन्न मम ॥ इमामग्निस्त्रॉयताङ्गार्हपत्यः प्रजामॅस्यै नयतु दीर्घं मायुॅः। अशून्योपस्था जीवॅतामस्तु माता पौत्रॅमानन्दमभिप्रबुॅध्यता मियꣳस्वाहा-अग्नये गार्हपत्यायेदन्न मम ॥मातॅं गृहे निशि घोष

उत्थॉदन्यत्र त्वद्वुदत्यॅस्संविंशन्तु। मात्वं विंकेश्युर आवर्धिष्ठा जीवपॅत्नी पतिलोके विरॉजपश्यॅन्ती प्रजाꣳ सुॅमनस्यमॉनाꣳस्वाहा- अग्नये गृहपतय इदन्न मम ॥द्यौस्तें पृष्ठꣳ रॅक्षतु वायूरू अश्विनौं च स्तन न्धयॅन्तꣳ सविताऽभिरॅक्षतु। आवासॅसः परिधानाद् बृहस्पतिर्विश्वैंदेवा अभि रॅक्षन्तु पश्चात्स्वाहा ॥द्युवाय्वश्विसवितृबृहस्पतिविश्वदेवेभ्य इदन्न मम ॥अप्रजस्ताम्पौत्रमृत्युं पाप्मानॅमुतवाऽघम्। शीर्ष्णस्त्रजॅ मिवोन्मुच्यॅ द्विषद्भ्यः प्रतिंमुञ्चामि पाशꣳस्वाहा-वध्यै सूर्यायेदन्न मम ॥ इमम्मॅ वरुणश्श्रुधी हवॅमद्या चॅ मृडय।त्वामॅव स्युराचॅके स्वाहा- वरुणायेदन्न मम ॥तत्वॉयामि ब्रह्मॅणा वन्दॅमानस्तदाशास्तेयजॅमानो हविर्भिः। अहेंडमानो वरुणेह बोध्युरुॅशꣳस मान आयुःप्रमौंषीस्स्वाहा- वरुणायेदन्न मम ॥ त्वन्नौं अग्ने वरॅणस्य विद्वान्देवस्य हेडोऽवॅयासिसीष्ठाः। यजिॅष्ठो वह्नितम श्शोशुॅचानोविश्वाद्वेषाꣳसि प्रमुॅमुग्ध्यस्मत्स्वाहा- अग्नीवरुणाभ्यामिदन्न मम ॥सत्वन्नौं अग्नेऽवमो भॅवोती नेदिंष्ठो अस्या उषसो व्युॅष्टौ।अवॅ यक्ष्व नो वरुॅणꣳरराॅणो वीहि मॄडीकꣳसुहवों न एधि स्वाहा- अग्नीवरुणाभ्यामिदन्न मम ॥त्वमॅग्ने अयास्ययासन्मनॅसा हितः। अयासन् हव्यमूॅहिषेऽया नों धेहि भेषजꣳस्वाहा- अग्नये अयस इदन्न मम ॥

अथैनामुत्तरेणाग्निं दक्षिणेन पदा अश्मानमास्थापयति आतिष्ठेति-आतिष्ठेममश्मॉन

मश्मैव त्वꣳस्थिरा भव।अभितिष्ठ पृतन्यतस्सहस्व पृतनायतः॥

अथास्या अञ्जलावुपस्तीर्य द्विर्लाजानोप्याभिघारयति। तस्यास्सोदर्यो

लाजानावपतीत्येक। जुहोतीयन्नारीति- इयन्नार्युपब्रूते कुल्पान्यावपन्तिका।

दीर्घायुरस्तु मे पतिर्जीवातु शरदश्शतꣳस्वाहा-अग्नय इदन्न मम॥

उत्तराभिस्तिसृभिः अब्रह्माणं प्रदक्षिणमग्निं कृत्वा -

तुभ्यमग्रे पर्यवहन्थ्सूर्या वहतुना सह। पुनः पतिभ्यो जायान्दा अग्न

प्रजया सह। पुनः पत्नीमग्निरदादायुषा सह वर्चसा।दीर्घायुरस्या यः

पतिस्स एतु शरदश्शतम्॥ विश्वा उत त्वया वयन्धारा उदन्या इव।

अतिगाहेमहिद्विषः॥अश्मानमास्थापयति यथा पुरस्तात्-आतिष्ठेमं--यतः॥

होमश्चोत्तरया-अर्यमणन्नु देवङ्कन्या अग्निमयक्षत। स इमान्देवो अध्वरः

प्रतोमुञ्चाति नामुतस्सुबद्धाममुतस्करत्स्वाहा- अर्यम्ण इदन्न मम॥

पुनः परिक्रमणम्-तुभ्यमग्रे--द्विषः॥ आस्थापनम्-आतिष्ठेमं--यतः॥

होमश्चोत्तरया-त्वमर्यमा भवसि यत्कनीनान्नाम स्वधावत्स्वर्यम्बिभर्षि।

अञ्जन्ति वृक्षꣳसुधितन्न गोभिर्यद्दम्पती समनसा कृणोषि स्वाहा-

अर्यम्णे अग्नय इदन्न मम॥पुनः परिक्रमणम्-तुभ्यमग्रे--द्विषः॥

अनूयाजसमिधमग्नौ प्रहरतीत्यादि जयादि प्रतिपद्यते परिषेचनान्तं कृत्वा-

ब्रह्मोद्वासनान्ते

उत्तराभ्यां योक्त्रं विमुच्य - प्रत्वामुञ्चामि वरुणस्य पाशाद्येन त्वाबध्नात्सविता

सुकेतॅः। धातुश्च योनौं सुकृतस्यॅ लोके स्योनन्तें सह पत्याॅकरोमि ॥
इमं विष्याॅमि वरुॅणस्य पाशं यमबॅध्नीत सविता सुशेवॅः। धातुश्च योनौं
सुकृतस्यॅ लोकेऽरिंष्टान्त्वा सहपत्याॅ कृणोमि ॥ब्रह्मग्रन्थिविसर्जनम्॥

अग्न्युपस्थानम् ॥लाजकट्टणम्॥बोट्टुमुडि चीर आशीः ॥सौभाग्यकन्त आशीः ॥
भूरलकुण्डवायनदानम्॥अक्षताशीर्वचनम्॥भूरिदक्षिणादानम्॥हारती ॥
अग्निसंरक्षणम्॥ तां ततः प्रवा वाहयेत् प्रवा हारयेत्।समोप्यैतमग्निमनुहरन्ति।
नित्यो धार्यः। अनुगतो मन्थ्यः। श्रोत्रियागाराद्वाहार्यः॥

सायं गृहं गत्वा -विघ्नेश्वरपूजां कृत्वा-
पवित्रं धृत्वा दर्भेष्वासीनः दर्भान्धारयमाणः प्राणानायम्य सङ्कल्पं कुर्यात्-
अनया नवोढया वध्वा सह विवाहसमनन्तरं रथोत्तम्भनादि मन्त्रजपं
करिष्ये ॥उत्तरा रथोत्तम्भनी-सत्येनोत्तॅभिता भूमिस्सूर्येणोत्तॅभिता द्यौः।
ऋतेनॉदित्यास्तिष्ठॅन्ति दिवि सोमो अधिंश्रितः॥ वाहावुत्तराभ्यां युनक्ति
दक्षिणमग्रे-युञ्जन्तिं ब्रध्नमॅरुषञ्चरॅन्तं परिं तस्थुषॅः। रोचॅन्ते रोचना दिवि॥
योगेॅ योगे तवस्तॅरंवाजेॅ वाजे हवामहे। सखॉय इन्द्रॅमूतये॥
आरोहतीमुत्तराभिरभिमन्त्रयते-सुकिꣳ शुकꣳशॅल्मलिं विश्वरूॅपꣳ हिरॅण्य
वर्णꣳ सुवृतꣳ सुचक्रम्।आरोह वध्वमृतॅस्य लोकꣳ स्योनम्पत्यॅ वहतुं
कृॅणुष्व॥ उदुॅत्तरमारोहॅन्ती व्यस्यन्ती पृतन्यतः। मूर्धानम्पत्युरारोह
प्रजयॉ च विराड्भॅव॥ संराज्ञी श्वशुॅरे भव संराज्ञी श्वश्रूवाम्भॅव॥
ननान्दरि संराज्ञीं भव संराज्ञी अधिं देवृषुॅ। स्नुषाणाꣳश्वशुॅराणां प्रजाया
श्च धनॅस्य च। पतीनाञ्च देवृणाञ्चॅ सजातानां विराड् भॅव॥ सूत्रे वर्त्मनो

व्यवस्तृणात्युत्तरया नीलन्दक्षिणस्यां लोहितमुत्तरस्याम्- नीललोहिते भवतः कृत्यासत्तिर्व्यज्यते ।एधन्तेऽस्या ज्ञातयः पतिर्बन्धेषु बध्यते ॥

ते उत्तराभिरभियाति- ये वध्वश्चन्द्रं वहतुं यक्ष्मा यन्ति जनाꣳ अनु। पुनस्तान् यज्ञियाॅ देवा नयन्तु यत आगताः ॥ माविंदन्परिपन्थिनो य आसीदन्ति दम्पती । सुगेभिर्दुर्गमतीतामपद्रान्त्वराॅतयः । सुगम्पन्थाॅन मारुक्षमरिष्टꣳ स्वस्तिवाहनम् । यस्मिन्वीरो न रिष्यत्यन्येषां विन्दते वसु ॥

तीर्थस्थाणु चतुष्पथव्यतिक्रमे चोत्तराञ्जपेत्-ता मन्दसाना मनुषो दुरोण आधत्तꣳ रयिन्दशवींरं वचस्यवे । कृतन्तीर्थꣳ सुप्रपाणꣳशुभस्पती स्थाणुम्पथेष्टामपदुर्मतिꣳ हतम् ॥नावमुत्तरयाऽनुमन्त्रयते-अयन्नौ मह्याः पारꣳस्वस्ति नेषद्वनस्पतिः । सीराॅनस्सुतराॅ भव दीर्घायुत्वाय वर्चसे ॥ तीर्त्वोत्तराञ्जपेत्-अस्य पारे निरृथस्य जीवा ज्योतिरशीमहि । मह्या इन्द्र स्वस्तये ॥

श्मशानव्यतिक्रमे भाण्डे रथे वा रिष्टे अग्नेरुपसमाधाद्याज्यभागान्ते अन्वारब्धायामुत्तरा आहुतीर्हुत्वा जयादि प्रतिपद्यते परिषेचनान्तं करोति ॥

यद्वते चिदभिश्रिषः पुरा जतृभ्य आतृदः ।सन्धाता सन्धिं मघवा पुरूवसु र्निष्कर्ता विह्रुतम्पुनः ॥इडामग्ने पुरुदꣳसꣳसनिङ्गोशꣳश्वत्तमꣳ हवमानाय साध । स्यान्नस्सूनुस्तनयो विजावाग्ने सातेसुमतिर्भूत्वस्मे ॥इमम्मे वरुणश्श्रुधी हवमद्या च मृडय ।त्वामव स्युराचके ॥ तत्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो वरुणेह बोद्धयुरुशꣳस मान आयुःप्रमोषीः ॥त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेळो

हेडोऽवॅयासिसीष्ठाः ।यजिँष्ठो वह्नितमश्शोशुँचानोविश्वाद्वेषाꣳसि प्रमुँमुग्ध्यस्मत् ॥सत्वन्नॊ अग्नेऽवमो भॅवोती नेदिँष्ठो अस्या उषसो व्युँष्टौ ।अवॅ यक्ष्व नो वरुँणꣳरराँणो वीहि मृँडीकꣳसुहवॊ न एधि ॥त्वमँग्ने अयास्ययासन्मनॅसा हितः ।अयासन् हव्यमूँहिषेऽया नॊ धेहि भेषजम् ॥

क्षीरिणामन्येषां वालक्ष्मण्यानां वृक्षाणां नदीनां धन्वनाञ्चव्यतिक्रमे उत्तरे यथालिङ्गमपेत्

ये गँन्धर्वा अँप्सरसॅश्च देवीरिषु वृक्षेषुँ वानस्पत्येष्वासँते । शिवास्ते अस्यै वध्वै भवन्तु माहिꣳसिषुर्वहतुमूह्यमॉनाम् ॥या ओषँधयो या नद्यॊ यानि धन्वॉनि ये वना । ते त्वॉवधु प्रधावँतीं प्रत्वे मुँञ्चन्त्वꣳहँसः ॥

गृहानुत्तरया सङ्काशयति-सङ्कॉशयामि वहतुं ब्रह्मँणा गृहैरघौरेण चक्षुँषा मैत्रेँण । पर्याणँद्धं विश्वरूँपं यदस्याꣳस्योनं पतिभ्यस्सविता कृँणोतु तत् ॥

वाहावुत्तराभ्यां विमुञ्चति दक्षिणमग्रे-आवॉमगन्त्सुमतिर्वाँजिनीवसू न्यश्विँना हृत्सु कामाꣳ अयꣳसत । अभूँतञ्जोपा मिँथुना शुँभस्पती प्रिया अँर्यम्णा दुर्याꣳ अशीमहि ॥अयन्नौ देवस्सँविता बृहस्पतिरिन्द्राग्नी मित्रावरुँणा स्वस्तयेँ । त्वष्टा विष्णुँः प्रजयॉ सꣳरराणः काम आयॉतङ्कामॉयत्वा विमुँञ्चतु ॥लोहितञ्चर्मानड्वहं प्राचीनग्रीवमुत्तरलोम मध्येऽगारस्योत्तरयाऽऽस्तीर्य-

शर्म वर्मेदमाहँरास्यै नार्याँ उपस्तिरे । सिनीँवालि प्रजॉयतामियं भगँस्य सुमतावँसत् ॥ गृहान्प्रपादयन्नुत्तरां वाचयति दक्षिणेन पदा-

गृहान्भद्रान्त्सुमनॅसः प्रपद्येऽवींरघ्नी वीरवॅतस्सुवीरान्ँ। इरां वहॅतो घृतमुक्षमॉणास्तेष्वहꣳ सुमनास्संविॅशामि ॥

प्रवेशहोम सङ्कल्पः- अनया नवोढया वध्वा सह विवाहप्रवेश होमं करिष्ये ॥उत्तरपूर्वे देशेऽगारस्य अग्नेरुपसमाधानाद्याज्यभागान्ते अन्वारब्धायां उत्तरा आहुतीर्हुत्वा-

आगॅन्गोष्ठं महिॅषी गोभिरश्वैरायुॅष्मत्पत्नी प्रजयास्वर्वित्ँ। बह्वीं प्रजा ञ्जनयॅन्ती सुरत्नेममग्निꣳ शतहिॅमास्सपर्यात्स्वाहा-अग्नय इदन्न मम ॥

अयमग्निर्गृहपॅतिस्सुसꣳसत्पुॅष्टिवर्धॅनः। यथा भगॅस्याभ्यां ददॅद्रयिं पुष्टिमथो प्रजाꣳस्वाहा-अग्नये गृहपतय इदन्न मम ॥

प्रजायाॅ आभ्यां प्रजापत इन्द्राग्नी शर्म॑ यच्छतम्ँ। यथैनॅयोर्न प्रॅमीयातॉ उभयोर्जीवॅतोः प्रजास्वाहा- इन्द्राग्निभ्यामिदन्न मम ॥

तेनॅ भूतेनॅ हविषायमाप्यॉयताम्पुनॅः। जायां यामॅस्मा आवाक्षुस्ताꣳ रसॅनाभिवॅर्धताꣳस्वाहा- इन्द्राग्निभ्यामिदन्न मम ॥

अभिवॅर्धताम्पयॅसाभिराष्ट्रेणॅ वर्धताम्ँ। रय्या सहस्त्रॅपोषसेमौ स्तामनॅ पेक्षितौ स्वाहा- इन्द्राग्निभ्यामिदन्न मम ॥

इहैवस्तं मावियोष्टं विश्वमायुर्व्यॅश्नुतम्ँ। मह्या इॅन्द्रस्वस्तये स्वाहा- इन्द्रायेदन्न मम ॥

ध्रुवैधि पोष्या मयि मह्यॅन्त्वादाद्बृहस्पतिॅः। मया पत्या प्रजावॅती सञ्जीव शरदॅश्शतꣳस्वाहा- बृहस्पतय इदन्न मम ॥

त्वष्टा॑ जायाम॑जनयत्त्वष्टास्यै त्वाम्पतिम्। त्वष्टा॑ सहस्रमायू॑ꣳषि दीर्घमायु॑ः कृणोतु वाꣳस्वाहा- त्वष्ट्र इदन्न मम॥

इमम्मे॑ वरुणश्श्रुधी हव॑मद्या च॑ मृडय।त्वाम॑व स्युराच॑के स्वाहा- वरुणायेदन्न मम॥

तत्वा॑यामि ब्रह्म॑णा वन्द॑मानस्तदाशास्ते यज॑मानो ह॒विर्भिः। अहे॑डमानो वरुणेह बोध्युरु॑शꣳस मान आयुःप्रमो॑षीस्स्वाहा- वरुणायेदन्न मम॥ त्वन्नो॑ अग्ने वरु॑णस्य विद्वान्देवस्य हे॒डोऽव॑यासिसीष्ठाः। यजि॑ष्ठो वह्नि॑तमश्शोशु॑चानोविश्वाद्वेषाꣳ॑सि प्रमु॑मुग्ध्यस्मत्स्वाहा- अग्नीवरुणाभ्यामिदन्न मम॥ सत्वन्नो॑ अग्नेऽवमो भ॑वोती नेदि॑ष्ठो अस्या उषसो व्यु॑ष्टौ।अव॑ यक्ष्व नो वरु॑णꣳरा॑णो वीहि मृ॑डीकꣳसुहवो॑ न एधि स्वाहा- अग्नीवरुणाभ्यामिदन्न मम॥ त्वम॑ग्ने अयास्ययासन्मन॑सा हितः। अयासन् ह॒व्यमू॒हिषेऽया नो॑ धेहि भेषजꣳस्वाहा- अग्नये अयस इदन्न मम॥

जयादि प्रतिपद्यते परिषेचनान्तं कृत्वा-उत्तरया चर्मण्युपविशत उत्तरो वरः-

इह गावः प्रजा॑यध्वमिहाश्वा॑ इह पूरु॑षाः। इहो सहस्र॑दक्षिणो रायस्पोषो निषी॑दतु॥ अथास्याः पुंस्वोर्जीवपुत्रायाः पुत्रमङ्क उत्तरया उपवेश्य सोमे॑नादित्या बलिनस्सोमे॑न पृथिवी दृढा। अथो नक्ष॑त्राणामेषामुपस्थे सोम आधि॑तः॥तस्मै फलान्युत्तरेण यजुषा प्रदाय-प्रस्वस्थः प्रेयं प्रजया भुव॑ने शोचेष्ट॥ उत्तरे जपित्वा- इह प्रियम्प्रजया॑ ते सम॑ृध्यतामस्मिन्गृहे

गार्हॅपत्याय जागृहि। एना पत्याँ तन्वꣳ सꣳसृजस्वाथा जीव्रीं विदथमावँदासि ॥सुमङ्गलीरियं वधूरिमाꣳ सँमेत पश्यँत। सौभाग्यमस्यै दत्वायाथास्तं विपरेँतन ॥

गन्धर्वप्रतिष्ठापनम्- दण्डो गन्धलिप्तो वाससा सूत्रेण वा परिवीतस्तिष्ठति-

गन्धर्वो विश्वावँसुः पर्यँमुष्णात्सतिस्रो रात्रीः परिँमुषितोऽवस त्तस्मात्तिस्रो रात्रीः क्रीतस्सोमौ वसति ।विश्वावँसुꣳ सोमगन्धर्वम्। आपौ ददृशुषीः। तदृतेनाव्यॉयन्। तदन्ववैत्। इन्द्रौ रारहाण ऑसाम्। परि सूर्यँस्य परिधीꣳरँपश्यत्। विश्वावँसुरभि तन्नौ गृणातु। दिव्यो गँन्धर्वो रजँसो विमानँः- अस्मिन् औदुम्बरदण्डे विश्वावसु संज्ञक गन्धर्वराजं ध्यायामि ।आवाहयामि ॥

इति षोडशोपचार पूजां कुर्यात्-

विश्वावसोऽत्र गन्धर्व दण्डे रात्रित्रयं वस।
आवयोः प्रीतिमुत्पाद्य रक्ष मां शुभलक्षणम्-इति प्रार्थयेत्॥

वाचं यच्छत आनक्षत्रेभ्यः-उदितेषु नक्षत्रेषु प्राचीमुदीचीं वा दिशमुपनिष्क्रम्य उत्तराभ्यां यथालिङ्गं ध्रुवमरुन्धतीञ्च दर्शयति-

ध्रुवक्षितिर्ध्रुवयोँनिर्ध्रुवमँसि ध्रुवतँस्थितम्। त्वन्नक्षँत्राणां मेथ्यसि समॉ पाहि पृतन्यतः ॥सप्तऋषयँः प्रथमां कृत्तिँकानामरुन्धतीम्। यद्ध्रुवता ꣳहनिन्युष्षट् कृत्तिँका मुख्ययोगं वहँन्तीयमस्माकँमधत्वष्टमी ॥

अथैनामाग्नेयेन स्थालीपाकेन याजयति-पत्न्यवहन्ति-श्रपयित्वाऽभिघार्य प्राचीनमुदीचीनं वोद्वास्य प्रतिष्ठितमभिघार्य अग्नेरुपसमाधानाद्याज्यभागान्ते

अन्वारब्धायां स्थालीपाकाज्जुहोति-सकृदुपस्तरणाऽभिघारणे द्विरवदानम् अग्निर्देवता स्वाहाकार प्रदानः अग्निस्विष्टकृत् द्वितीयः सकृदुपस्तरणाऽवदाने द्विरभिघारणम् मध्यात्पूर्वस्यावदानं मध्ये होमः उत्तरार्धादुत्तरस्य उत्तरार्धपूर्वार्धे होमः लेपयोः प्रस्तरवत्तूष्णीं बर्हिर्हुत्वा अग्नौ प्रहरति सिद्धमुत्तरं परिषेचनम्

आग्नेयस्थालीपाकः

दर्भेष्वासीनः दर्भान्धारयमाणःपत्न्या सह-
शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
ओंभूः - भूर्भुवस्सुवरों ममोपात्त समस्तदुरित क्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं अद्यपूर्वोक्त एवङ्गुणविशेषण विशिष्टायां अस्यां --शुभतिथौ एनां वधूं आग्नेयेन स्थालीपाकेन याजयिष्ये । तेन परमेश्वरं प्रीणयानि ॥उत्तरतो दर्भान्निरस्य ।अपउपस्पृश्य ॥ तिस्रास्तिस्रो रेखा लिखित्वा-अद्भिरवोक्ष्य-शकलमाग्नेय्यान्निरस्य-अपउपस्पृश्य-भूर्भुवस्सुवरोम्-इत्यौपासनाग्निं प्रतिष्ठाप्य पत्न्यवहन्ति ॥चरुं श्रपयित्वा अभिघार्य प्रतिष्ठितमभिघार्य

चत्वारि शृङ्गात्रयो अस्यपादा द्वे शीर्षे सप्तहस्तॉसो अस्य ।
त्रिधॉबद्धो वृॅषभो रौॅरवीति महोदेवो मर्त्यांऽआविवेश ॥
सप्तहस्तश्चतुश्शृङ्गः सप्तजिह्वो द्विशीर्षकः ।
त्रिपात्प्रसन्नवदनः सुखासीनश्शुचिस्मितः ॥
स्वाहान्तु दक्षिणे पार्श्वेदेवीं वामे स्वधान्तथा । बिभ्रद्दक्षिणहस्तैस्तु शक्तिमन्नं स्रुचं स्रुवम् ॥
तोमरं व्यजनं वामे घृतपात्रन्तु दक्षिणे ।
मेषारूढं जटाबद्धं गौरवर्णं महौजसम् ॥

धूमध्वजं लोहिताक्षं सप्तार्चिस्सर्वकामदम्। आत्माभिमुखमासीनं एवं ध्यायेत् हुताशनम्॥

एषहि देवः प्रदिशोऽनु सर्वाः पूर्वो हि जातस्स उ गर्भे अ न्तः।

सविजायमानस्स जनिष्यमाणः प्रत्यङ् मुखास्तिष्ठति विश्वतोमुखः॥

एह्यग्ने प्राङ्मुखदेव अग्ने मम अभिमुखो भव। सुमुखो भव। सुप्रसन्नो भव।वरदो भव। यथोक्तजिह्वया हविर्गृहाण-इति अक्षतोदकं अग्नेः पुरस्तान्निनीय-

भूर्भुवस्सुवः तत्सवितुर्वरेण्यं- भर्गोदेवस्य धीमहि- धियो यो

नः प्रचोदयात्- इति प्रति दिशं हस्तेन परिमृज्य अलंकृत्य

अग्नये नमः। हुतवहाय नमः।हुताशनाय नमः। कृष्णवर्त्मने नमः। देवमुखाय नमः।सप्तजिह्वाय नमः। वैश्वानराय नमः।जातवेदसे नमः।मध्ये श्री यज्ञपुरुषाय नमः॥

प्रागादि दर्भैरग्निंपरिस्तृणाति। पुरस्तात्।दक्षिणतः।पश्चात्।उत्तरतः। दक्षिणानुत्तरान् करोति उत्तरानधरान्॥उत्तरेणाग्निं दर्भान्त्सꣳस्तीर्य द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्ति। दर्व्याऽऽज्य स्थाल्यौ प्रोक्षणीप्रणीत्यौ इध्मस्स्रुवाविति।समौ साग्रौ दर्भौ प्रादेशमात्रौ पवित्रे कृत्वा तृणं काष्ठं वा अन्तर्धाय छिनत्ति न नखेन।अद्भिरनुमृज्य।सपवित्रेण पाणिना पात्राणि सम्मृश्य प्रोक्षणी पात्रमादाय अक्षतैस्सह अप आसिच्य प्राचीस्त्रिरुत्पूय मुखसममुद्धृत्य उत्तरेणाग्निं पुनरास्तीर्णेषु दर्भेषु सादयित्वा दर्भैः प्रच्छाद्य वरुणाय नमः सकलाराधनैस्समर्चितम्॥

ब्राह्मणं दक्षिणतो दर्भेषु निषाद्य अस्मिन् आग्नेयस्थालीपाककर्मणि ब्राह्मणस्य इदमासनम् सकलाराधनैस्समर्चितम्॥

आज्यस्थालीमादाय आज्यं विलाप्य उदीचोऽङ्गारान्निरूह्य तेष्वाज्यमधिश्रित्य

ज्वलतातृणेन अधोगामिन्यादीप्त्या आज्ये प्रतिफलीकृत्य द्वे दर्भाग्रे प्रच्छिद्य प्रक्षाळ्य प्रत्यस्य आज्ये प्रास्य त्रिः पर्यग्निकृत्वा उदगुद्वास्य अङ्गारान्प्रत्यूह्य उदगग्राभ्यां पवित्राभ्यां पुनराहारमाज्यं त्रिरुत्पूय पवित्रग्रन्थिं विस्रस्य अपउपस्पृश्य प्रागग्रमग्नौ प्रहरति ।येन जुहोति तदग्नौ प्रतितप्य दर्भाग्रैऽसम्मृज्य पुनः प्रतितप्य प्रोक्ष्य निधाय दर्भानद्विस्सꣳस्पर्श्य अग्नौ प्रहरति ॥परिधीन्परिदधाति स्थविष्ठं पश्चात् अणीयान् द्राघीयान्दक्षिणार्ध्यः अणिष्ठो ह्रसिष्ठ उत्तरार्ध्यः ॥मध्यमं परिधिं हस्तेनोपस्पृश्य ऊर्ध्वे आधारसमिधौ दक्षिणमुत्तरमादधाति ॥ अथाग्निं परिषिञ्चति-

अदितेऽनुॅमन्यस्व-दक्षिणतः प्राचीनम् ।

अनुॅमतेऽनुॅमन्यस्व-पश्चादुदीचीनम् ।

सरꣳस्वतेऽनुॅमन्यस्व- उत्तरतः प्राचीनम् ।

देवॅसवितः प्रसुॅव-समन्तम् ॥

इध्ममाज्येनाभ्यज्य अनूयाजसमिधमवशेष्य इध्ममलंकृत्य ब्रह्माणमलंकृत्यइध्ममाज्येनाभ्यज्य अनूयाजसमिधमवशेष्य इध्ममलंकृत्य ब्रह्माणमलंकृत्य स्वयमलंकुर्यात्

चत्वारि शृङ्गात्रयॊ अस्यपादा द्वे शीर्षे सप्तहस्तॉसो अस्य ।त्रिधॉ बद्धो वृॅषभो रॉरवीति महोदेवो मर्त्याꣳआविवेश ॥ भूर्भुवस्सुवरोम् अस्मिन्आग्नेयस्थालीपाककर्मणि ब्राह्मण इध्ममाधास्ये । ओंआधत्स्व ॥ब्रह्मार्पणम् ॥ इतरदर्व्या जुहोति वायव्यादाग्नेयान्तं प्रजापतिं मनसा ध्यायन् तूष्णीमाघारावाघारयति-

स्वाहा-प्रजापतय इदं नमम ।प्रधानदर्व्या जुहोति निरृत्या ईशानान्तं - स्वाहा-इन्द्रायेदं न मम ॥ चतुर्गृहीतं गृहीत्वा उत्तरार्धेऽग्नये जुहोति अग्नये स्वाहा- अग्नय इदं नमम ॥पुनश्चतुर्गृहीतं गृहीत्वा दक्षिणार्धे सोमाय- सोमाय स्वाहा- सोमाय इदं नमम ॥ पुनश्चतुर्गृहीतं गृहीत्वा

मध्ये- अग्नये स्वाहा- अग्नय इदं नमम ॥
सङ्कल्पप्रभृति एतत्क्षणपर्यन्तं मध्ये
सम्भावितसमस्तविध्यपराधप्रायश्चित्तार्थं सर्वप्रायश्चित्तं होष्यामि-

ओं भूर्भुवस्सुवस्स्वाहा ।प्रजापतय इदं न मम ॥

स्रुच्युपस्तीर्य यथागोत्रं द्विस्त्रिर्वावदायाभिघार्य हविःप्रत्यभिघार्य स्रुङ्
मुखमानीय-अग्नये स्वाहा-अग्नय इदन्न मम ॥

उत्तरार्धात्सकृत्स्विष्टकृतेवदाय -द्विः पञ्चावत्तिनः-

अग्नये स्विष्टकृते स्वाहा-अग्नये स्विष्टकृत इदन्न मम ॥
अनूयाजसमिधमग्नौ प्रहरति-स्वाहा-अग्नय इदन्न मम ॥
इध्मसन्नहनरज्जुमग्नौ प्रहरति स्वाहा-रुद्राय तन्तिचराय इदन्न
मम ॥अपउपस्पृश्य

एतत्कर्म समृध्यर्थं जयादिवर्जम् प्राजापत्यादिहोमं करिष्ये ।

प्रजॉपते नत्वदेतान्यन्यो विश्वॉ जातानि परिता बॅभूव ।
यत्कॉमास्ते जुहुमस्तन्नों अस्तु वयꣳस्यॉम पतॅयो रयीणाꣳ
स्वाहा- प्रजापतय इदन्न मम ॥भूःस्वाहा-अग्नय इदन्न मम ॥
भुवःस्वाहा-वायव इदन्नमम ॥ सुवःस्वाहा-सूर्यायेदन्न मम ॥
यदॅस्यकर्मणोऽत्यरीरिचंयद्वान्यूॅनमिहाकॅरम् ।
अग्निष्टत्स्विॅष्टकृद्विद्वान्त्सर्वꣳस्विॅष्टꣳसुहुॅतङ्करोतुस्वाहा-
अग्नये स्विष्टकृत इदन्न मम ॥

परिध्यञ्जनम्-लेपकार्यम्-लेपयोःप्रस्तरवत्तूष्णींबर्हिरह्वक्त्वा तृणमन्यत्रनिधाय
अग्नौ प्रहरति ।तृणप्रहरः-निर्देशनञ्च-अग्निमभिमन्त्र्य- भूमौ निमार्ष्टि-

परिधिप्रहरः-इतरौप्रहरन्-उत्तरार्ध्यस्याग्रं अङ्गारेषूपोहति-आघारसमिधौ प्रहृत्य- सꣳस्रावेणाभिजुहोति-

स्वाहा-वसुभ्यो रुद्रेभ्य आदित्येभ्यस्सꣳस्रावभागेभ्य इदं न मम ॥

ओं भूर्भुवस्सुवस्वाहा-प्रजापतय इदन्न मम ॥

अस्मिन् पूर्णमासस्थालीपाककर्मणि अविज्ञातप्रायश्चित्तानिकरिष्ये ।

अनाज्ञातं यदाज्ञॉतम् ।यज्ञस्यॅ क्रियते मिथुॅ ।अग्ने तदॅस्य कल्पय ।

त्वꣳहि वेत्थॅ यथा तथꣳस्वाहा-अग्नयइदन्नमम ॥

पुरुॅषसम्मितोयज्ञः ।यज्ञःपुरुॅषसम्मितः ।अग्ने तदॅस्य कल्पय ।

त्वꣳहि वेत्थॅ यथा तथꣳस्वाहा-अग्नय इदन्न मम ॥

यत्पॉकत्रा मनॅसा दीनदॅक्षा न ।यज्ञस्यॅ मन्वते मर्तॉसः ।

अग्निष्ट्वोता क्रतुविद्विॅजानन् ।यजिॅष्ठो देवाꣳऋॅतुशो यॅजाति स्वाहा-

अग्नय इदन्न मम ॥

त्वन्नॉ अग्ने वरुॅणस्य विद्वान्देवस्यहेडोऽवॅयासिसीष्ठाः ।यजिॅष्ठो

वह्नितम शशोशुॅचानो विश्वाद्वेषाꣳसि प्रमुॅमुग्ध्यस्मत्स्वाहा-

अग्नीवरुणाभ्यामिदन्न मम ॥

सत्वन्नॉ अग्नेऽवमो भॅवो ती नेदिॅष्ठो अस्या उषसो व्युॅष्टौ ।अवॅ

यक्ष्व नो वरुॅणꣳरराॅणो वीहि मृॅडीकꣳसुहवॉ न एधि स्वाहा-

अग्नीवरुणाभ्यामिदन्न मम ॥

आभिर्गीर्भिर्यदतॉ नऊनमाप्यॅायय हरिवो वर्धॅमानः ।यदा स्तोतृभ्यो

महिँ गोत्रारुजासिँ भूयिष्ठ भाजो अधँ ते स्याम स्वाहा-
इन्द्राय हरिवते वर्धमानायेदन्न मम ॥
इदंविष्णुर्विचँक्रमे त्रेधा निदँधे पदम्। समूँढमस्य पाःसुरेस्वाहा-
विष्णवइदन्न मम ॥
त्र्यँम्बकं यजामहे सुगन्धिंपुँष्टिवर्धँनम्।उर्वारुकमिँवबन्धँनान्मृत्यो
र्मुँक्षीय मामृतात्स्वाहा-त्र्यम्बकायेदन्न मम ॥
यद्विद्वाःसो यदविँद्वाःसोमुग्धाःकुर्वन्त्यृत्विजँः।अग्निर्मातस्मा
देनँसःश्रद्धादेवीचँमुञ्चताःस्वाहाँ-अग्निश्रद्धाभ्यामिदन्न मम ॥
अस्कान्द्यौःपृँथिवीम्।अस्कँान्ऋषभोयुवागाःस्कन्नेमाविश्वाँना।
स्कन्नो यज्ञःप्रजँनयतु। अस्कानजँनिप्राजँनि।आस्कन्नाज्जँायते
वृषा। स्कन्नात्प्रजँनिषीमहिस्वाहा-अग्नय इदन्न मम ॥
यन्मँ आत्मनोँमिन्दाभूँदग्निस्तत्पुनराहार्जातवेँदा विचँर्षणि स्वाहा-
अग्नये जातवेदसे विचर्षणय इदन्न मम ॥
पुनँरग्निश्चक्षुँरदात्पुनरिन्द्रो बृहस्पतिँः।पुनँर्मे अश्विनायुवञ्चक्षुराधँत्त
मक्ष्योस्वाहा- अग्नीन्द्रबृहस्पत्यश्विभ्य इदन्न मम ॥
पुनँस्त्वादित्या रुद्रा वसँवस्समिँन्धतां पुनँर्ब्रह्माणो वसुनीथ यज्ञैः।
घृतेन त्वन्तनुवोँ वर्धयस्व सत्यास्सँन्तु यजँमानस्यकामास्वाहा-
वसुनीथायाग्नय इदन्न मम ॥भूःस्वाहा-अग्नय इदन्न मम ॥

भुवःस्वाहा-वायव इदन्न मम ॥सुवःस्वाहा-सूर्यायेदन्न मम ॥

ओंभूर्भुवस्सुवस्वाहा-प्रजापतय इदन्न मम ॥

अस्मिन् पूर्णमासस्थालीपाक कर्मणि मध्ये नानाप्रकारेण सम्भावित समस्तविध्यपराधप्रायश्चित्तार्थं सर्वप्रायश्चित्तं होष्यामि-

ओं भूर्भुवस्सुवस्वाहा-प्रजापतय इदन्न मम ॥

सर्वं श्री विष्णवे स्वाहा- विष्णवे परमात्मन इदन्न मम ॥

नमो रुद्राय पशुपतये स्वाहा- रुद्राय पशुपतय इदन्न मम ॥

अपउपस्पृश्य- द्वादशगृहीतेन स्रुचम्पूरयित्वा-

सप्त तें अग्ने समिधॅस्सप्तजिह्वास्सप्त ऋषॅयस्सप्तधामॅ प्रियाणिं ।

सप्त होत्रास्सप्तधात्वॅा यजन्ति सप्तयोनीरापॅृणस्वा घृतेन स्वाहा-

अग्नये सप्तवत इदं न मम ॥आज्यपात्रमुत्तरतो निधाय प्रायश्चित्तम् द्वादश कृष्णस्मरणम् प्राणायामः ॥ परिषेचनम्

अदितेऽन्वॅमꣳस्थाः ।अनुॅमतेऽन्वॅमꣳस्थाः ।

सरॅस्वतेऽन्वॅमꣳस्थाः ।देवॅसवितः प्रासॅावीः ॥

वरुणाय नमः सकलाराधनैस्समर्चितम् ॥

प्रतिजलमिश्रम् - सदॅसि सन्मॅभुयास्सर्वॅमसि सर्वॅम्मे भूयाः पूर्णमॅसि पूर्ण मॅभूया अक्षितमसिमामे क्षेष्ठाः ॥ प्रतिदिशं निनयेत्-

प्राच्यान्दिशिदेवाऋत्विजोंमार्जयन्ताम् ।दक्षिणायान्दिशिमासाःपितरों मार्जयन्ताम् ।प्रतीच्यान्दिशि गृहाः पशवों मार्जय न्ताम् ।उदीच्या

न्दिश्याप ओषँधयो वनस्पतँयोमार्जयन्ताम्।ऊर्ध्वायान्दिशियज्ञ स्सँवत्सरोयज्ञपँति मार्जयन्ताम्॥ समुद्रंवःप्रहिँणोमिस्वांयोनिमपि गच्छतअच्छिँद्रःप्रजयाँभूयासम्मा परासेचिमत्पयँः॥ आत्मानं प्रोक्षेत्॥

ब्रह्मन् वरन्ते ददामि। ब्रह्मणे नमः सकलाराधनैस्समर्चितम्॥

औपासनारम्भः

दर्भेष्वासीनः दर्भान्धारयमाणःपत्न्या सह-
शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये॥
ओंभूः - भूर्भुवस्सुवरों ममोपात्त समस्तदुरित क्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं अद्यपूर्वोक्त एवङ्गुणविशेषण विशिष्टायां अस्यां --शुभतिथौ औपासनं आरप्स्ये। तेन यावज्जीवं सायंप्रातः तण्डुलैः होष्यामि।तेन परमेश्वरं प्रीणयानि॥द्विः॥ममोपात्त समस्तदुरित क्षय द्वारा श्रीपरमेश्वरप्रीत्यर्थं सायमौपासनं तण्डुलैः होष्यामि।तेन परमेश्वरं प्रीणयानि॥द्विः॥
उत्तरतो दर्भान्निरस्य अपउपस्पृश्य॥ अथाग्निं परिषिञ्चति-

अदितेऽनुँमन्यस्व-दक्षिणतः प्राचीनम्।

अनुँमतेऽनुँमन्यस्व-पश्चादुदीचीनम्।

सरँस्वतेऽनुँमन्यस्व- उत्तरतः प्राचीनम्।

देवँसवितः प्रसुँव-समन्तम्॥ स्वाहा- समिधमग्नौ निधाय आदीप्तायां समिधि पत्न्या हस्तात् तण्डुलान् स्वीकृत्य जुहोति-अग्नये स्वाहा-अग्नय इदन्न मम॥
अग्नये स्विष्टकृते स्वाहा-अग्नये स्विष्टकृत इदन्न मम॥

स्वाहा- समिधमग्नौ निधाय उत्तरपरिषेचनम्

अदितेऽन्वँमꣳस्थाः ।अनुँमतेऽन्वँमꣳस्थाः ।

सरँस्वतेऽन्वँमꣳस्थाः ।देवँसवितः प्रासॅावीः ॥

सायमौपासनसाद्गुण्यार्थं अनाज्ञातादि मन्त्रजप ङ्करिष्ये-

अनाज्ञातं यदाज्ञॅातम् ।यज्ञस्यँ क्रियते मिथुँ ।

अग्ने तदँस्यकल्पय ।त्वꣳहि वेत्थँ यथा तथम् ॥

पुरुँषसम्मितो यज्ञः ।यज्ञःपुरुँषसम्मितः । अग्ने तदँस्यकल्पय ।

त्वꣳहिवेत्थँ यथा तथम् ॥ यत्पाकत्रा मनँसा दीनदँक्षा न ।

यज्ञस्यँ मन्वते मर्ताँसः ।अग्निष्ट्वोता क्रतुविद्विँजानन् ।

यजिँष्ठो देवाꣳऋँतुशो यँजाति ॥

इदंविष्णुर्विचँक्रमे त्रेधा निदँधे पदम् । समूँढमस्य पाꣳसुरे ॥

भूर्भुवस्सुवः । वैश्वानरायँ विद्महेँ लालीलायँ धीमहि ।

तन्नोँ अग्निःप्रचोदयात् ॥ स्वाहा-अग्नेरुपस्थानङ्करिष्ये ।अग्ने त्वन्नो

अन्तँमः ।उतत्राता शिवो भँव वरूथ्यँः । तन्त्वाँ शोचिष्ठदीदिवः ।सुम्नायँ

नूनमीँमहे सखिँभ्यः ।वसुँरग्निर्वसुँश्रवाः । अच्छाँ नक्षिद्युमत्तँमो रयिन्दाः ।

सनोँ बोधि श्रुधीहवँमुरुष्याणोँ अघायतस्समँस्मात् ॥

स्वस्तिश्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलम् ।
आयुष्यन्तेज आरोग्यन्देहिमेहव्यवाहन ॥

श्रियन्देहिमेहव्यवाहन ओं नम इति ॥
चतुस्सागरपर्यन्तं गोब्राह्मणेभ्यश्शुभं भवतु--आर्षेय प्रवरान्वित --
गोत्रः आपस्तम्बसूत्रः यजुश्शाखाध्यायी --शर्मा नामा अहं भो
अभिवादये ॥

अग्नेनयॅसुपथॉ राये अस्मान्विश्वॉनि देववयुनॉनिविद्वान्।
युयोध्यॅस्मज्जुॅहुराणमेनो भूयिॅष्ठान्ते नमॅउक्तिंविधेम ॥

अग्नये नमः ॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं हुताशन।
यद्धुतन्तुमया देव परिपूर्णन्तदस्तुते ॥
प्रायश्चित्तान्यशेषाणितपःकर्मात्मकानि वै।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥कृष्ण कृष्ण कृष्ण ॥
यज्ञेश्वरायनमःसमस्तोपचारपूजास्समर्पयामि ॥

ओंभूर्भुवस्सुवॅः तत्सॅवितुर्वरेण्यं भर्गॅोदेवस्यॅ धीमहि धियो
योनॅःप्रचोदयात् ॥ देवॅसवितःप्रसुव ।सत्यन्त्वर्तेन परिॅषिञ्चामि।
अमृतमस्तु। अमृतोपस्तरणॅमसि। प्राणायस्वाहा। अपानाय
स्वाहा। व्यानाय स्वाहा। उदानायस्वाहा। समानायस्वाहा।
ब्रह्मॅणे स्वाहा ।यज्ञेश्वराय नमः हुतशेषंतण्डुलोपहारंनिवेदयामि ॥

नमस्तेगार्हपत्यायनमस्तदक्षिणाग्नये।
नमआहवनीयायमहावेद्यैनमोनमः ॥
काण्डद्वयोपपाद्यायकर्मब्रह्मस्वरूपिणे।
स्वर्गापवर्गरूपाय यज्ञेशाय नमोनमः ॥
यज्ञेशाच्युत गोविन्द माधवानन्त केशव।

कृष्णविष्णो हृषीकेश वासुदेव नमोस्तु ते ॥
अपराधसहस्राणिक्रियन्तेऽहर्निशम्मया ।
दासोऽयमितिमांमत्वाक्षमस्वपरमेश्वर ॥

रक्षांधरेत्-बृहत्सामॅक्षत्रभृद्वृद्धवॅृष्णियंत्रिष्टुभौजॅश्शुभितमुग्रवींरम् ।

इन्द्रस्तोमेॅन पञ्चदशेन मध्यॅमिदं वातेॅन सगॅरेण रक्ष ॥

यस्य स्मृत्या च नामोक्त्या तपो होम क्रियादिषु ।
न्यूनंसम्पूर्णतांयातिसद्योवन्दे तमच्युतम् ॥
अनेनप्रातरौपासनेनभगवान्सर्वात्मकःयज्ञेश्वरःप्रीणातु ॥
न्यूनातिरिक्तंसर्वसुगुणमस्तु ॥तत्सद्ब्रह्मार्पणमस्तु ॥ओंतत्सत् ॥
अनन्तरं पञ्चपालिका पूजां कुर्यात्- पालिकासु तीर्थमासिञ्चेत् । दम्पती परस्परं नामप्रश्नपूर्वकं क्रीडनं कुर्वन्तीति सम्प्रदायः ॥
एवं अहरहः सायं प्रातः सन्ध्यावन्दनानन्तरं औपासनं गन्धर्वराजपूजां पञ्चपालिकापूजाञ्च कुर्वन् दीक्षानियमान् अनुतिष्ठेत् ॥ दीक्षानियमाः-
त्रिरात्रमुभयोरधश्शय्या ब्रह्मचर्यं क्षारलवणवर्जनञ्च ॥
दम्पती न स्नायात् ।ग्रामसीमोल्लङ्घनं न कुर्यात् ।उदयास्तमयकालेषु सायं प्रातः पञ्चवादनप्रभृति सप्तवादनपर्यन्तं गृहसीमोल्लङ्घनमपि न कुर्यात् ।दीक्षावस्त्रं न त्यजेत् ।उभयोः अधश्शय्या ।शयनार्थम् खट्वादिकं नोपयुञ्जयात् ।ब्रह्मचर्यं क्षारलवणवर्जनञ्च । दीक्षावस्त्रधारण अधश्शय्या क्षारलवणवर्जनेषु नियमलोपे कृच्छ्राचरणेन परिहारः भवति । अन्येषु नियमलोपेषु परिहारो नास्ति ।महान्दोषो भवति ॥
दीक्षामध्ये एकस्मिन्दिने दम्पत्योः विवाहसमयलग्नापेक्षया आदित्यानां नवानां ग्रहाणां आनुकूल्यसिध्यर्थम् दृष्टिदोषादि निवृत्यर्थम् लौकिकाग्नौ नवग्रहमखं आचार्यमुखेन कुर्यात् । ब्राह्मणानाहूय त्रयस्त्रिंशत्कोटिदेवता पूजापूर्वकं ब्राह्मणपूजां कृत्वा वेदचतुष्टयमन्त्रैः महदाशीर्वचनञ्च कुर्यात् ।ब्राह्मणानां भूरिदक्षिणां दद्यात् । चणकादिकं भक्ष्यादिकञ्च निवेद्य सर्वेषां विनियुञ्जयात् ॥
एवं त्रिरात्रदीक्षानियमयुक्त विवाहेन दम्पत्योः ऋषितुल्याः पुत्रा जायन्ते ॥

शेषहोमप्रयोगः

विवाहात् चतुर्थे दिने ब्राह्ममुहूर्तकालात्पूर्वमुत्थाय- विघ्नेश्वरपूजां कृत्वा-
तं चतुर्थ्यामपररात्रे उत्तराभ्यामुत्थाप्य-

उदीर्ष्वातो विश्वावसो नमॅसेडामहेत्वा । अन्यामिॅच्छ प्रफर्व्यꣳसञ्जाया
म्पत्याॅ सृज ॥उदीर्ष्वातः पतिवतीह्येषा विश्वावॅसुन्नमॅसागीर्भिरीट्टे ।
अन्यामिॅच्छ पितृषदं व्याॅक्ताꣳ स तें भागो जनुषा तस्याॅ विद्धि ॥

गन्धलिप्तं औदुम्बरदण्डं प्रक्षाळ्य विसृजेत् ॥ ततश्शेषहोमसङ्कल्पः-

दर्भेष्वासीनः दर्भान्धारयमाणःपत्न्या सह-
शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
ओंभूः - भूर्भुवस्सुवरों ममोपात्त समस्तदुरित क्षयद्वारा श्रीपरमेश्वर प्रीत्यर्थं शुभेदिने शोभने मुहूर्ते
अद्यब्रह्मणःद्वितीयपरार्धेश्वेतवराहकल्पे वैवस्वत मन्वन्तरेअष्टाविꣳशतितमे कलियुगे प्रथमेपादे जम्बूद्वीपे भारतवर्षे भरतखण्डे मेरोः दक्षिणेपार्श्वेदण्डकारण्ये शकाब्दे अस्मिन् वर्तमाने व्यावहारिके चान्द्रमानेन प्रभवादि षष्टिसंवत्सराणांमध्ये--संवत्सर--अयने--ऋता--मासे--पक्षे--पुण्यतिथौ--वासरयुक्तायां--नक्षत्रयुक्तायां--नामयोग--नामकरण एवङ्गुणविशेषण विशिष्टायां अस्यां --शुभतिथौ अनया नवोढया वध्वासह उद्वाहशेषहोमं करिष्ये ॥अग्नेरुपसमाधानाद्याज्यभागान्ते भूर्भुवस्सुवरोम्-इत्यौपासनाग्निं प्रतिष्ठाप्य इत्यादि सर्वं कुर्यात्-
उत्तरार्धेऽग्नये जुहोति -अग्नये स्वाहा- अग्नय इदं नमम ॥
पुनश्चतुर्गृहीतं गृहीत्वा दक्षिणार्धे सोमाय- सोमाय स्वाहा- सोमाय इदं नमम ॥

सङ्कल्पप्रभृति एतत्क्षणपर्यन्तं मध्ये सम्भावितसमस्तविध्यपराध प्रायश्चित्तार्थं सर्वप्रायश्चित्तं होष्यामि-

ओं भूर्भुवस्सुवस्स्वाहा ।प्रजापतय इदं न मम ॥

अन्वारब्धायां उत्तरा आहुतीर्हुत्वा-

अग्ने प्रायश्चित्ते त्वन्देवानाम्प्रायँश्चित्तिरसि ब्राह्मणस्त्वाँ नाथकाँमः प्रपँद्ये यास्यां पँतिघ्नी तनूः प्रँजाघ्नी पँशुघ्नी लँक्ष्मिघ्नी जाँरघ्नीमँस्यैतां कृँणोमि स्वाहा-अग्नय इदन्न मम ॥

वायो प्रायश्चित्ते त्वन्देवानाम्प्रायँश्चित्तिरसि ब्राह्मणस्त्वाँ नाथकाँमः प्रपँद्ये यास्यां पँतिघ्नी तनूः प्रँजाघ्नी पँशुघ्नी लँक्ष्मिघ्नी जाँरघ्नीमँस्यैतां कृँणोमि स्वाहा- वायव इदन्न मम ॥ आदिँत्य प्रायश्चित्ते त्वन्देवाना म्प्रायँश्चित्तिरसि ब्राह्मणस्त्वाँ नाथकाँमः प्रपँद्ये यास्यां पँतिघ्नी तनूः प्रँजाघ्नी पँशुघ्नी लँक्ष्मिघ्नी जाँरघ्नीमँस्यैतां कृँणोमि स्वाहा- आदित्यायेदन्न मम ॥

प्रजाँपते प्रायश्चित्ते त्वन्देवानाम्प्रायँश्चित्तिरसि ब्राह्मणस्त्वाँ नाथकाँमः प्रपँद्ये यास्यां पँतिघ्नी तनूः प्रँजाघ्नी पँशुघ्नी लँक्ष्मिघ्नी जाँरघ्नीमँस्यैतां कृँणोमि स्वाहा- प्रजापतय इदन्न मम ॥

प्रसवश्चौपयामश्च काटँश्चार्णवश्चँ धर्णिसिश्च द्रविणञ्च भगँश्चान्तरिँक्षञ्च सिन्धुँश्च समुद्रश्च सरँस्वाःश्च विश्वव्यँचाश्च ते यन्द्विष्मो यश्चँ नो द्वेष्टि तमँषाञ्जम्भैँ दध्मस्स्वाहा- प्रसवादिभ्य इदन्न मम ॥

मधुँश्च माधँवश्च शुक्रश्च शुचिँश्च नभँश्च नभस्यँश्चेषश्चोर्जश्च सहँश्च सहस्यँश्च तपँश्च तपस्यँश्च ते यन्द्विष्मो यश्चँ नो द्वेष्टि तमँषाञ्जम्भैं दध्मस्स्वाहा-मध्वादिभ्य इदन्न मम ॥

चित्तञ्च चित्तिश्चाकूँतञ्चाकूँतिश्चाधीँतञ्चाधीँतिश्च विज्ञाँतञ्च विज्ञानँञ्च नामँ च क्रतुँश्च दक्षँश्च पूर्णमाँसश्च ते यन्द्विष्मो यश्चँ नो द्वेष्टि तमँषाञ्जम्भैं दध्मस्स्वाहा-चित्तादिभ्य इदन्न मम ॥

अनूयाजसमिधमग्नौ प्रहरति इत्यादि जयादि प्रतिपद्यते परिषेचनान्तं कृत्वा-ब्रह्मोद्वासनान्ते-अपरेणाग्निं प्राचीमुपवेश्य तस्याश्शिरस्याऽऽज्यशेषात् व्याहृतिभिरोङ्कारचतुर्थाभिरानीय-

भूस्स्वाहा भुवस्स्वाहा सुवस्स्वाहोꣳस्वाहा ॥

उत्तराभ्यां यथालिङ्गं मिथस्समीक्ष्य-

अपँश्यन्त्वा मनँसा चेकिँतानन्तपँसो जातन्तपँसो विभूँतम्। इह प्रजामिह रयिꣳ ररँाणः प्रजाँयस्व प्रजयाँ पुत्रकाम ॥अपँश्यन्त्वा मनँसा दीध्यँानाꣳस्वायान्तनूꣳ ऋत्विये नाथँमानाम्। उपमामुच्चा युँवति र्बुभूँयाः प्रजाँयस्व प्रजयाँ पुत्रकामे ॥

उत्तरयाऽऽज्यशेषेण हृदयदेशौ सम्मृज्य-समँञ्जन्तु विश्वेँ देवास्समापो हृदँयानि नौ। सम्माँतरिश्वा सन्धाता समु देष्ट्री दिदेष्टुनौ ॥

उत्तरास्तिस्रो जपित्वा-प्रजाँपते तन्वँम्मे जुषस्व त्वष्टर्देवेभिस्सहसा म इँन्द्र। विश्वेदेवैरातिभिस्सꣳरराणः पुꣳसाम्बँहूनाम्मातरँस्स्याम ॥ आनँः प्रजा

ऋनयतु प्रजापॅतिराजरसाय समॅनक्त्वर्यमा। अदुॅर्मङ्गलीः पतिलोकमा विंश शन्नॊ भव द्विपदे शञ्चतुॅष्पदे॥ ताम्पूॅषञ्छिवतॅमामेरॅयस्व यस्यां बीजॅम्मनुष्याॅ वपॅन्ति। या नॅ ऊरू उॅशती विस्रयाॅतै यस्याॅमुशन्तः प्रहॅरेम शेफम्॥

आवयोः उद्वाहशेषहोम मुहूर्तस्सुमुहूर्तोऽस्त्विति भवन्तो महान्तो ऽनुगृह्णन्तु। सुमुहूर्तोऽस्तु॥

स्वाहा-अग्नेरुपस्थानङ्करिष्ये।अग्ने त्वन्नो अन्तॅमः।उतत्राता शिवो भॅव वरूथ्यॅः। तन्त्वॉ शोचिष्ठदीदिवः।सुम्नायॅ नूनमीमहे सखिॅभ्यः। वसुॅरग्निर्वसुॅश्रवाः। अच्छॉ नक्षिद्युमत्तॅमो रयिन्दाः।सनॊ बोधि श्रुधी हवॅमुरुष्याणॊ अघायतस्समॅस्मात्॥

स्वस्तिश्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलम्।
आयुष्यन्तेज आरोग्यन्देहिमेहव्यवाहन॥
श्रियन्देहिमेहव्यवाहन ओं नम इति॥
चतुस्सागरपर्यन्तं गोब्राह्मणेभ्यश्शुभं भवतु--आर्षेय प्रवरान्वित --गोत्रः आपस्तम्बसूत्रः यजुश्शाखाध्यायी --शर्मा नामा अहं भो अभिवादये॥

अग्नेनयॅसुपथॉ राये अस्मान्विश्वॉनि देववयुनॉनिविद्वान्।
युयोध्यॅस्मज्जुॅहुराणमेनो भूयिॅष्ठान्ते नमॅउक्तिंविधेम॥

अग्नये नमः॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं हुताशन।
यद्धुतन्तुमया देव परिपूर्णन्तदस्तुते॥

प्रायश्चित्तान्यशेषाणितपःकर्मात्मकानि वै ।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥कृष्ण कृष्ण कृष्ण ॥
यज्ञेश्वरायनमःसमस्तोपचारपूजास्समर्पयामि ॥

ओंभूर्भुवस्सुवॅः तत्सॅवितुर्वरेण्यं भर्गॊंदेवस्यॅ धीमहि धियो
योनॅःप्रचोदयात् ॥ देवॅसवितःप्रसुव ।सत्यन्त्वर्तेन परिंषिञ्चामि ।
अमृतमस्तु । अमृतोपस्तरणॅमसि । प्राणायस्वाहा । अपानाय
स्वाहा । व्यानाय स्वाहा । उदानायस्वाहा । समानायस्वाहा ।
ब्रह्मॅणे स्वाहा ।यज्ञेश्वराय नमः हुतशेषं आज्योपहारं निवेदयामि ॥
ततः दंम्पत्योः मङ्गळस्नानं कारयेत् ॥ सन्ध्यावन्दनम् औपासनञ्च काले
कृत्वा नाकबल्युत्सवं कुर्यात् ॥

नाकबल्युत्सवप्रयोगः

शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
ओंभूः - भूर्भुवस्सुवरों ममोपात्त समस्तदुरित क्षयद्वारा
श्रीपरमेश्वरप्रीत्यर्थं अद्यपूर्वोक्त एवङ्गुणविशेषण विशिष्टायां अस्यां
--शुभतिथौ मम वध्वाश्रित विश्वावसुसंज्ञक गन्धर्वनिरासार्थम्
स्वस्त्रीत्व सिध्यर्थम् आवयोः अग्निवृध्यर्थम् नाकबल्युत्सवं
करिष्ये ॥
सरोवरे मध्ये हिरण्यगर्भम् आवाहयेत्-
हिरण्यगर्भस्समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । सदाधार
पृथिवीन्द्यामुतेमाङ्कस्मै देवाय हविषा विधेम-अस्मिन् सरोवरमध्ये
हिरण्यगर्भम् आवाहयामि ॥

दाक्षायणीं महादेवीं सर्वसम्पत्प्रदायिनीम्।
वरपाशांकुशयुतां तथाचाऽभयदायिनीम्॥
रत्नकेयूरकटक मुकुटाद्यैरलंकृताम्।
विचित्रवसनोपेतां सर्वलक्षणलक्षिताम्॥
विलासिनीसहस्त्रौघैः सेव्यमानामहर्निशम्॥
देवासुरैरपि सदा वन्द्यमानपदाम्बुजाम्।
अणिमादिगुणोपेतां अष्टैश्वर्यप्रदायिनीम्॥
अस्मिन् सरोवरे मध्यकुम्भे दाक्षायणीं आवाहयामि॥
प्रागादि दिक्षु -ब्राह्मयै नमः-ब्राह्मीं आवाहयामि॥
माहेश्वर्यै नमः -माहेश्वरीं आवाहयामि॥
कौमार्यै नमः-कौमारीं आवाहयामि॥
वैष्णव्यै नमः-वैष्णवीं आवाहयामि॥
वाराह्यै नमः-वाराहीं आवाहयामि॥
इन्द्राण्यै नमः-इन्द्राणीं आवाहयामि॥
चामुण्डायै नमः-चामुण्डां आवाहयामि॥
महालक्ष्म्यै नमः-महालक्ष्मीं आवाहयामि॥
त्रिकोणे पूर्वादि दिक्षु-महादेव्यै नमः-महादेवीं आवाहयामि॥
महाकाल्यै नमः-महाकालीं आवाहयामि॥शाङ्कर्यै नमः- शाङ्करीं
आवाहयामि॥पूर्वभागे-ब्रह्मणे नमः- ब्रह्माणं आवाहयामि॥
सावित्र्यै नमः- सावित्रीं आवाहयामि॥दक्षिणभागे-शङ्कराय नमः-
शङ्करं आवाहयामि॥उमायै नमः- उमां आवाहयामि॥
पश्चिमभागे- नारायणाय नमः-नारायणं आवाहयामि॥
लक्ष्म्यै नमः- लक्ष्मीं आवाहयामि॥उत्तरभागे-
इन्द्राय नमः- इन्द्रं आवाहयामि॥शच्यै नमः- शचीं
आवाहयामि॥
पूर्वाद्यष्टदिक्षु-
कपालभैरवाय नमः-कपालभैरवं आवाहयामि॥

भीषणभैरवाय नमः-भीषणभैरवं आवाहयामि ॥
रुरुभैरवाय नमः-रुरुभैरवं आवाहयामि ॥
चण्डभैरवाय नमः-चण्डभैरवं आवाहयामि ॥
क्रोधभैरवाय नमः-क्रोधभैरवं आवाहयामि ॥
उन्मत्तभैरवाय नमः-उन्मत्तभैरवं आवाहयामि ॥
असिताङ्गभैरवाय नमः-असिताङ्गभैरवं आवाहयामि ॥
संहारभैरवाय नमः-संहारभैरवं आवाहयामि ॥
पूर्वाद्यष्टदिक्षु-
कुमुदाय दिग्गजाय नमः-कुमुदं दिग्गजं आवाहयामि ॥
कुमुदाक्षाय दिग्गजाय नमः-कुमुदाक्षं दिग्गजं आवाहयामि ॥
पुण्डरीकाय दिग्गजाय नमः-पुण्डरीकं दिग्गजं आवाहयामि ॥
वामनाय दिग्गजाय नमः-वामनं दिग्गजं आवाहयामि ॥
पुष्पदन्ताय दिग्गजाय नमः-पुष्पदन्तं दिग्गजं आवाहयामि ॥
सार्वभौमाय दिग्गजाय नमः-सार्वभौमं दिग्गजं आवाहयामि ॥
सुप्रतीकाय दिग्गजाय नमः-सुप्रतीकं दिग्गजं आवाहयामि ॥
अञ्जनाय दिग्गजाय नमः-अञ्जनं दिग्गजं आवाहयामि ॥
पूर्वाद्यष्टदिक्षु-
इन्द्रँ वो विश्वतस्परि हवॉमहे जनेभ्यः। अस्माकॅमस्तु केवॅलः-
इन्द्रं लोकपालकं आवाहयामि ॥

अग्निन्दूतं वॄणीमहे होतॉरं विश्ववॅदसम्। अस्य यज्ञस्यॅ सुक्रतुम्-अग्निं
लोकपालकं आवाहयामि ॥

यमाय सोमꣳ सुनुत यमायॅ जुहुता हविः। यमꣳहॅ यज्ञो
गॅच्छत्वग्निदूॅतो अरॅंकृतः-यमं लोकपालकं आवाहयामि ॥

यत्तॅं देवी निरृॅतिराबबन्ध दामॅग्रीवास्वॅविचर्त्यम्। इदन्ते

तद्विष्याम्यायुँषो न मध्यादथाँ जीवः पितुमँद्धि प्रमुँक्तः-निर्ऋतिं लोकपालकं आवाहयामि ॥

इमम्मेँ वरुणश्श्रुधी हवँमद्या चँ मृडय ।त्वामँव स्युराचँके -वरुणं लोकपालकं आवाहयामि ॥

तवँ वायवृतस्पते त्वष्टँर्जामातरद्भुत । अवांस्यावृँणीमहे-वायुं लोकपालकं आवाहयामि ॥

सोमौ धेनुꣳ सोमो अर्वँन्तमाशुम्। सोमौ वीरङ्कँर्मण्यँन्ददातु । सादन्यँ विदथ्यꣳसभेयम्। पितुःश्रवँणं यो ददाँशदस्मै-सोमं लोकपालकं आवाहयामि ॥

तमीशानञ्जँगतस्तस्थुषस्पतिं धियञ्जिन्वमवँसे हूमहे वयम्। पूषा नो यथा वेदँसामसँद् वृधे रँक्षिता पायुरदँब्धस्वस्तये- ईशानं लोकपालकं आवाहयामि ॥

मित्रावरुँणौ श्रोणीभ्यामिन्द्राग्नी शिँखण्डाभ्यामिन्द्राबृहस्पतीँ ऊरुभ्या मिन्द्राविष्णूँ अष्ठीवद्भ्याꣳ सवितारं पुच्छेँन गन्धर्वाञ्छेपेँनाप्सरसौँ मुष्काभ्यां पवँमानं पायुनाँ पवित्रं पोत्राभ्यामा ऽऽक्रमँणꣳस्थूराभ्यां प्रतिक्रमँणं कुष्ठाभ्याम्-गन्धर्वाप्सरसः आवाहयामि ॥

अग्नेँ पावकरोचिषाँ मन्द्रयाँ देव जिह्वया । आदेवान् वँक्षि यक्षिँ च- पावकं देव्यभिमुखं आवाहयामि ॥

पुष्पाद्यलंकृतां क्षुरिकां कुम्भसमीपे निधाय-

क्षुरिके त्वं महादेवि सर्वदेवाऽभिपूजिते।
अतस्त्वां पूजयिष्यामि सर्वसम्पत्प्रदा भव-क्षुरिका देवीं आवाहयामि॥
नैर्ऋत्यां आढकैः वायव्यां लवणेन च प्राक्पादौ हस्तिनौ रचयित्वा-

आतूनँ इन्द्र क्षुमन्तं चित्रं ग्राभं संगृँभाय। महा हस्ती दक्षिणेन- हस्ति

द्वयाय नमः -हस्तिद्वयं आवाहयामि॥

त्रिꣳशत्त्रयँश्च गणिनौ रुजन्तो दिवꣳरुद्राः पृथिवीञ्च सचन्ते।
एकादशासौ अप्सुषदँस्सुतꣳ सोमँऋषन्ताꣳ सवँनाय विश्वे-
अस्मिन्त्सरोवरे त्रयस्त्रिꣳशत्कोटि देवताः आवाहयामि॥
आवाहितास्सर्वा देवताः आसनादि षोडशोपचारैस्संपूजयेत्॥
सुवासिन्यः पिष्टमयान् विंशति दीपान् प्रज्वलयन्ति॥
एका वयोवृद्धा सुवासिनी हरिद्राजलपूरितां उदचनां गृहीत्वा तिष्ठति॥
तस्याः पृष्ठतः द्वे सुवासिन्यौ पञ्चपञ्च दीपान् एकैकस्मिन् पात्रे गृहीत्वा तिष्ठेताम्॥ तयोः पृष्ठतः वधूवरौ तिष्ठेताम्॥ तयोः पृष्ठतःद्वे सुवासिन्यौ पञ्च पञ्च दीपान् एकैकस्मिन् पात्रे गृहीत्वा तिष्ठेताम्॥ वयोवृद्धा सुवासिनी उदचनास्थतीर्थम् निनयन्ती सरोवरं प्रदक्षिणीकुर्वती गच्छति। तां सर्वे अनुगम्य सरोवरं प्रदक्षिणीकुर्वन्ति-
वरः मन्त्रं पठति-

इन्द्रॉय राज्ञे सूकरो वरुँणाय राज्ञे कृष्णौ यमाय राज्ञ ऋश्यँ ऋषभाय
राज्ञे गवयश्शार्दूलाय राज्ञे गौरः पुँरुषराजायँ मर्कटः क्षिप्रश्येनस्य
वर्तिका नीलँङ्गोः कृमिस्सोमँस्य राज्ञः कुलुङ्गस्सिन्धोश्शिꣳशुमारौ
हिमवँतो हस्ती॥ अग्निर्देवता वातौ देवता सूर्यौ देवताँ चन्द्रमाँ देवता
वसँवो देवताँ रुद्रा देवताँऽऽदित्या देवता विश्वे देवा देवताँ मरुतौ

देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवताँ मूर्धासि राड् ध्रुवासिँ धरुणाँ यन्त्र्यँसि यमित्रीषेत्वोर्जेत्वाँ कृष्यै त्वा क्षेमाँयत्वा यन्त्री राड् ध्रुवासि धरँणी धत्र्यँसि धरित्र्यायुँषेत्वा वर्चँसेत्वौजँसेत्वा बलाँयत्वा ॥

त्रसस्त्रिंशद्वै देवास्सोमपास्त्रयस्त्रिंशदसोमपाः अष्टौ वसव एकादश रुद्रा द्वादशादित्याः प्रजापतिश्च वषट्कारश्चैते देवास्सोमपाः एकादशप्रयाजाः एकादशोपयाजाः एकादशानैयाजाः एते असोमपाः पशुभाजनाः सोमेन सोमपान्प्रीणाति पशुनाऽसोमपाः उभय्योहाऽस्यैता देवताः प्रीता अभीष्टा भवन्ति य एवं वेद-इति त्रिः प्रदक्षिणं कृत्वा चतुर्दिक्षु दीपमालाभिरलंकुर्यात् ॥पूर्वादि दिक्षु सुवासिन्यः वधूवरौ च बलिं दद्युः ॥तत्र मन्त्राः-
एष वै सोमराजा यो यजति प्राची तिष्ठत्यादधति प्राची दिग्भागे इन्द्रो देवता । इन्द्रप्रसादात् राज्याभिवर्धनमश्नुते ।तेन प्राचीन्दिशञ्जयति ॥ तन्दक्षिणा परिवहन्ति । दक्षिणदिग्भागे धर्मराजो देवता । धर्मराजप्रसादात् आयुष्याभिवर्धनमश्नुते । तेन दक्षिणान्दिशञ्जयति ॥ तं प्रत्यञ्चमावर्तयन्ति । प्रतीची दिग्भागे वरुणो देवता । वरुणप्रसादात् पुत्रपौत्राऽभिवर्धनमश्नुते । तेन प्रतीचीन्दिशञ्जयति ॥ तमुदीचस्तिष्ठत उपावहरन्ति । उदीची दिग्भागे कुबेरो देवता । कुबेरप्रसादात् धनधान्याऽभिवर्धनमश्नुते । तेनोदीचीन्दिशञ्जयति ॥ सर्वादिग्भागे ब्राह्मणो देवता । ब्राह्मणप्रसादात् सकलसाम्राज्याऽभिवर्धनमश्नुते । तेन सर्वान्दिशञ्जयति । सोमेन राज्ञा सर्वा दिशो जयति ।तासामेषा पराभवति ।तस्यैषा पराभवति । तस्योत्तरा भूयसे शुभवचनाय ॥ श्रीवर्चस्वमायुष्यमारोग्यमाविधाच्छोभमानम्महीयसे । धान्यन्धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥

ज्येष्ठासनम्-वध्वाः ज्येष्ठसोदरीं तद्भर्तारञ्च आसने उपवेश्य वधूपिता गन्ध पुष्पालङ्कारवस्त्रदानादिभिः उपचरेत्॥
वधूवरयोः नीलमणिश्रीमाङ्गल्य पट्टवस्त्रादिकं आशीःपूर्वकं दद्यात्॥
गन्धाद्युपचारान् कुर्यात्॥नीलमणिधारण सङ्कल्पः॥नीलमणिपूजा॥
ग्रहप्रीतिं कृत्वा -
नीललोहिते भॅवतः कृत्यासक्तिर्व्यॅज्यते। एॅन्तेऽस्या ज्ञातयः पतिॅब न्धेषॅु बध्यते-इति नीलमणिधारणम्॥
बृहत्सामॅक्षत्रभृद्वृद्धवॅृष्णियं त्रिष्टुभौजॅश्शुभितमुग्रवीॅरम्। इन्द्रस्तोमॅेन पञ्चदशेन मध्यॅमिदं वातॅेन सगॅरेण रक्ष- इति रक्षां कुर्यात्॥
वरबन्धुभ्यः कन्या समर्पणम्-
अष्टवर्षा भवेत्कन्या पुत्रवत्पालिता मया। इदानीं तव दास्यामि दत्तां स्नेहेन पालय॥ तवपुत्राय इत्यादि ऊह्येन॥
हस्तिप्रदक्षिणम्-आतूॅन इन्द्र क्षुमन्तं चित्रं ग्राभं संगॅृभाय। महा हस्ती दक्षिॅणेन॥
गजविक्रयः॥ दम्पतीभ्यः परस्पर नामप्रश्नपूर्वकं ताम्बूलदानम्॥
स्यालकात् स्वीकृत्य ताम्बूलचर्वणम्॥अडप्पकट्टणम् आशीः॥
बृहत्कलशस्थ मुक्ताप्रवाळान्वेषणम्॥शिशुलालनम्॥ वरवध्वोः मातरौ डोलायां शिशुं चालयतः॥ सम्बन्धिनोः वस्त्राद्युपचाराः॥
मातुलादि बन्धवः वरवध्वोः स्वर्णाद्याशीः प्रदानम्॥ उपनयनवत् वसन्तमाधव पूजा॥देवेन्द्राणि नमस्तुभ्यं देवेन्द्रप्रियभामिनि। विवाहं भाग्यमारोग्यं पुत्रपौत्रांश्च देहि मे-इति वसन्तमाधवतीर्थेन वधूवरयोः मार्जनम्॥ वधूः यावज्जीवं तत्तत्कालव्रतादिकं कर्तुम् वरानुज्ञां प्रार्थयति॥
वधूः मङ्गळद्रव्य सहितवैणवपात्राणि स्वमात्रादि सुवासिनीभ्यो दद्यात्॥
इष्टकुलदेवता कङ्कण मण्डप स्तम्भ पञ्चपालिका पुनःपूजा॥
कङ्कणं मोचयाम्यद्य रक्षान्तु न कदाचन।
मयिरक्षां स्थिरां बध्वा देव त्वं गच्छ कङ्कण-वधूवरौ परस्परं रक्षाबन्धन

तन्तुं विसर्जयेताम्॥ अक्षताशीर्वचनम्॥ ब्राह्मणेभ्यो भूरिदक्षिणादानम्॥ नान्दी उद्वासनम्- वधूवरौ समातापितरौ बन्धुभिस्सह पालिकानामुपरि नूतनशूर्पं संगृह्य तिष्ठन्ति। उपाध्यायः वसन्तमाधवतीर्थं नूतनशूर्पे मन्त्रेण प्रच्याव्य अधस्ताडयेत्- यान्तु देवगणास्सर्वे पूजामादाय मत्कृताम्। इष्टकाम्यार्थसिध्यर्थम् पुनरागमनाय च॥ नान्दीशोभनदेवतुलारा मा इण्टिकि शुभागमनमन्दु वेडलि पूजन ग्रहिञ्चि कापाडदगिनदि॥

स्त्रियः बन्धुभिः वधूवराभ्यां सह वाद्यघोषपुरस्सरं नदीं गत्वा पञ्चपालिकास्थविरूढधान्यानि विसृजेयुः॥ कतिचन विरूढधान्यसहितपञ्चपालिकाः गृहमानीय गृहमध्ये संस्थाप्य यत्स्त्रिय आहुस्तत्कुर्वन्ति॥ हारती॥

प्रथमार्तवशान्तिप्रयोगः

पवित्रं धृत्वा दर्भेष्वासीनः दर्भान्धारयमाणःपत्न्या सह-
शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये॥
ओंभूः - भूर्भुवस्सुवरों ममोपात्त समस्तदुरित क्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं अद्यपूर्वोक्त एवङ्गुणविशेषण विशिष्टायां अस्यां --शुभतिथौ --नक्षत्रे --राशौ जातायाः--नाम्न्याः अस्याः मम धर्मपत्न्याः प्रथमरजसः प्रादुर्भावकाले दर्शनकाले च दुष्टमासादिसूचित सकलाऽरिष्टनिरसनार्थम् आयुर्वर्चो यशो बलाभिवृध्यर्थम् एभि र्ब्राह्मणैस्सह अन्योन्य साहाय्येन बोधायनोक्तप्रकारेण प्रथमार्तवशान्तिकर्म करिष्ये। अस्य कर्मणः आरम्भमुहूर्तस्य सुमूहूर्तता सिध्यर्थम् आरम्भमुहूर्त लग्नापेक्षया आदित्यादीनां नवानां ग्रहाणां आनुकूल्यसिध्यर्थम् यत्किञ्चित् हिरण्यदानञ्च करिष्ये॥ प्रथमार्तवशान्तिकर्माङ्गं करिष्यमाण

गर्भाधानकर्माङ्गञ्च हिरण्यरूपेण आभ्युदयिकञ्च करिष्ये ॥
नान्दीशोभनदेवता उद्दिश्य नान्दीशोभनदेवता प्रीत्यर्थम् नान्द्या ऽऽह्वानाख्यं कर्म च करिष्ये ॥ अत्र देवता अनुमोदनार्थम् इडावाचनाख्यं कर्म च करिष्ये ॥ इति सङ्कल्प्य नान्दीवाचनादि कर्मणः पुण्याहवाचनान्तं कृत्वा- कुम्भप्रतिष्ठापनविधिना कुम्भं प्रतिष्ठाप्य वरुणमावाह्य प्रतिमायां पुरुषसूक्तविधानेन पुरुषं पुण्डरीकाक्षं आवाह्य पूजयेत् ॥ अस्मिन् प्रथमार्तवशान्तिकर्मणि जपहोमार्थम् ऋत्विजो वो वृणे ॥ सर्वे कुम्भमन्वारभ्य जपेयुः- वेदादीन् ।नारायणगायत्रीं १०८ वारम् । आपो हिष्ठेति तिस्रः । हिरण्यवर्णा इत्यनुवाकम् । पवमान इत्यनुवाकम् । वरुणसूक्तम् । विष्णु रुद्र ब्रह्म दुर्गा श्री पुरुषसूक्तानि । पञ्चशान्तिः । ऋचाम्प्राचीत्यनुवाकम् । नमो ब्रह्मणे ॥ देवताः उद्वास्य पत्नीमभिषिच्य पञ्चगव्यप्राशनं कारयेत् ॥ लौकिकाग्निं प्रतिष्ठाप्य मुखान्तं कृत्वा-
ऋत्विग्भिस्सह विष्णुसूक्तेन पलाशसमिधः १०८ शताहुतीः- ब्रह्मसूक्तेन अन्नं १०८ शताहुतीः- रुद्रसूक्तेन आज्यं १०८ शताहुतीः- ऋतुनक्षत्रवाक्यैः समिदन्नाज्यैः प्रत्येकं २८ संख्यया हुत्वा- यजमानः त्र्यम्बकमन्त्रेण तिलैः १०८ शतवारं हुत्वा- यो ब्रह्मा ब्रह्मण इत्यादिभिः अष्टभिर्मन्त्रैः आज्याहुतीः सकृत् हुत्वा - जयादि उपस्थानान्तं कुर्यात् ॥ पत्नी भर्तारं ईक्षेत्- ऐन्द्रं प्रभो मह्यं दातुमर्हसि ॥ अनेनैव मन्त्रेण आदित्यं ईक्षयेत् ॥ ऋत्वग्भ्यो दक्षिणां दद्यात् ॥

गर्भाधानम्

रात्रौ सुमुहूर्ते फलदानं कुर्यात् ॥ आवयोः उचितकाले आयुष्मत्सुरूप सुगुण बहुसुपुत्रावाप्त्यर्थम् लक्ष्मीनारायण उमामहेश्वरप्रीत्यर्थम् फलदानं ताम्बूलदानञ्च करिष्ये ॥
फलं मनोरथफलं प्रददाति सदा नृणाम् ।

पुत्रपौत्राऽभिवृध्यर्थं अतश्शान्तिं प्रयच्छ मे ॥
यथा फलेषु सर्वेषु वसन्ति रसकोटयः ।
तथा मम फलाऽवाप्तिः भूयात्तु फलदानतः ॥
ताम्बूलं श्रीकरं भद्रं ब्रह्मविष्णु शिवात्मकम् ।
तस्मादस्य प्रदानेन ब्रह्माद्याः प्रीतिमाप्नुयुः ॥
आवयोः उचितकाले आयुष्मत्सुरूप सुगुण बहु सुपुत्रावाप्त्यर्थम् लक्ष्मीनारायण उमामहेश्वरप्रीत्यर्थम् फलानि सदक्षिणाकानि सताम्बूलानि लक्ष्मीनारायण उमामहेश्वरस्वरूपेभ्यो नानागोत्रेभ्यो ब्राह्मणेभ्यस्तेभ्यस्तेभ्यस्सम्प्रददे नमः न मम ॥
दम्पती क्षीरान्नभोजनं कुर्यात् ॥ द्विराचम्य- शयनागारं प्रविश्य- शयनीये उपविश्य- इष्टकुलदेवता प्रार्थनापूर्वकं विघ्नेश्वरं संस्थाप्य पूजयित्वा- ऋतुसमावेशनमन्त्रजपं करिष्ये- इति सङ्कल्प्य- ग्रहप्रीतिकर हिरण्यदानं कृत्वा-ऽशेषं समावेशने जपेत्-

आरौँह- ऊरुं- उपॅबर्हस्व- बाहुं- परिँष्वजस्व- जायां- सुमनस्यमॉनः । तस्यां पुष्यतं- मिथुनौ- सयौनी- बह्वीं- प्रजां- जनयॅन्तौ- सरेँतसा ॥ आर्द्रया- अरॅण्या- यत्रामॅन्थत्- पुरुँषं- पुरुँषेण- शक्रः । तदेतौ- मिथुनौ- सयौंनी- प्रजया- अमृतेँन- इहगॅच्छतम् ॥ अहं- गर्भम्- अदॅधाम्- ओषॅधीषु- अहं- विश्वेँषु- भुवॅनेषु- अन्तः । अहं- प्रजाः- अजनयं- पितृणां- अहं- जनिँभ्यः- अपरीषुँ- पुत्रान् ॥ पुत्रिणेमा- कुमारिणा- विश्वमायुँः- व्यॅश्नुतम् । उभा- हिरॅण्यपेशसा- वीतिहोत्रा- कृतद्वँसू । दशास्यन्त्वा- अमृतॉय- कश्शमूधँः- रोमशश्हॅथः- देवेषुँ- कृणुतोदुवँः ॥

रजसःप्रादुर्भावात् स्नातामृतुसमावेशने उत्तराभिरभिमन्त्रयेत-

विष्णुः- योनिं- कल्पयतु- त्वष्टा- रूपाणिं- पिꣳशतु। आसिञ्चतु-

प्रजापतिः- धाता- गर्भम्- दधातु ते॥ गर्भन्धेहि- सिनीवालि- गर्भन्धेहि-

सरस्वति। गर्भन्ते- अश्विनौ- देवौ- आधत्तां- पुष्करस्रजा॥ हिरण्ययी-

अरणी- यन्निर्मन्थतः- अश्विना। तन्तेगर्भम्- हवामहे- दशमे- मासि-

सूतवे॥ यथेयं- पृथिवीमही- तिष्ठन्ती- गर्भमादधे। एवन्त्वं- गर्भ

माधत्स्व- दशमे- मासि-सूतवे॥ यथा पृथिवी- अग्निगर्भा- द्यौर्यथा-

इन्द्रेण- गर्भिणी। वायुर्यथा- दिशाङ्गर्भैः- एवङ्गर्भम्- दधामि ते॥

विष्णोः- श्रेष्ठेन- रूपेण- अस्यां- नार्याम्- गवीन्याम्। पुमाꣳसं-

गर्भमाधेहि- दशमे- मासि-सूतवे॥ नेजमेष- परापत- सुपुत्रः- पुनरापत।

अस्यै मे- पुत्रकामायै- गर्भमाधेहि- यः पुमान्॥ व्यस्य योनिम्- प्रति-

रेतो गृहाण- पुमान्पुत्रः- धीयतां- गर्भो अन्तः। तम्माता- दशमासः-

बिभर्तु- स जायतां- वीरतमः- स्वानाम्॥ आते गर्भः- योनिमेतु- पुमान्-

बाण इव- इषुधिम्। आवीरः- जायतां- पुत्रस्ते- दशमास्यः॥

करोमि ते- प्राजापत्यं- आगर्भः- योनिमेतु ते। अनूनः- पूर्णः-

जायतां- अश्लोणः- अपिशाचधीतः॥ पुमाꣳस्ते- पुत्रोनारि-

तंपुमान्- अनुजायताम्। तानि भद्राणि- बीजानि- ऋषभाः- जनयन्तु नौ॥

यानि भद्राणि- बीजानि- ऋषभाः- जनयन्ति नः। तैस्त्वं- पुत्रान्-

विन्दस्व- सा प्रसूः- धेनुका भॅव ॥ कामप्रमॅृध्यतां- मह्यं- अपॅराजितं- एव मे । यङ्कामं- कामयॅे देव- तम्मॅे वायो- समॅर्धय ॥

निवीती भूत्वा स्त्रियं गच्छेत् ॥

सपत्नी बाधनकर्म

सपत्नीबाधनञ्च । एतेनैव कामेनोत्तरेणानुवाकेन सदाऽऽदित्यमुपतिष्ठते-

उदसौ सूर्यॊ अगादुदयम्मॉमको भगॅः । अहन्तद्विद्वलापॅतिमभ्यॅसाक्षि विषासहिः ॥ अहङ्केतुरहम्मूर्धाहमुग्रा विवाचॅनी । ममेदनु क्रतुम्पतिस्सेहानायॉ उवाचॅरेत् ॥ ममॅ पुत्राश्शॅत्रुहणोऽथॊ मे दुहिता विराट् । उताहमॅस्मि सञ्जॅया पत्युॅर्मे श्लोकॅ उत्तमः ॥ येनेन्द्रॊ हविषॉ कृत्यॅभवद्दिव्युॅत्तमः । अहन्तदॅक्रि देवा असपत्ना किलॉभवम् ॥ असपत्ना सॅपत्निघ्नी जयॅन्त्यभिभूवॅरी । आविॅष्टिस सर्वॉसाꣳ राधो वर्चॊ अस्थॅेयसामिव ॥ समॅजैषमिमा अहꣳ सपत्नीरभिभूवॅरीः । यथाहमॅस्य वीरस्यॅ विराजॉमि धनॅस्य च ॥

अन्वारम्भणीयास्थालीपाकप्रयोगः

विवाहसमनन्तरं उदगयनीय पौर्णमास्यां औपासनाग्निं सन्धाय-प्रातरौपासनं हुत्वा- आचम्य - पवित्रं धृत्वा-इष्टदेवताभ्यो नमः । कुलदेवताभ्यो नमः । सर्वेभ्यो ब्राह्मणेभ्यो नमः ।सुमुखश्च इत्यादि गणपतिपूजनं ग्रहप्रीतिकर हिरण्यदानञ्च कृत्वा -दर्शपूर्णमासस्थालीपाकाऽऽरम्भकर्माङ्गं नान्दीं कर्मणः पुण्याहवाचनञ्च कृत्वा-दर्भेष्वासीनः दर्भान्धारयमाणः पत्न्या सह-

शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
ओंभूः - भूर्भुवस्सुवरों ममोपात्त समस्तदुरित क्षयद्वारा
श्रीपरमेश्वरप्रीत्यर्थं यज्ञेश्वरप्रीत्यर्थं अद्यपूर्वोक्त एवङ्गुणविशेषण
विशिष्टायां अस्यां --शुभतिथौ दर्शपूर्णमासस्थालीपाकौ
आरप्स्यमाणःअन्वारम्भणीयेन स्थालीपाकेन यक्ष्ये । तेन परमेश्वरं
प्रीणयानि ॥ द्विः ॥तिस्रस्तिस्रो रेखा लिखित्वा-अद्भिरवोक्ष्य-
शकलमाग्नेय्यान्निरस्य-अपउपस्पृश्य- भूर्भुवस्सुवरोम्-इत्यौपासनाग्निं प्रतिष्ठाप्य
पत्नयवहन्ति ॥चरुं श्रपयित्वा अभिघार्य प्रतिष्ठितमभिघार्य चत्वारि शृङ्गात्रयाँ
अस्येत्यादि मुखान्ते- स्रुच्युपस्तीर्य यथागोत्रं द्विस्त्रिर्वावदायाभिघार्य
हविःप्रत्यभिघार्य स्रुङ् मुखमानीय-अग्नाविष्णुभ्याꣳस्वाहा-
अग्नाविष्णुभ्यामिदन्न मम ॥पुनरवदाय- सरस्वत्यै स्वाहा-
सरस्वत्या इदन्न मम ॥पुनरवदाय- सरस्वते स्वाहा- सरस्वत
इदन्न मम ॥ पुनरवदाय- अग्नये भगिने स्वाहा- अग्नये भगिन
इदन्न मम ॥उत्तरार्धात्सकृत्स्विष्टकृतेवदाय -द्विः पञ्चावत्तिनः ॥अग्नये
स्विष्टकृते स्वाहा-अग्नये स्विष्टकृत इदन्न मम ॥ अनूयाजसमिधमग्नौ
प्रहरति-इत्यादि जयादि ब्रह्मोद्वसनान्तं कृत्वा-सारस्वतहोमौ जुहोति-
दर्भेष्वासीनः दर्भान्धारयमाणः पत्नया सह-
दर्शपूर्णमासस्थालीपाकौ आलभमानः सारस्वतौ होमौ
होष्यामि ॥द्विः ॥औपासनाग्निं परिस्तीर्य परिषिच्य- लौकिकाज्येन जुहोति-
पूर्णमास्यै स्वाहा-पूर्णमास्या इदन्न मम ॥ अमावास्यायै स्वाहा-
अमावास्याया इदन्न मम ॥पुनःपरिषिच्य- अग्न्युपस्थानं कुर्यात् ॥ परेद्युः
पूर्णमासस्थालीपाकं कुर्यात् ॥ आगामिनि
शुक्लप्रतिपदि दर्शस्थालीपाकञ्च अवश्यं कर्तव्यम् ॥
दर्शपूर्णमासस्थालीपाकप्रयोगः अस्मदीय स्मार्तप्रयोगप्रथमभागे
मुद्रितःअस्ति ॥
यदि पुच्छपूर्णिमास्यात् तर्हि तदानीमेव पूर्णमासस्थालीपाकं कुर्यात् ॥

पुच्छपूर्णिमास्थालीपाके प्रतिपत्समागमनानन्तरं उपस्थाय स्थालीपाकं समापयेत्। नो चेत् पुनः स्थालीपाकः कर्तव्यो भविष्यति ॥

पुत्रकामस्थालीपाकप्रयोगः

औपासनाग्निं सन्धाय-प्रातरौपासनं हुत्वा-आचम्य - पवित्रं धृत्वा- इष्टदेवताभ्यो नमः । कुलदेवताभ्यो नमः । सर्वेभ्यो ब्राह्मणेभ्यो नमः ।सुमुखश्च इत्यादि गणपतिपूजनं ग्रहप्रीतिकर हिरण्यदानञ्च कृत्वा - दर्भेष्वासीनः दर्भान्धारयमाणः पत्न्या सह- शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
ओंभूः - भूर्भुवस्सुवरों ममोपात्त समस्तदुरित क्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं यज्ञेश्वरप्रीत्यर्थं अद्यपूर्वोक्त एवङ्गुणविशेषण विशिष्टायां अस्यां --शुभतिथौ--गोत्रोद्भवस्य--नक्षत्रे --राशौ जातस्य--शमृणः मम --नक्षत्रे --राशौ जातायाः--नाम्न्याः अस्याः मम धर्मपत्न्याश्चआवयोः शीघ्रमेव जीवत्सुपुत्रऽवाप्त्यर्थं येऽमुत्र पुरोडाशास्त इह चरवः यथादेवतं याज्यापुरोऽनुवाक्याः योऽमुत्र वषट्कारस्स इह स्वाहाकारः इति बोधायनोक्तप्रकारेण

अग्नयें पुत्रवॅते पुरोडाशॅमष्टाकॅपालन्निर्वॅपेदिन्द्रॉय पुत्रिणें पुरोडाशमेकॉ दशकपालं प्रजाकॉमोऽग्निरेवास्मै प्रजां प्रॅजनयॅति वृद्धामिन्द्रः प्रयॅच्छति इति वाक्यविहितां इष्टिं स्थालीपाकरूपेण यक्ष्ये। तेन सत्पुत्रं

लभेयम् ॥द्विः ॥तिस्रस्तिस्रो रेखा लिखित्वा-अद्भिरवोक्ष्य- शकलमाग्नेय्यान्निरस्य-अपउपस्पृश्य- भूर्भुवस्सुवरोम्-इत्यौपासनाग्निं प्रतिष्ठाप्य पत्न्यवहन्ति ॥चरुं श्रपयित्वा अभिघार्य प्रतिष्ठितमभिघार्य चत्वारि शृङ्गात्रयों अस्येत्यादि मुखान्ते- स्रुच्युपस्तीर्य यथागोत्रं द्विस्त्रिर्वावदायाभिघार्य हविःप्रत्यभिघार्य स्रुङ् मुखमानीय-

पुच्छपूर्णिमास्थालीपाके प्रतिपत्समागमनानन्तरं उपस्थाय स्थालीपाकं समापयेत्। नो चेत् पुनः स्थालीपाकः कर्तव्यो भविष्यति ॥

यस्त्वाॅ हृदा कीरिणामन्यॅ मानोमॅर्त्यममर्त्योजोहॅवीमि ।जातॅवेदो यशाॅ अस्मासुॅ धेहि प्रजाभिॅरग्ने अमृत त्वमॅश्याꣳस्वाहा- अग्नये पुत्रवत इदन्न मम ॥ यस्मै त्वꣳ सुकृतॅ जातवेद उ लोकमॅग्ने कृणवॅस्योनम्।अश्विनꣳसपुत्रिणॅ वीरवॅन्तं गोमॅन्तꣳ रयिन्नॅशते स्वस्ति स्वाहा- अग्नये पुत्रवत इदन्न मम ॥त्वे सुपुॅत्रशवसोऽवृॅत्रन्कामॅकातयः। नत्वामिन्द्रार्तिरिॅच्यतेस्वाहा- इन्द्रायपुत्रिण इदन्न मम ॥

उक्थ उॅक्थे सोम इन्द्रॅम्ममाद नीथे नीॅथे मघवॉनꣳसुतासॅः। यदीꣳसबाधॅः पितरन्नपुत्रास्समॅमानदॅक्षा अवॅसे हवॅन्ते स्वाहा- इन्द्रायपुत्रिण इदन्न मम ॥

अनूयाजसमिधमग्नौ प्रहरति-स्वाहा-अग्नय इदन्न मम ॥
इध्मसन्नहनरज्जुमग्नौ प्रहरति-स्वाहा-रुद्राय तन्तिचराय इदन्न मम ॥
एतत्कर्मसमृद्ध्यर्थं ऋद्धिकामः जयादिहोमङ्करिष्ये इत्यादि उपस्थानान्तम् ॥
कर्मसाद्गुण्यार्थं यथाशक्ति दक्षिणां दद्यात्॥ एवं बहु पर्वसु कृते सफलो भवति ॥
यदि पुच्छपूर्णिमास्यात् तर्हि पूर्णमासस्थालीपाकं अनुष्ठाय अनन्तरं काम्यं स्थालीपाकं अनुतिष्ठेत्॥

गर्भस्त्रावदोषहर काञ्चनयज्ञोपवीतदानप्रयोगः

शुभे दिने गर्भिणी स्त्री सकृत्तीर्थप्राशनरूपं आचमनं कृत्वा-
इष्टदेवताभ्यो नमः । कुलदेवताभ्यो नमः । सर्वेभ्यो ब्राह्मणेभ्यो नमः ।
सुमुखश्च इत्यादि गणपतिपूजनं कृत्वा
शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

ममोपात्त समस्तदुरित क्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं अद्यपूर्वोक्त एवङ्गुणविशेषण विशिष्टायां अस्यां --शुभतिथौ --नक्षत्रे --राशौ जातायाः--नाम्न्याः मम गर्भस्रावनिदान सकलदोषपरिहारार्थम् वायुपुराणोक्तं स्वर्णयज्ञोपवीतदानविधिङ्करिष्ये ॥ ग्रहप्रीतिकर हिरण्यदानं कृत्वा -ग्रन्थिदेशे मौक्तिकयुतं हैमं ग्रन्थिदेशे वज्रमणियुतं राजतञ्चेति यज्ञोपवीतद्वयं सम्पाद्य उभयं पञ्चगव्येन प्रक्षाळ्य ताम्रपात्रे दधि निक्षिप्य तन्मध्ये आज्यन्निक्षिप्य आज्योपरि प्रजापतिदेवतात्मकं यज्ञोपवीतद्वयं संस्थाप्य भर्ता गायत्र्या गन्धादिभिः पूजयेत् ॥ आचार्यमुखेन लौकिकाग्निं प्रतिष्ठाप्य मुखान्ते आज्यमधुमिश्रैस्तिलैः अष्टोत्तरशतं गायत्र्या व्याहृतीभिर्वा होमं कुर्यात् ॥ उद्देशत्यागं भर्ता कुर्यात् ॥ जयादि उपस्थानान्ते होमकर्तारं आचार्य वस्त्राद्यैस्सम्पूज्य प्राङ्मुखाय तस्मै उदङ्मुखा स्त्री पात्रादिसहितं यज्ञोपवीतद्वयं दद्यात्-

उपवीतं परिमितं ब्रह्मणा विधृतम्पुरा ।
भव नौकास्य दानेन गर्भं सन्धारयेह्यहम् ॥

--नक्षत्रे --राशौ जातायाः--नाम्न्याः मम गर्भस्रावनिदान दोष परिहारार्थम् ताम्रपात्रस्थदध्याज्य संस्थं सुपूजितं सोत्तरीयकं इदं स्वर्णयज्ञोपवीतं --गोत्राय--शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे नमः न मम ॥ ब्राह्मणं प्रदक्षिणीकृत्य नमस्कुर्यात् ॥अन्येभ्यो ब्राह्मणेभ्यश्च कर्मसमृध्यर्थं यथाशक्तिदक्षिणां दद्यात् ॥

पुंसुवनप्रयोगः

औपासनाग्निं सन्धाय-प्रातरौपासनं हुत्वा-
पुंसुवनं व्यक्ते गर्भे तिष्येण ॥आचम्य - पवित्रं धृत्वा-
इष्टदेवताभ्यो नमः । कुलदेवताभ्यो नमः । सर्वेभ्यो ब्राह्मणेभ्यो नमः । सुमुखश्च इत्यादि गणपतिपूजनं स्वस्तिपुण्याहवाचनं ग्रहप्रीतिकर हिरण्यदानं नान्दी कर्मणः पुण्याहवाचनं पत्न्याः रक्षाबन्धनञ्च कारयित्वा-दर्भेष्वासीनः

दर्भान्धारयमाणः पत्न्या सह-
शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
ओंभूः - भूर्भुवस्सुवरों ममोपात्त समस्तदुरित क्षयद्वारा
श्रीपरमेश्वरप्रीत्यर्थं अद्यपूर्वोक्त एवङ्गुणविशेषण विशिष्टायां अस्यां
--शुभतिथौ --नक्षत्रे --राशौ जातायाः--नाम्न्याः अस्याः मम
धर्मपत्न्याः गर्भस्य पुंस्त्वप्रतिपादनार्थम् बीजगर्भसमुद्भव
एनोनिबर्हण द्वारा क्षेत्रसंस्कारसिध्यर्थम् --नक्षत्रे --राशौ जातां--
नाम्नीं एनां मम धर्मपत्नीं अन्तर्वत्नीं पुंसुवनकर्मणा
संस्करिष्यामि ॥
मुख्यकालातिपत्तौ कृच्छ्रप्रत्याम्नायत्वेन हिरण्यदानं कुर्यात् ॥
न्यग्रोधस्य या प्राच्युदीची वा शाखा ततस्सवृषणां शुङ्गामाहृत्य
अग्नेरुपसमाधानादि ॥
तिस्रस्तिस्रो रेखा लिखित्वा-इत्यादि आज्यभागान्ते-अन्वारब्धायां उत्तरा
आहुतीर्जुहोति-

धाता दॅदातु नो रयिमीशॉनो जगॅतस्पतिः । सनॅः पूर्णेनॅ वावनत्स्वाहा-
धात्र इदन्न मम ॥धाता प्रजायॉ उत राय ईंशे धातेदं विश्वं भुवॅन
ञजान ।धाता पुत्रं यजॅमानाय दाता तस्मॉ उ हव्यं घृतवॅद्विधेम
स्वाहा- धात्र इदन्न मम ॥ धाता दॅदातु नो रयिंप्राचीञ्जीवातु
मक्षिताम् । वयन्देवस्यॅ धीमहि सुमतिꣳसत्यरॉधसस्स्वाहा-धात्र इदन्न
मम ॥धाता दॅदातु दाशुषे वसूॅनि प्रजाकॉमाय मीढुषॅ दुरोणे । तस्मैं देवा
अमृता स्संव्यॅयन्तां विश्वेंदेवासो अदितिस्सजोषास्स्वाहा-धात्र इदन्न

मम ॥ यस्त्वॉ हृदा कीरिणामन्यॅ मानोमॅर्त्यममत्यो
जोहॅवीमि ।जातॅवेदो

यशॉ अस्मासुॅ धेहि प्रजाभिॅरग्ने अमृत त्वमॅश्याꣳस्वाहा-

अग्नये पुत्रवत इदन्न मम ॥ यस्मै त्वꣳ सुकृतॅ जातवेद उ लोकमॅग्ने
कृणवॅस्योनम् ।अश्विनꣳसपुत्रिणॅ वीरवॅन्तं गोमॅन्तꣳ रयिन्नॅशते स्वस्ति
स्वाहा- अग्नये पुत्रवत इदन्न मम ॥त्वे सुपुॅत्रशवसोऽवृॅत्र
न्कामॅकातयः ।

नत्वामिन्द्रार्तिरिॅच्यतेस्वाहा- इन्द्रायपुत्रिण इदन्न मम ॥

उक्थ उॅक्थे सोम इन्द्रॅम्ममाद नीथे नीॅथे मघवॉनꣳसुतासॅः । यदीꣳसबाधॅः
पितरन्नपुत्रास्सॅमानदॅक्षा अवॅसे हवॅन्ते स्वाहा- इन्द्रायपुत्रिण इदन्न मम ॥
अनूयाजसमिधमग्नौ प्रहरति-स्वाहा-अग्नय इदन्न मम ॥
इध्मसन्नहनरज्जुमग्नौ प्रहरति-स्वाहा-रुद्राय तन्तिचराय इदन्न मम ॥

एतत्कर्मसमृद्ध्यर्थं ऋद्धिकामः जयादिहोमङ्करिष्ये इत्यादि
ब्रह्मोद्वासनान्ते-अनवस्नातया कुमार्या दृषत्पुत्रे दृषत्पुत्रेण पेषयित्वा परिप्लाव्य
अपरेणाऽग्निं

प्राचीमुत्तानान्निपात्य उत्तरेण यजुषा अङ्गुष्ठेन दक्षिणे नासिकाच्छिद्रे ऽपिनयति-

पुꣳसुवनॅमसि ॥पुमाꣳसञ्जनयति ॥ आशीर्वचनम् ॥उपस्थानम् ॥

सीमन्तोन्नयनप्रयोगः

औपासनाग्निं सन्धाय-प्रातरौपासनं हुत्वा-सीमन्तोन्नयनं प्रथमे गर्भे
चतुर्थे मासि । आचम्य - पवित्रं धृत्वा-इष्टदेवताभ्यो नमः ।
कुलदेवताभ्यो नमः । सर्वेभ्यो ब्राह्मणेभ्यो नमः ।सुमुखश्च

इत्यादि गणपति पूजनम्। ब्राह्मणान्भोजयित्वाऽऽशिषो
वाचयित्वास्वस्तिपुण्याहवाचनं ग्रहप्रीतिकर हिरण्यदानं नान्दी कर्मणः
पुण्याहवाचनं पत्न्याः रक्षाबन्धनञ्च कारयित्वा-दर्भेष्वासीनः दर्भान्धारयमाणः
पत्न्या सह-

शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

ओंभूः - भूर्भुवस्सुवरों ममोपात्त समस्तदुरित क्षयद्वारा
श्रीपरमेश्वरप्रीत्यर्थं अद्यपूर्वोक्त एवङ्गुणविशेषण विशिष्टायां अस्यां
--शुभतिथौ --नक्षत्रे --राशौ जातायाः--नाम्न्याः अस्याः मम
धर्मपत्न्याःगर्भस्य बैजिक गार्भिक दोषपरिहारार्थम्
क्षेत्रसंस्कारसिध्यर्थम् --नक्षत्रे --राशौ जातां--नाम्नीं एनां मम
धर्मपत्नीं अन्तर्वत्नीं सीमन्तोन्नयनकर्मणा संस्करिष्यामि ॥
मुख्यकालातिपत्तौ कृच्छ्रप्रत्याम्नायत्वेन हिरण्यदानं कुर्यात्॥
अग्नेरुपसमाधानादि ॥तिस्रस्तिस्रो रेखा लिखित्वा-इत्यादि आज्यभागान्ते-
अन्वारब्धायां उत्तरा आहुतीर्जुहोति-धाता ददातु नो- इत्यादि पुꣳसुवनवत्
अष्टावाहुतीर्हुत्वा-अनूयाजसमिधमग्नौ प्रहरति-स्वाहा-अग्नय इदन्न मम ॥
इध्मसन्नहनरज्जुमग्नौ प्रहरति-स्वाहा-रुद्राय तन्तिचराय इदन्न मम ॥
जयादि प्रतिपद्यते परिषेचनान्तं कृत्वा- ब्रह्मोद्वासनान्ते- अपरेणाग्निं
प्राचीमुपवेश्य त्रेण्या शलल्या त्रिभिर्दर्भपुञ्जीलैश्शलालुग्लप्सेनेति ऊर्ध्वं
सीमन्तमुन्नयति व्याहृतीभिरुत्तराभ्याञ्च-

भूर्भुवस्सुवौ राकामहꣳसुहवाꣳ सुष्टुती हुवे शृणोतुनस्सुभगा बोधतु
त्मना। सीव्यत्वपꣳस्सूच्याऽच्छिद्यमानया ददातु वीरꣳ शतदायमुक्थ्यम्।
यास्ते राके सुमतयꣳस्सुपेशसो याभिर्ददासि दाशुषे वसूनि।
ताभिर्नो अद्य सुमना उपागहि सहस्रपोषꣳ सुभगे
ररणा ॥गायतम्-

इति वीणागाथिनौ संशास्ति- उत्तरयोः पूर्वा साल्वानां ब्राह्मणानामितरा। नदी निर्देशश्च यस्यां वसन्ति-

सोमॅ एवनो राजेत्याॅहुब्राह्मणीः प्रजाः। विवॅृत्तचक्रा आसींनास्तीरॅण कावेरि तवॅ ॥

यवान्विरूढानाबध्य वाचंयच्छत्याऽऽनक्षत्रेभ्यः। उदितेषु नक्षत्रेषु प्राचीमुदीचीं वा दिशमुपनिष्क्रम्य वत्समन्वारभ्य व्याहृतीश्च जपित्वा वाचं विसृजेत्॥ आशीर्वचनम्॥उपस्थानम्॥

नवग्रहमखप्रयोगः

आचम्य - पवित्रं धृत्वा-

इष्टदेवताभ्यो नमः। कुलदेवताभ्यो नमः। सर्वेभ्यो ब्राह्मणेभ्यो नमः। सुमुखश्च इत्यादि गणपतिपूजनं कृत्वा दर्भेष्वासीनः दर्भान्धारयमाणः पत्न्या सह-

शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

ओंभूः - भूर्भुवस्सुवरों ममोपात्त समस्तदुरित क्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं शुभेशोभने --शुभतिथौ अस्माकं सहकुटुम्बानां क्षेमस्थैर्य धैर्यवर्यिविजय आयुरारोग्य ऐश्वर्याणां अभिवृध्यर्थम् धर्मार्थ काममोक्ष चतुर्विध फलपुरुषार्थसिध्यर्थम् इष्टकाम्यार्थसिध्यर्थम् समस्तदारितोपशान्त्यर्थम् समस्तसन्मङ्गळावाप्त्यर्थम् इष्टदेवताकुलदेवताप्रसादसिध्यर्थम् --गोत्रोद्भवस्य--नक्षत्रे -- राशौ जातस्य --शर्मणः मम जातकवशात् जन्मलग्नवशात् चन्द्रलग्नवशात्
होरादि षष्ट्यंशपर्यन्त अंशलग्नवशाच्च ये ये ग्रहाः अरिष्टस्थानेषु स्थिताः शुभस्थानेषु स्थिताश्च तेषां ग्रहाणां आनुकूल्यसिध्यर्थम् वर्तमान महादशा अन्तर्दशा अन्तरान्तर्दशा वशाच्च

सम्भावितसकलविधाऽरिष्टनिवृत्यर्थम् आध्यात्मिक आधिदैविक आदिभौतिक नवनवजनित सकलविध उपद्रवनिवृत्यर्थम् प्रवृत्तेषु कार्येषु सम्भावित सकलविघ्ननिवृत्तिद्वारा विजयप्राप्तयर्थम् अष्टैश्वर्यसमृध्यर्थम् धर्माऽविरोधेन
चिन्तितसकलमनोरथाऽवाप्तयर्थम् आयुष्याभिवृध्यर्थम् अपमृत्युदोषपरिहारार्थम् मनःप्रशान्तिसिध्यर्थम् एभिर्ब्राह्मणैस्सह अन्योन्यसाहाय्येन आचार्यमुखेन ऋत्विङ्मुखेन च नवग्रहमखाख्य कर्मकरिष्ये ॥ अस्य कर्मणः आरम्भमुहूर्तलग्नापेक्षया आदित्यादीनां नवानां ग्रहाणां आनुकूल्यसिध्यर्थम् यत्किञ्चित् हिरण्यदानञ्च करिष्ये ॥ महागणपतिं यथास्थानं कृत्वा -ग्रहप्रीतिकर हिरण्यदानं कृत्वा- आचार्यवरणं ऋत्विग्वरणञ्च कुर्यात् ॥

आचार्यः आचम्य पवित्रं धृत्वा- यजमानसङ्कल्पानुसारं अन्योन्यसाहाय्येन नवग्रहमखाख्य कर्मकरिष्ये ॥

ब्रह्मॅ जज्ञानम्प्रॅथमम्पुरस्ताद्विसींमतस्सुरुचॅो वेन ऑवः ।
सबुध्नियॉ उपमा ऑस्य विष्ठास्सतश्च योनिमसॅतश्च विवॅः ॥
नाकॅे सुपर्णमुपयत्पतॅन्तꣳ हृदा वेनॅन्तो अभ्यचॅक्षतत्वा ।
हिरॅण्यपक्षं वरुॅणस्य दूतं यमस्य योनौ शकुनम्भुॅरण्युम् ॥
आप्यॉयस्व समेॅतु ते विश्वतॅस्सोम वृष्णियॅम् । भवा वाजॅस्य सङ्गथे
यो रुद्रो अग्नौ यो अप्सु य ओषॅधीषु यो रुद्रो विश्वा भुवॅनाऽऽविवेश
तस्मैॅ रुद्राय नमॅो अस्तु ॥

इदंविष्णुर्विचॅक्रमे त्रेधा निदॅधे पदम् । समूॅढमस्य पाꣳसुरे ॥

इन्द्रं विश्वॉ अवीवृधन्त्समुद्रव्यॅचसङ्गिरॅः । रथीतॅमꣳ रथीनां वाजॉनाꣳ

सत्पॅतिं पतिम्॥कूर्चाग्रैराक्षसान् घोरान् छिन्धि कर्मविघातिनः।
त्वामर्पयामि कुम्भेस्मिन् साफल्यं कुरुकर्मणि॥
वृक्षराजसमुद्भूताश्शाखायाः पल्लवत्वचः। युष्मान्कुम्भेत्वर्पयामि
सर्वदोषापनुत्तये॥ नाळिकेर समुद्भूत त्रिनेत्र हरसम्मित। शिखया
दुरितं सर्व पापं पीडाञ्च मे नुद॥ सर्वे समुद्रास्सरितस्तीर्थानि नदा
ह्रदाः। आयान्तु देवपूजार्थम् दुरितक्षयकारकाः॥ गङ्गे च यमुने चैव
गोदावरि सरस्वति। नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु॥
इमम्मॅ वरुणश्शुधी हवॅमद्या चॅ मृडय।त्वामॅव स्युराचॅके॥ तत्वॉयामि
ब्रह्मॅणा वन्दॅमानस्तदाशास्ते यजॅमानो हविर्भिः।अहॅडमानो वरुणेह
बोध्युरुॅशꣳस मान आयुः प्रमॉषीः॥
भूर्भुवस्सुवरोम् अस्मिन्कुम्भे सकलतीर्थाधिपतिं वरुणं ध्यायामि।वरुणं
आवाहयामि। वरुणस्य इदमासनम्॥
आसत्येन रजॅसा वर्तॅमानोनिवेशयॅन्नमृतं मर्त्यॅञ्च।हिरण्ययॅनसविता रथेना
देवोयॉति भुवॅनाविपश्यन्॥ अग्निन्दूतं वॄणीमहे होतॉरं वि
श्ववॅदसम्। अस्य यज्ञस्यॅ सुक्रतुम्॥कद्रुद्राय प्रचॅतसे मीढुष्टॅमाय
तव्यॅसे। वोचेम
शन्तॅमꣳहृदे- आदित्यं रक्तवर्णं रक्तमाल्याम्बरधरं रक्तगन्धानुलेपनं
रक्ताश्वं रक्तच्छत्रध्वजरथपताकादि शोभितं दिव्यरथमारूढं मेरुं
प्रदक्षिणीकुर्वाणं साङ्गं सायुधं सवाहनं सशक्तिपत्नीपुत्रपरिवारसमेतं
कलिङ्गदेशजं काश्यपगोत्रं त्रिष्टुप्छन्दसं अधिदेवता
प्रत्यधिदेवतासहितं मध्ये गोधूमधान्यस्योपरि विद्यमानायां
प्रतिमायां आदित्यग्रहं ध्यायामि।आदित्यग्रहं आवाहयामि।

आदित्यग्रहस्य इदमासनम्॥

आप्यॉयस्व समेंतु ते विश्वतॅस्सोम वृष्णियम्। भवा वाजॅस्य सङ्गथे-
अप्सु मे सोमौ अब्रवीदन्तर्विश्वॉनि भेषजा।
अग्निञ्च विश्वशॅम्भुवमापॅश्च विश्वभेंषजीः॥
गौरीमिमाय सलिलानि तक्षत्येकॅपदी द्विपदी सा चतुॅष्पदी।
अष्टापॅदी नवॅपदी बभूवुषीं सहस्त्राक्षरा परमे व्यौमन्॥

सोमं श्वेतवर्णं श्वेतमाल्याम्बरधरं श्वेतगन्धानुलेपनं श्वेताश्वं श्वेतच्छत्र ध्वजरथपताकादि शोभितं दिव्यरथमारूढं मेरुं प्रदक्षिणीकुर्वाणं साङ्गं सायुधं सवाहनं सशक्तिपत्नीपुत्रपरिवारसमेतं वनायुदेशजं अत्रिगोत्रं अनुष्टुपूछन्दसं अधिदेवता प्रत्यधिदेवतासहितं आदित्यग्रहस्य आग्नेय दिग्भागे तण्डुलधान्यस्योपरि विद्यमानायां प्रतिमायां सोमग्रहं ध्यायामि। सोमग्रहं आवाहयामि। सोमग्रहस्य इदमासनम्॥

अग्निर्मूर्धा दिवः ककुत्पतिंः पृथिव्या अयम्।
अपाꣳ रेताꣳसि जिन्वति॥ स्योना पृॅथिवि भवॉनृक्षरा निवेशॅनी।
यच्छॉनश्शर्मं सप्रथाः॥ क्षेत्रॅस्य पतिंना वयꣳ हितेनेंव जयामसिं।
गामश्वॅं पोषयित्न्वासॅनो मृडातीदृशे॥

अङ्गारकं रक्तवर्णं रक्तमाल्याम्बरधरं रक्तगन्धानुलेपनं रक्ताश्वं रक्तच्छत्र ध्वजरथपताकादि शोभितं दिव्यरथमारूढं मेरुं प्रदक्षिणीकुर्वाणं साङ्गं सायुधं सवाहनं सशक्तिपत्नीपुत्रपरिवारसमेतं अवन्तिदेशजं वसिष्ठगोत्रं जगतीछन्दसं अधिदेवता प्रत्यधिदेवतासहितं आदित्यग्रहस्य दक्षिण दिग्भागे आढकधान्यस्योपरि विद्यमानायां प्रतिमायां अङ्गारकग्रहं

ध्यायामि ।अङ्गारकग्रहं आवाहयामि । अङ्गारकग्रहस्य इदमासनम् ॥

उद्बुँध्यस्वाग्ने प्रतिं जागृह्येनमिष्टापूर्ते सꣳसृँजेथामयञ्च । पुनँः कृण्वꣳस्त्वाँ पितरं युवाँनमन्वाताꣳसीत्त्वयि तन्तुँमेतम् ॥ इदंविष्णुर्विचँक्रमे त्रेधा निदँधे पदम् । समूँढमस्य पाꣳसुरे ॥ विष्णौ रराटँमसि विष्णोः पृष्ठमँसि विष्णोश्श्नप्त्रेस्थो विष्णोस्यूँरसि विष्णोर्ध्रुवमँसि वैष्णवमँसि विष्णँवे त्वा ॥

बुधं पीतवर्णं पीतमाल्याम्बरधरं पीतगन्धानुलेपनं पीताश्वं पीतच्छत्र ध्वजरथपताकादि शोभितं दिव्यरथमारूढं मेरुं प्रदक्षिणीकुर्वाणं साङ्गं सायुधं सवाहनं सशक्तिपत्नीपुत्रपरिवारसमेतं मगधदेशजं भारद्वाजगोत्रं बृहतीछन्दसं अधिदेवता प्रत्यधिदेवतासहितं आदित्यग्रहस्य ईशान दिग्भागे मुद्गधान्यस्योपरि विद्यमानायां प्रतिमायां भगवन्तं बुधग्रहं ध्यायामि । बुधग्रहं आवाहयामि । बुधग्रहस्य इदमासनम् ॥

बृहँस्पते अतियदर्यो अर्ह्याद्युमद्विभाति क्रतुँमज्जनेँषु । यद्दीदयच्छवँसर्त प्रजात तदस्मासु द्रविँणन्धेहि चित्रम् ॥ इन्द्रँमरुत्व इह पाँहि सोमं यथाँ शायाँते अपिँबस्सुतस्यँ । तव प्रणीँती तवँशूर शर्मन्नाविँवासन्ति कवयँस्सुयज्ञाः ॥ ब्रह्मँजज्ञानम्प्रँथमं पुरस्ताद्विसीँमतस्सुरुचौ वेन आँवः । स बुध्नियाँ उपमा अँस्य विष्ठास्सतश्च योनिमसँतश्च विवँः ॥

बृहस्पतिं कनकवर्णं कनकमाल्याम्बरधरं कनकगन्धानुलेपनं कनकाश्वं कनकच्छत्रध्वजरथपताकादि शोभितं दिव्यरथमारूढं मेरुं प्रदक्षिणी कुर्वाणं साङ्गं सायुधं सवाहनं सशक्तिपत्नीपुत्रपरिवारसमेतं सिन्धुदेशजं आङ्गिरसगोत्रं अनुष्टुप्छन्दसं अधिदेवता प्रत्यधिदेवतासहितं आदित्य ग्रहस्य उत्तरदिग्भागे

चणकधान्यस्योपरि विद्यमानायां प्रतिमायां भगवन्तं बृहस्पतिग्रहं ध्यायामि ।बृहस्पतिग्रहं आवाहयामि । बृहस्पतिग्रहस्य इदमासनम् ॥

शुक्रन्तें अन्यद्यॅजतन्तें अन्यद्विषुॅरूपे अहॅनी द्यौरिॅवासि । विश्वा हि माया अवॅसि स्वधावो भद्रातें पूषन्निह रातिरॅस्तु ॥ इन्द्राणीमासु नारिॅषु सुपत्नीॅमहमॅश्रवम् । नह्यॅस्या अपरञ्चन जरसा मरॅते पतिॅः ॥ इन्द्रॅं वो विश्वतस्परि हवॉमहे जनेभ्यः । अस्माकॅमस्तु केवॅलः- शुक्रं श्वेतवर्णं श्वेतमाल्याम्बरधरं श्वेतगन्धानुलेपनं श्वेताश्वं श्वेतच्छत्रध्वजरथपताकादि शोभितं दिव्यरथमारूढं मेरुं प्रदक्षिणीकुर्वाणं साङ्गं सायुधं सवाहनं सशक्तिपत्नीपुत्रपरिवारसमेतं कीकटदेशजं शौनकगोत्रं पङ्क्तिश्छन्दसं अधिदेवता प्रत्यधिदेवतासहितं आदित्यग्रहस्य पूर्वदिग्भागे बर्बरक धान्यस्योपरि विद्यमानायां प्रतिमायां शुक्रग्रहं ध्यायामि ।शुक्रग्रहं आवाहयामि । शुक्रग्रहस्य इदमासनम् ॥

शन्नॊ देवीरभिष्टॅय आपॊ भवन्तु पीतये । शंयोरभिस्त्रॅवन्तु नः ॥

प्रजॉपते नत्वदेतान्यन्यो विश्वॉ जातानि परिता बॅभूव ।

यत्कॉमास्ते जुहुमस्तन्नॊ अस्तु वयश्ँस्यॉम पतॅयो रयीणाम् ॥

इमं यॅम प्रस्तरमाहि सीदाङ्गिरोभिः पितृभिस्संविदानः । आत्वा मन्त्राः कविशस्ता वॅहन्त्वेना रॉजन् हविषॉ मादयस्व-शनैश्चरं कृष्णवर्णं कृष्णमाल्याम्बरधरं कृष्णगन्धानुलेपनं कृष्णाश्वं कृष्णच्छत्र ध्वजरथ पताकादि शोभितं दिव्यरथमारूढं मेरुं प्रदक्षिणी कुर्वाणं साङ्गं सायुधं सवाहनं सशक्तिपत्नीपुत्रपरिवारसमेतं सौराष्ट्रदेशजं काश्यपगोत्रं गायत्री छन्दसं अधिदेवता प्रत्यधिदेवतासहितं आदित्यग्रहस्य पश्चिमदिग्भागे तिलधान्यस्योपरि विद्यमानायां प्रतिमायां

शनैश्चरग्रहं ध्यायामि। शनैश्चरग्रहं आवाहयामि।
शनैश्चरग्रहस्य इदमासनम्॥

कयाँ नश्चित्र आभुँवदूती सदावृँधस्सखा। कया शचिँष्ठया वृता॥
आयङ्गौः पृश्निँरक्रमीदसँनन्मातरम्पुनँः। पितरँञ्च प्रयन्त्सुवँः॥ यत्तेँ देवी
निरृत्रँतिराबबन्ध दामँग्रीवास्वँविचर्त्यम्। इदन्ते तद्विष्याम्यायुँषो
नमध्यादथाँ जीवः पितुमँद्धि प्रमुँक्तः- राहुं धूम्रवर्णं
धूम्रमाल्याम्बरधरं धूम्रगन्धानुलेपनं धूम्राश्वं
धूम्रच्छत्रध्वजरथपताकादि शोभितं दिव्यरथ मारूढं मेरुं
अप्रदक्षिणीकुर्वाणं साङ्गं सायुधं सवाहनं सशक्तिपत्नी पुत्र
परिवारसमेतं पूर्वदेशजं पाटलिगोत्रं अनुष्टुप्छन्दसं अधिदेवता
प्रत्यधि देवतासहितं आदित्यग्रहस्य निरृत्रर्तिदिग्भागे
माषधान्यस्योपरि विद्यमानायां प्रतिमायां राहुग्रहं ध्यायामि।राहुग्रहं
आवाहयामि। राहुग्रहस्य इदमासनम्॥

केतुं कृण्वन्नँकेतवे पेशौ मर्या अपेशसे। समुषद्भिँरजायथाः॥
ब्रह्मा देवानाम्पदवीः कँवीनामृषिर्विप्राँणाम्महिषो मृगाणाम्।
श्येनो गृध्राँणाꣳस्वधितिर्वनाँनाꣳ सोमँः पवित्रमत्येँति रेभन्॥
स चित्र चित्रश्चितयन्तमस्मे चित्रँक्षत्र चित्रतँमं वयोधाम्।
चन्द्रं रयिम्पुँरुवीरं बृहन्तञ्चन्द्रँ चन्द्राभिँर्गृणते युँवस्व- केतुं चित्रवर्ण
चित्रमाल्याम्बरधरं चित्रगन्धानुलेपनं चित्राश्वं चित्रच्छत्रध्वजरथ
पताकादि शोभितं दिव्यरथमारूढं मेरुं अप्रदक्षिणीकुर्वाणं साङ्गं
सायुधं सवाहनं सशक्तिपत्नीपुत्रपरिवारसमेतं मध्यदेशजं जैमिनिगोत्रं
नाना छन्दसं अधिदेवता प्रत्यधिदेवतासहितं आदित्यग्रहस्य
वायव्यदिग्भागे कुळुत्थधान्यस्योपरि विद्यमानायां प्रतिमायां केतुग्रहं

ध्यायामि ।केतुग्रहं आवाहयामि । केतुग्रहस्य इदमासनम् ॥

जातवेंदसे सुनवाम सोमॅमरातीयतो निदॅहाति वेदॅः । सनॅः पर्षदतिं दुर्गाणि विश्वॉ नावेव सिन्धुॅन्दुरितात्यग्निः-भूर्भुवस्सुवरोम् -अस्यां प्रतिमायां दुर्गां ध्यायामि । दुर्गां आवाहयामि । दुर्गायाः इदमासनम् ॥

गणानान्त्वा गणपॅतिꣳ हवामहे कविङ्कॅवीनामुॅपमश्रॅवस्तमम् ज्येष्ठराजम्ब्रह्मॅणांब्रह्मणस्पत आनॅꣳशृण्वन्नूतिभिॅस्सीद सादॅनम् - भूर्भुवस्सुवरोम् -अस्यां प्रतिमायां गणपतिं ध्यायामि । गणपतिं आवाहयामि । गणपतेः इदमासनम् ॥

क्षेत्रॅस्य पतिॅना वयꣳ हितेनॅव जयामसि । गामश्वॅं पोषयित्न्वासॅनो मृडातीदृशे- भूर्भुवस्सुवरोम् -अस्यां प्रतिमायां क्षेत्रपालकं ध्यायामि । क्षेत्रपालकं अवाहयामि । क्षेत्रपालकस्य इदमासनम् ॥

यतॅ इन्द्र भयॉमहे ततॊ नो अभॅयं कृधि । मघॅवञ्छग्धि तव तन्नॅ ऊतये विद्विषो विमृधॊ जहि ॥ स्वस्तिदा विशस्पतिॅर्वृत्रहा विमृधॊ वशी । वृषेन्द्रॅः पुर एॅतुन स्स्वस्तिदा अॅभयङ्करः-भूर्भुवस्सुवरोम् -अस्यां प्रतिमायां इन्द्रं अभयङ्करं ध्यायामि । इन्द्रं अभयङ्करं आवाहयामि । इन्द्रस्य अभयङ्करस्य इदमासनम् ॥

वास्तोष्पते प्रतिॅ जानीह्यस्मान्त्स्वॉवेशो अॅनमीवो भॅवा नः । यत्वेमॅहे प्रति तन्नॊ जुषस्व शन्नॅ एधि द्विपदे शञ्चतुॅष्पदे- भूर्भुवस्सुवरोम् -अस्यां प्रतिमायां वास्तुपुरुषं ध्यायामि । वास्तुपुरुषं आवाहयामि । वास्तुपुरुषस्य इदमासनम् ॥

यथाऽपेक्षं नक्षत्रदेवतानां आवाहनम्॥

अग्निर्नः पातु कृत्तिकाः। नक्षत्रन्देवमिन्द्रियम्। इदमासां विचक्षणम्। हविराङ्गुहोतन। यस्य भान्तिं रश्मयो यस्यं केतवः। यस्येमा विश्वा भुवनानि सर्वा। स कृत्तिकाभिरभि संवसानः। अग्निर्नौ देवस्सुविते दधातु॥ भूर्भुवस्सुवरोम्-अस्यां प्रतिमायां कृत्तिका नक्षत्रदेवतां अग्निं कृत्तिकां ध्यायामि। अग्निं कृत्तिकां आवाहयामि।अग्नेः कृत्तिकायाः इदमासनम्॥

प्रजापते रोहिणी वेतु पत्नी। विश्वरूपा बृहती चित्रभानुः। सा नौ यज्ञस्य सुविते दधातु। यथा जीवेम शरदस्सवीराः। रोहिणी देव्युदगात्पुरस्तात्। विश्वा रूपाणि प्रतिमोदमाना। प्रजापतिः हविषा वर्धयन्ती। प्रिया देवानामुपयातु यज्ञम्॥ भूर्भुवस्सुवरोम्- अस्यां प्रतिमायांरोहिणी नक्षत्रदेवतां प्रजापतिं रोहिणीं ध्यायामि। प्रजापतिं रोहिणीं आवाहयामि।प्रजापते रोहिण्याःइदमासनम्॥

सोमो राजा मृगशीर्षेण आगन्। शिवन्नक्षत्रं प्रियमस्य धाम। आप्यायमानो बहुधा जनेषु। रेतः प्रजां यजमाने दधातु। यत्ते नक्षत्रं मृगशीर्षमस्ति। प्रियꣳराजन्प्रियतमं प्रियाणाम्। तस्मै ते सोम हविषा विधेम। शन्न एधि द्विपदे शञ्चतुष्पदे॥ भूर्भुवस्सुवरोम्- अस्यां प्रतिमायां मृगशिरो नक्षत्रदेवतां सोमं मृगशीर्षं ध्यायामि।सोमं मृगशीर्षं आवाहयामि।सोमस्य मृगशीर्षस्य इदमासनम्॥

आर्द्रयाँ रुद्रः प्रथँमान एति। श्रेष्ठो देवानाम्पतिँरघ्नियानाम्। नक्षँत्रमस्य हविषाँ विधेम। माँनः प्रजाꣳरीँरिषन्मोत वीरान्। हेती रुद्रस्य परिँणो वृणक्तु। आर्द्रा नक्षँत्रञ्जुषताꣳ हविर्नः। प्रमुञ्चमाँनौ दुरितानि विश्वा। अपाघशꣳसन्नुदतामराँतिम्॥ भूर्भुवस्सुवरोम् -अस्यां प्रतिमायां आर्द्रानक्षत्रदेवतां रुद्रमार्द्रां ध्यायामि। रुद्रमार्द्रां आवाहयामि। रुद्रस्यार्द्रायाः इदमासनम्॥

पुनँर्नो देव्यदितिस्पृणोतु। पुनँर्वसूनः पुनरेतां यज्ञम्। पुनँर्नो देवा अभि यँन्तु सर्वे। पुनँः पुनर्वो हविषाँ यजामः। एवा न देव्यदितिरनर्वा। विश्वँस्य भर्त्री जगँतः प्रतिष्ठा। पुनँर्वसू हविषाँ वर्धयँन्ती। प्रियन्देवाना मप्येँतु पाथँः॥ भूर्भुवस्सुवरोम् -अस्यां प्रतिमायां पुनर्वसू नक्षत्रदेवतां अदितिं पुनर्वसू ध्यायामि। अदितिं पुनर्वसू आवाहयामि। अदित्याः पुनर्वस्वोः इदमासनम्॥

बृहस्पतिः प्रथमञ्जायँमानः। तिष्यँन्नक्षँत्रमभिसम्बँभूव। श्रेष्ठो देवाना म्पृतँनासु जिष्णुः। दिशोऽनु सर्वा अभँयन्नो अस्तु। तिष्यँः पुरस्ताँदुत मँध्यतोनँः। बृहस्पतिर्नः परिँपातु पश्चात्। बाधँतान्द्वेषो अभँयं कृणुताम्। सुवीर्यँस्य पतँयस्याम॥ भूर्भुवस्सुवरोम् -अस्यां प्रतिमायां पुष्यनक्षत्रदेवतां बृहस्पतिं तिष्यं ध्यायामि। बृहस्पतिं तिष्यं आवाहयामि। बृहस्पतेः तिष्यस्य इदमासनम्॥

इदꣳ सर्पेभ्यो हविरँस्तु जुष्टम्। आश्रेषा येषाँमनुयन्ति चेतँः। ये अन्तरिक्षं

पृथिवीं क्षियन्तिँ। तेनँस्सर्पासो हवमागँमिष्ठाः। ये रौचने सूर्यस्यापिं सर्पाः।

ये दिवँन्देवीमनुँ सञ्चरँन्ति। येषाँमाश्रेषा अँनुयन्ति कामम्।

तेभ्यँस्सर्पेभ्यो मधुँमज्जुहोमि॥ भूर्भुवस्सुवरोम् -अस्यां प्रतिमायां आश्रेषानक्षत्रदेवतां सर्पानाश्रेषाः ध्यायामि। सर्पानाश्रेषाः आवाहयामि। सर्पाणां आश्रेषाणां इदमासनम्॥

उपँहूताः पितरो ये मघासुँ। मनौजवसस्सुकृतँस्सुकृत्याः। ते नो नक्षँत्रे हवमागँमिष्ठाः। स्वधाभिँर्यज्ञम्प्रयँतञ्जुषन्ताम्। ये अँग्निदग्धा येऽनँग्नि दग्धाः। येँऽमुं लोकम्पितरँः क्षियन्तिँ। याꣳश्चँ विद्म याꣳ उँ चन प्रँविद्म। मघासुँ यज्ञꣳ सुकृँतञ्जुषन्ताम्॥ भूर्भुवस्सुवरोम् -अस्यां प्रतिमायां मघानक्षत्रदेवतां पितॄन्मघाः ध्यायामि। पितॄन्मघाः आवाहयामि। पितॄणां मघानां इदमासनम्॥

गवाम्पतिः फल्गुँनीनामसित्वम्। तदँर्यमन्वरुण मित्र चारुँ। तन्त्वाँ वयꣳ सँनितारꣳ सनीनाम्। येनेमा विश्वा भुवँनानि सञ्जिँता। यस्यँ देवा अँनुसंयन्ति चेतँः। अर्यमा राजाऽजरस्तुविँष्मान्। फल्गुँनीनामृषभो रौरवीति॥ भूर्भुवस्सुवरोम् -अस्यां प्रतिमायां पूर्वफल्गुनी नक्षत्रदेवतां अर्यमणं फल्गुन्यौ ध्यायामि। अर्यमणं फल्गुन्यौ आवाहयामि। अर्यम्णः फल्गुन्योः इदमासनम्॥

श्रेष्ठौ देवानाम्भगवो भगासि। तत्वाँ विदुः फल्गुँनीस्तस्यँ वित्तात्। अस्मभ्यँ क्षत्रमजरꣳ सुवीर्यम्। गोमदश्वँवदुपसन्नुँदेह। भगौँह दाता

भगइत्प्रॅदाता। भगौ देवीः फल्गुॅनीरार्विवेश। भगस्येत्तम्प्रॅसवङ्गॅमेम। यत्रॅ देवैस्सॅधमादॅम्मदेम ॥भूर्भुवस्सुवरोम् -अस्यां प्रतिमायां उत्तरफल्गुनी नक्षत्रदेवतां भगं फल्गुन्यौ ध्यायामि। भगं फल्गुन्यौ आवाहयामि। भगस्य फल्गुन्योः इदमासनम्॥

आयॉतु देवस्सॅवितोपॅयातु। हिरण्ययेॅन सुवृता रथेॅन। वहन् हस्तॅ सुभगॅ विद्मनापॅसम्। प्रयच्छॅन्तम्पपुॅरिम्पुण्यमच्छॅ। हस्तः प्रयॅच्छत्व मृतं वसीॅयः। दक्षिॅणेन प्रतिॅगृभ्णीम एनत्। दातारॅमद्य सॅविता विॅदेय। यो नो हस्तॉय प्रसुवातिॅ यज्ञम्॥ भूर्भुवस्सुवरोम् -अस्यां प्रतिमायां हस्त नक्षत्रदेवतां सवितारं हस्तं ध्यायामि। सवितारं हस्तं आवाहयामि। सवितुः हस्तस्य इदमासनम्॥

त्वष्टा नक्षॅत्रमभ्यॅेति चित्राम्। सुभॅसॅसं युवतिॅ रोचॅमानाम्। निवे शयॅन्नमृतान्मर्त्याॅश्च। रूपाणिॅ पिॅशन्भुवॅनानि विश्वा। तन्नत्वष्टा तदुॅ चित्रा विचॅष्टाम्। तन्नक्षॅत्रम्भूरिदा अॅस्तु मह्यम्। तन्नॅः प्रजां वीर वॅतीॅ सनोतु। गोभिॅर्नो अश्वैस्समॅनक्तु यज्ञम्॥ भूर्भुवस्सुवरोम् -अस्यां प्रतिमायां चित्रानक्षत्रदेवतां त्वष्टारं चित्रां ध्यायामि। त्वष्टारं चित्रां आवाहयामि।त्वष्टुश्चित्रायाः इदमासनम्॥

वायुर्नक्षॅत्रमभ्यॅेति निष्ट्याम्। तिग्मशृॅङ्गो वृषभो रोरुॅवाणः। समीरय न्भुवॅना मातरिश्वा। अपद्वेषाॅसि नुदतामरॉतीः। तन्नौ वायुस्तदु निष्ट्यॉ शृणोतु। तन्नक्षॅत्रम्भूरिदा अॅस्तु मह्यम्। तन्नौ देवासो अनु

जानन्तु काममम्। यथा तरेम दुरितानि विश्वा ॥ भूर्भुवस्सुवरोम् -अस्यां प्रतिमायां स्वातीनक्षत्रदेवतां वायुन्निष्ट्यां ध्यायामि। वायुन्निष्ट्यां आवाहयामि ।वायोर्निष्ट्यायाः इदमासनम् ॥

दूरमस्मच्छत्रवो यन्तु भीताः। तदिन्द्राग्नी कृणुतान्तद्विशाखे। तन्नो देवा अनुमदन्तु यज्ञम्। पश्चात्पुरस्तादभयन्नो अस्तु। नक्षत्राणामधि पत्नी विशाखे। श्रेष्ठाविन्द्राग्नी भुवनस्य गोपौ। विषूचश्शत्रूनबाधमानौ। अपक्षुधन्नुदतामरातिम् ॥भूर्भुवस्सुवरोम् -अस्यां प्रतिमायां विशाखा नक्षत्रदेवतां इन्द्राग्नी विशाखे ध्यायामि। इन्द्राग्नी विशाखे आवाहयामि। इन्द्राग्न्योर्विशाखयोः इदमासनम् ॥

ऋध्यास्म हव्यैर्नमसोपसद्य। मित्रन्देवम्मित्रधेयन्नो अस्तु। अनूराधान् हविषा वर्धयन्तः। शतञ्जीवेम शरदस्सर्वीराः। चित्रन्नक्षत्रमुदगात्पुरस्तात्। अनूराधास इति यद्वदन्ति। तन्मित्र एति पथिभिर्देवयानैः। हिरण्ययैर्विततैरन्तरिक्षे ॥ भूर्भुवस्सुवरोम् -अस्यां प्रतिमायां अनूराधा नक्षत्रदेवतां मित्रमनूराधान् ध्यायामि। मित्रमनूराधान् आवाहयामि। मित्रायानूराधानां इदमासनम् ॥

इन्द्रो ज्येष्ठामनु नक्षत्र एति। यस्मिन्वृत्रं वृत्रतूर्ये ततार। तस्मिन्वय ममृतन्दुहाना:। क्षुधन्तरेम दुरितिन्दुरिष्टिम्। पुरन्दराय वृषभाय धृष्णवे। अषाढाय सहमानाय मीढुषे। इन्द्राय ज्येष्ठा मधुमद्दुहाना। उरुं कृणोतु यजमानाय लोकम् ॥ भूर्भुवस्सुवरोम् -अस्यां प्रतिमायां

ज्येष्ठानक्षत्रदेवतां इन्द्रं ज्येष्ठां ध्यायामि। इन्द्रं ज्येष्ठां आवाहयामि। इन्द्रस्य ज्येष्ठायाः इदमासनम्॥

मूलँम्प्रजां वीरवँतीं विदेय। पराच्येतु निरृँतिः पराचा। गोभिर्नक्षँत्र म्पशुभिस्समँक्तम्। अहँर्भूयाद्यजँमानाय मह्यम्। अहँर्नो अद्य सुँविते दँधातु। मूलन्नक्षँत्रमिति यद्वदँन्ति। परॉचीं वाचा निरृँतिन्नुदामि। शिवम्प्रजायैँ शिवमँस्तु मह्यम्॥ भूर्भुवस्सुवरोम् -अस्यां प्रतिमायां मूलनक्षत्रदेवतां प्रजापतिं मूलं ध्यायामि। प्रजापतिं मूलं आवाहयामि। प्रजापतेर्मूलस्य इदमासनम्॥

या दिव्या आपः पयँसा सम्बभूवुः। या अन्तरिँक्ष उत पार्थिँवीर्याः। हिरँण्यवर्णा यज्ञियाः। तान आपश्शꣳस्योना भँवन्तु। याश्च कूप्या याश्चँ नाद्यास्समुद्रियाः। याश्चँ वैशन्तीरुतप्रॉसचीर्याः। यासॉमषाढा मधुँ भक्षयँन्ति। तान आपश्शꣳस्योना भँवन्तु॥ भूर्भुवस्सुवरोम् - अस्यां प्रतिमायां पूर्वाषाढानक्षत्रदेवतां अपोषाढाः ध्यायामि। अपोषाढाः आवाहयामि।अपामषाढानां इदमासनम्॥

तन्नो विश्वे उपँशृण्वन्तु देवाः। तदँषाढा अभिसंयँन्तु यज्ञम्। तन्नक्षँत्र म्प्रथताम्पशुभ्यँः। कृषिर्वृष्टिर्यजँमानाय कल्पताम्। शुभ्राः कन्याँ युवतय स्सुपेशँसः। कर्मकृँत्स्सुकृतौ वीर्यावतीः। अषाढाः काममुपँयान्तु यज्ञम्॥ भूर्भुवस्सुवरोम् -अस्यां प्रतिमायां उत्तराषाढानक्षत्रदेवतां विश्वान्देवा नषाढाः ध्यायामि। विश्वान्देवानषाढाः आवाहयामि। विश्वेषान्देवानामषाढानां इदमासनम्॥

श्रृण्वन्तिँ श्रोणाममृतँस्य गोपाम्। पुण्यॉमस्या उपँश्रृणोमि वाचम्। महीन्देवीं विष्णुँपत्नीमजूर्याम्। प्रतीचींमेनाꣳ हविषाँ यजामः। त्रेधा विष्णुँरुरुगायो विचँक्रमे। महीन्दिवँम्पृथिवीमन्तरिँक्षम्। तच्छ्रोणैति श्रवँ इच्छमॉना। पुण्यꣳश्लोकं यजॅमानाय कृण्वती ॥भूर्भुवस्सुवरोम् - अस्यां प्रतिमायां श्रवणनक्षत्रदेवतां विष्णुं श्रोणां ध्यायामि। विष्णुं श्रोणां आवाहयामि।विष्णोश्श्रोणायाः इदमासनम्॥

अष्टौ देवा वसॅवस्सोम्यासँः। चतॅस्रो देवीरजरा श्रविँष्ठाः। ते यज्ञम्पान्तु रजॅसः परस्तात्। संवत्सरीणॅममृतंꣳस्वस्ति। यज्ञन्नॅः पान्तु वसॅवः पुरस्तात्। दक्षिणतौऽभियॅन्तु श्रविँष्ठाः। पुण्यन्नक्षॅत्रमभिसंविँशाम। मानो अरॉतिरघशꣳसागनँ्- भूर्भुवस्सुवरोम् -अस्यां प्रतिमायां श्रविष्ठानक्षत्रदेवतां वसून् श्रविष्ठाः ध्यायामि। वसून् श्रविष्ठाः आवाहयामि।वसूनां श्रविष्ठानां इदमासनम्॥

क्षत्रस्य राजा वरॅणोऽधिराजः। नक्षॅत्राणाꣳ शतभिँष्वसिँष्ठः। तौ देवेभ्यॅः कृणुतो दीर्घमायुँः।शतꣳसहस्रॉ भेषजानिँ धत्तः। यज्ञन्नो राजा वरॅण उपॅयातु। तन्नो नक्षॅत्रꣳ शतभिँषग्जुषाणम्। दीर्घमायुः प्रतिँरद्भेषजानिँ॥ भूर्भुवस्सुवरोम् -अस्यां प्रतिमायां शतभिषङ्नक्षत्रदेवतां वरुणं शत भिषजं भेषजान् ध्यायामि। वरुणं शतभिषजं भेषजान् आवाहयामि। वरुणस्य शतभिषजः भेषजानां इदमासनम्॥

अज एकॅपादुदॅगात्पुरस्तात्। विश्वॉभूतानिँ प्रतिमोदॅमानः। तस्यॅ देवाः

प्रॅसवं यॅन्ति सर्वे। प्रोष्ठपदासौ अमृतॅस्य गोपाः। विभ्राजॅमानस्समिधान उग्रः। आन्तरिक्षमरुहदगन्द्याम्। तꣳसूर्यॅन्देवमजमेकॅपादम्। प्रोष्ठपदासो अनुॅयन्ति सर्वे॥ भूर्भुवस्सुवरोम् -अस्यां प्रतिमायां पूर्वप्रोष्ठपदानक्षत्र देवतां अजमेकपदं प्रोष्ठपदान् ध्यायामि। अजमेकपदं प्रोष्ठपदान् आवाहयामि। अजस्यैकपदः प्रोष्ठपदानां इदमासनम्॥

अहिर्बुॅध्नियः प्रथॅमान एति। श्रेष्ठो देवानॉमुत मानुॅषाणाम्। तम्ब्राह्मणा स्सौमपास्सोम्यासॅः। प्रोष्ठपदासौ अभिरॅक्षन्ति सर्वे। चत्वार एकॅमभि कर्मं देवाः। प्रोष्ठपदास इति यान् वदॅन्ति। ते बुध्नियॅम्परिषद्यꣳस्तुवन्तॅः। अहिꣳ रक्षन्ति नमॅसोपसद्यॅ॥ भूर्भुवस्सुवरोम् -अस्यां प्रतिमायां उत्तरप्रोष्ठपदानक्षत्रदेवतां अहिं बुध्नियं प्रोष्ठपदान् ध्यायामि। अहिं बुध्नियं प्रोष्ठपदान् आवाहयामि। अहेर्बुध्नियस्य प्रोष्ठपदानां इदमासनम्॥

पूषा रेवत्यन्वेॅति पन्थाम्। पुष्टिपतीं पशुपा वाजॅबस्त्यौ। इमानिं हव्या प्रयॅता जुषाणा। सुगैनों यानैरुपॅयातां यज्ञम्। क्षुद्रान्पशून्रॅक्षतु रेवतीं नः। अन्नꣳ रक्षॅन्तौ बहुधा विरूॅपम्। वाजꣳ सनुतां यजॅमानाय यज्ञम्॥भूर्भुवस्सुवरोम् -अस्यां प्रतिमायां रेवतीनक्षत्रदेवतां पूषणं रेवतीं ध्यायामि। पूषणं रेवतीं आवाहयामि। पूष्णो रेवत्याः इदमासनम्॥

तदश्विनॉवश्वयुजोपॅयाताम्। शुभङ्गमिॅष्ठौ सुयमेॅभिरश्वैः।स्वन्नक्षॅत्रꣳ हविषा यजॅन्तौ। मध्वा सम्पृॅक्तौ यजुॅषा समॅक्तौ। यौ देवानां भिषजौ

हव्यवाहौ। विश्वॅस्य दूतावमृतॅस्य गोपौ। तौ नक्षॅत्रञ्जुजुषाणोपॅयाताम्। नमोऽश्विभ्यां कृणुमोऽश्वयुग्भ्याम्-भूर्भुवस्सुवरोम् -अस्यां प्रतिमायां अश्विनीनक्षत्रदेवतां अश्विनावश्वयुजौ ध्यायामि। अश्विनावश्वयुजौ आवाहयामि। अश्विनोरश्वयुजोः इदमासनम्॥

अपॅपाप्मानम्भरॅणीर्भरन्तु। तद्यमो राजा भगॅवान् विचॅष्टाम्। लोकस्य राजॉ महतो महान् हि। सुगन्नः पन्थामभॅयं कृणोतु। यस्मिन्नक्षॅत्रे यम एति राजा। यस्मिॅन्नेनमभ्यर्षिञ्चन्त देवाः। तदॅस्य चित्रꣳ हविषॉ यजाम। अपॅपाप्मानम्भरॅणीर्भरन्तु॥ भूर्भुवस्सुवरोम् -अस्यां प्रतिमायां अपभरणीनक्षत्रदेवतां यममपभरणीः ध्यायामि। यममपभरणीः आवाहयामि। यमस्याऽऽपभरणीनां इदमासनम्॥

ओं जूं सः त्र्यॅम्बकं यजामहे सुगन्धिंपुॅष्टिवर्धॅनम्।उर्वारुकमिॅव बन्धॅनान्मृत्यो मुॅक्षीय मामृतात् सः जूं ओम्-भूर्भुवस्सुवरोम् - अस्यां प्रतिमायां अमृतमृत्युञ्जयं ध्यायामि। अमृतमृत्युञ्जयं आवाहयामि। अमृतमृत्युञ्जयंस्य इदमासनम्॥

ब्रह्मॅ जज्ञानम्प्रॅथमम्पुरस्ताद्विसीॅमतस्सुरुचौ वेन ऑवः। सबुध्नियॉ उपमा ऑस्य विष्ठास्सतश्च योनिमसॅतश्च विवॅः- ब्रह्माणं ध्यायामि। ब्रह्माणं आवाहयामि। ब्रह्मणः इदमासनम्॥

प्रणौ देवी सरॅस्वती वाजेॅभिर्वाजिनीॅवती।धीनामॅवित्र्यॅवतु- महासरस्वतीं ध्यायामि। महासरस्वतीं आवाहयामि। महासरस्वत्याः इदमासनम्॥

इदंविष्णुर्विचॅक्रमे त्रेधा निदॅधे पदम्। समूॅढमस्य पाꣳसुरे-
महाविष्णुं ध्यायामि। महाविष्णुं आवाहयामि। महाविष्णोः इदमासनम्॥
सक्तुॅमिव तितॅउना पुनन्तो यत्र धीरा मनॅसा वाचमक्रॅत। अत्रा सखाय
स्सख्यानिं जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि- महालक्ष्मीं ध्यायामि।
महालक्ष्मीं आवाहयामि। महालक्ष्म्याः इदमासनम्॥
त्वमॅग्ने रुद्रो असुॅरो महो दिवस्त्वꣳ शर्धो मारुॅतं पृक्षईशिषे। त्वं वातैॅररुणै
र्यॉसि शङ्गयस्त्वं पूषा विधतः पॉसि नु त्मना- रुद्रं ध्यायामि। रुद्रं
आवाहयामि। रुद्रस्य इदमासनम्॥
गौरीमिॅमाय सलिलानि तक्षत्येकॅपदी द्विपदी सा चतुॅष्पदी। अष्टापॅदी
नवॅपदी बभूवुषीं सहस्राक्षरा परमे व्यौमन्-गौरीं ध्यायामि। गौरीं
आवाहयामि। गौर्याः इदमासनम्॥
धन्वॅना गा धन्वॅनाऽजिङ्गॅयेम धन्वॅना तीव्रास्समदो जयेम। धनुश्शत्रौ
रपकामं कृॅणोति धन्वॅना सर्वाः प्रदिशो जयेम- धन्वन्तरिं ध्यायामि।
धन्वन्तरिं आवाहयामि। धन्वन्तरेः इदमासनम्॥
सुपर्णोऽसि गरुत्मान्त्रिवृत्ते शिरो गायत्रञ्चक्षुस्तोमॅ आत्मा सामॅ ते तनू
र्वामदेव्यं बृॅहद्रथन्तरे पक्षौ यॅज्ञायज्ञियं पुच्छञ्छन्दाꣳस्यङ्गॅानि धिष्णिॅया
श्शफा यजूꣳषि नामॅ। सुपर्णोऽसि गरुत्मान्दिवॅङ्गच्छ सुवॅः पत-
महागरुडं ध्यायामि। महागरुडं आवाहयामि। महागरुडस्य इदमासनम्॥
नमो अस्तु सर्पेभ्यो ये के चॅ पृथिवीमनु॑। ये अन्तरिॅक्षे ये दिवि तेभ्यॅ

स्सर्पेभ्यो नमः ॥ येऽदो रोचने दिवो ये वा सूर्यस्य रश्मिषु। येषामप्सुषदः कृतन्तेभ्यस्सर्पेभ्यो नमः ॥ या इषवो यातुधानानां येवा वनस्पतीꣳ रनु। ये वाऽवटेषु शेरते तेभ्यस्सर्पेभ्यो नमः-सर्पान् ध्यायामि। सर्पान् आवाहयामि। सर्पाणां इदमासनम् ॥

तदश्विनावश्वयुजोपयाताम्। शुभङ्गमिष्ठौ सुयमेभिरश्वैः ।स्वन्नक्षत्रꣳ हविषा यजन्तौ। मध्वा सम्पृक्तौ यजुषा समक्तौ। यौ देवानां भिषजौ हव्यवाहौ। विश्वस्य दूतावमृतस्य गोपौ। तौ नक्षत्रञ्जुजुषाणोपयाताम्। नमोऽश्विभ्यां कृणुमोऽश्वयुग्भ्याम्- देवभिषजौ अश्विनौ ध्यायामि। देवभिषजौ अश्विनौ आवाहयामि ।देवभिषजोः अश्विनोः इदमासनम् ॥

दूरमस्मच्छत्रवो यन्तु भीताः। तदिन्द्राग्नी कृणुतान्तद्विशाखे। तन्नो देवा अनुमदन्तु यज्ञम्। पश्चात्पुरस्तादभयन्नो अस्तु। नक्षत्राणा मधिपत्नी विशाखे। श्रेष्ठाविन्द्राग्नी भुवनस्य गोपौ। विषूचश्शत्रूनप बाधमानौ। अपक्षुधन्नुदतामरातिम्- शत्रुबलारातिं ध्यायामि। शत्रुबलारातिं आवाहयामि ।शत्रुबलारातेः इदमासनम् ॥

मुञ्चामित्वा हविषा जीवनायकमज्ञातयक्ष्मादुतराजयक्ष्मात्। ग्राहिर्जग्राह यदिवैतदेनन्तस्या इन्द्राग्नी प्रमुमुक्तमेनम् ॥

यदिं क्षितायुर्यदिं वा परेतो यदिं मृत्योरन्तिकन्नीत एव। तमाहरामि निरृतेरुपस्थादस्पार्षमेनं शतशारदाय ॥

सहस्राक्षेण शतशारदेन शतायुषा हविषाहार्षमेनम्।

शतं यथेमं शरदो नयातीन्द्रो विश्वॅस्य दुरितस्यॅ पारम्॥
शतञ्जीव शरदो वर्धमानश्शतं हेमन्ताञ्छतमुॅ वसन्तान्।
शतमिन्द्राग्नी सॅविता बृहस्पतिश्शतायुॅषा हविषेमम्पुनॅर्दुः॥
आहार्षन्त्वाविंदन्त्वा पुनरागाः पुनर्नव। सर्वाङ्ग सर्वन्ते चक्षुस्सर्व
मायुॅश्च ते विदम्-इन्द्राग्नी ध्यायामि। इन्द्राग्नी आवाहयामि।
इन्द्राग्नयोः इदमासनम्॥
मूर्धानॅन्दिवो अॅरतिम्पृॅथिव्या वैश्वानरमृतायॅ जातमग्निम्। कविꣳ सम्राज
मतिॅथिञ्जनॅानामासन्ना पात्रॅञ्जनयन्त देवाः- अग्निं वैश्वानरं ध्यायामि।
अग्निं वैश्वानरं आवाहयामि। अग्नेः वैश्वानरस्य इदमासनम्॥
जातवॅेदा यदिं वा पावकोऽसिॅ। वैश्वानरो यदिं वा वैद्युतोऽसिॅ।
शं प्रजाभ्यो यजॅमानाय लोकम्।ऊर्जम्पुष्टिन्ददॅदभ्यावॅवृत्स्व- अग्निं
जातवेदसं ध्यायामि। अग्निं जातवेदसं आवाहयामि। अग्नेः
जातवेदसः इदमासनम्॥
आयुॅष्टे विश्वतौ दधदयमग्निर्वरेण्यः। पुनॅस्ते प्राण आयॅति परा यक्ष्मꣳ
सुवामि ते॥आयुर्दा अॅग्ने हविषौ जुषाणो घृतप्रॅतीको घृतयौॅनिरेधि।
घृतम्पीत्वा मधु चारुगव्यॅम्पितेवॅ पुत्रमभिरॅक्षतादिमम्-आयुर्देवतां
ध्यायामि। आयुर्देवतां आवाहयामि। आयुर्देवतायाः इदमासनम्॥
यजमानस्य कुलदेवतां इष्टदेवतां ग्रामदेवताञ्च तत्तन्मन्त्रेण आवाहयेत्॥
कल्पोक्तप्रकारेण प्राणप्रतिष्ठां कृत्वा पुरुषसूक्तविधानेन षोडशोपचारपूजां

कुर्यात्॥ लौकिकाग्निं प्रतिष्ठाप्य मुखान्तं कृत्वा- चरुं अवदानधर्मेणावदाय व्याहृतीरनूच्य गायत्र्या सावित्रहोमं कृत्वा स्विष्टकृतमवदाय अन्तःपरिधि सादयित्वा अष्टौ

अष्टाविंशतिः अष्टोत्तरशतमिति यथोचितं नवग्रहाणां तत्तद्ग्रहसमिधः अन्नं आज्यमिति जुहुयात्॥ अनन्तरं यथासम्भवं जन्मनक्षत्राष्टवाक्येन सकृत्सकृत् समिदन्नाज्यमिति जुहुयात्॥ तत्तन्नक्षत्र उपहोमांश्च आज्येन जुहुयात्-

कृत्तिकानक्षत्रस्य-

अग्निर्नः पातु कृत्तिकाः। नक्षँत्रन्देवर्मिन्द्रियम्। इदमाँसां विचक्षणम्। हविराङ्जुहोतन। यस्य भान्तिँ रश्मयो यस्यँ केतवँः। यस्येमा विश्वा भुवँनानि सर्वा। स कृत्तिकाभिरभि संवसानः। अग्निर्नौ देवस्सुँविते दँधातु स्वाहा-अग्नये कृत्तिकाभ्यै दन्न मम॥

अग्नये स्वाहा। अग्नय इदन्न मम॥ कृत्तिकाभ्यस्स्वाहा-कृत्तिकाभ्य इदन्न मम॥ अम्बायै स्वाहा- अम्बाया इदन्न मम॥ दुलायै स्वाहा- दुलाया इदन्न मम॥ नितत्नयै स्वाहा- नितत्नया इदन्न मम॥ अभ्रयँन्त्यै स्वाहा- अभ्रयन्त्या इदन्न मम॥ मेघयँन्त्यै स्वाहा- मेघयन्त्या इदन्न मम॥ वर्षयँन्त्यै स्वाहा- वर्षयन्त्या इदन्न मम॥ चुपुणीकाँयै स्वाहा- चुपुणीकाया इदन्न मम॥

ओं जूं सः त्र्यँम्बकं यजामहे सुगन्धिंपुँष्टिवर्धँनम्।--नक्षत्रे-- राशौ-- जातं-- शर्माणं मृत्योः पालय पालय। रोगान्मोचय मोचय। आयुष्मन्तं कुरु कुरु।उर्वारुकमिँवबन्धँनान्मृत्यो मुँक्षीय

मामृतात् सः जूं ओं स्वाहा- अमृतमृत्युञ्जयायेदन्न मम ॥

--नक्षत्रे--राशौ-- जातस्य--शर्मणः मृत्युर्नश्यत्वायुर्वर्धतां भूस्स्वाहा-अग्नय इदन्न मम ॥ मृत्युर्नश्यत्वायुर्वर्धतां भुवस्स्वाहा-वायव इदन्न मम ॥ मृत्युर्नश्यत्वायुर्वर्धताꣳसुवस्स्वाहा-सूर्यायेदन्न मम ॥ मृत्युर्नश्यत्वायुर्वर्धतां भूर्भुवस्सुवस्स्वाहा- प्रजापतय इदन्न मम ॥

एवं एकैकस्याऽपि नक्षत्राऽष्टवाक्यैर्हुत्वा उपहोमाञ्जुहोति-

रोहिणीनक्षत्रस्य- प्रजापॅतये स्वाहा- प्रजापतय इदन्न मम ॥ रोहिण्यै स्वाहा- रोहिण्या इदन्न मम ॥ रोचॅमानायै स्वाहा- रोचमानाया इदन्न मम ॥ प्रजाभ्यस्वाहा- प्रजाभ्य इदन्न मम ॥

मृगशीर्षनक्षत्रस्य- सोमॉय स्वाहा- सोमायेदन्न मम ॥ मृगशीर्षाय स्वाहा- मृगशीर्षायेदन्न मम ॥ इन्वकाभ्यस्स्स्वाहा- इन्वकाभ्य इदन्न मम ॥ ओषॅधीभ्यस्स्वाहा- ओषधीभ्य इदन्न मम ॥ राज्याय स्वाहा- राज्यायेदन्न मम ॥ अभिजॅित्यै स्वाहा- अभिजित्या इदन्न मम ॥

आर्द्रानक्षत्रस्य- रुद्रायस्वाहा- रुद्रायेदन्न मम ॥आर्द्रायै स्वाहा- आर्द्राया इदन्न मम ॥पिन्वॅमानायै स्वाहा- पिन्वमानाया इदन्न मम ॥ पशुभ्यस्स्वाहा- पशुभ्य इदन्न मम ॥

पुनवसूनक्षत्रस्य- अदिॅत्यै स्वाहा- अदित्या इदन्न मम ॥ पुनॅर्वसुभ्याꣳ स्वाहा- पुनर्वसुभ्यामिदन्न मम ॥ आभूॅत्यै स्वाहा- आभूत्या इदन्न मम ॥ प्रजात्यै स्वाहा- प्रजात्य इदन्न मम ॥

पुष्यनक्षत्रस्य- बृहस्पतॅये स्वाहा- बृहस्पतय इदन्न मम ॥ तिष्यॉय स्वाहा-तिष्यायेदन्न मम ॥ ब्रह्मवर्च्चसाय स्वाहा-ब्रह्मवर्च्चसायेदन्न मम ॥

आश्रेषानक्षत्रस्य- सर्पेभ्यस्स्वाहा-सर्पेभ्य इदन्न मम ॥ आश्रेषाभ्य स्स्वाहा- आश्रेषाभ्य इदन्न मम ॥ दन्दशूकेभ्यस्स्वाहा- दन्दशूकेभ्य इदन्न मम ॥

मघानक्षत्रस्य- पितृभ्यस्स्वाहा- पितृभ्य इदन्न मम ॥ मघाभ्य स्स्वाहा-मघाभ्य इदन्न मम ॥ अनघाभ्यस्स्वाहा- अनघाभ्य इदन्न मम ॥अगदाभ्यस्स्वाहा- अगदाभ्य इदन्न मम ॥ अरुन्धतीभ्य स्स्वाहा- अरुन्धतीभ्य इदन्न मम ॥

पूर्वफल्गुनीनक्षत्रस्य- अर्यम्णे स्वाहा- अर्यम्ण इदन्न मम ॥ फल्गॅुनीभ्याꣳस्वाहा- फल्गुनीभ्यामिदन्न मम ॥

पशुभ्यस्स्वाहा- पशुभ्य इदन्न मम ॥

उत्तरफल्गुनीनक्षत्रस्य-भगॉय स्वाहा- भगायेदन्न मम ॥फल्गॅुनीभ्याꣳ स्वाहा- फल्गुनीभ्यामिदन्न मम ॥श्रैष्ठयॉय श्रैष्ठयायेदन्न मम ॥

हस्तनक्षत्रस्य- सवित्रे स्वाहा-सवित्र इदन्न मम ॥ हस्तॉय स्वाहा- हस्तायेदन्न मम ॥ ददते स्वाहा-ददत इदन्न मम ॥ पृणते स्वाहा- पृणत इदन्न मम ॥प्रयच्छॅते स्वाहा- प्रयच्छत इदन्न मम ॥ प्रतिगृभ्णते स्वाहा- प्रतिगृभ्णत इदन्न मम ॥

चित्रानक्षत्रस्य- त्वष्ट्रेस्वाहा- त्वष्ट्रइदन्न मम ॥चित्रायै स्वाहा-चित्राया इदन्न मम ॥चैत्रॉय स्वाहा-चैत्रायेदन्न मम ॥ प्रजायै स्वाहा- प्रजाया इदन्न मम ॥

स्वातीनक्षत्रस्य- वायवे स्वाहा-वायव इदन्न मम ॥ निष्ट्यायै स्वाहा- निष्ट्याया इदन्न मम ॥कामचारॉय स्वाहा- कामचारायेदन्न मम ॥ अभिजित्यै स्वाहा-अभिजित्या इदन्न मम ॥

विशाखानक्षत्रस्य- इन्द्राग्निभ्याꣳस्वाहा- इन्द्राग्निभ्यामिदन्न मम ॥ विशॉखाभ्याꣳस्वाहा-विशाखाभ्यामिदन्न मम ॥श्रैष्ठ्यॉयस्वाहा- श्रैष्ठायेदन्न मम ॥अभिजित्यै स्वाहा-अभिजित्याइदन्नमम ॥

अनूराधानक्षत्रस्य- मित्राय स्वाहा-मित्रायेदन्न मम ॥अनूराधेभ्यस्स्वाहा- अनूराधेभ्य इदन्न मम ॥मित्रधेयॉयस्वाहा- मित्रधेयायेदन्न मम ॥ अभिजित्यै स्वाहा-अभिजित्या इदन्न मम ॥

ज्येष्ठानक्षत्रस्य-इन्द्रॉयस्वाहा-इन्द्रायेदन्न मम ॥ज्येष्ठायै स्वाहा- ज्येष्ठाया इदन्न मम ॥ज्यैष्ठ्यॉयस्वाहा-ज्यैष्ठ्यायेदन्न मम ॥ अभिजित्यै स्वाहा- अभिजित्या इदन्न मम ॥

मूलनक्षत्रस्य- प्रजापतयेस्वाहा- प्रजापतय इदन्न मम ॥मूलॉय स्वाहा- मूलायेदन्न मम ॥प्रजायैस्वाहा- प्रजाया इदन्न मम ॥

पूर्वाषाढानक्षत्रस्य- अद्भ्यस्वाहा-अद्भ्य इदन्न मम ॥अषाढाभ्यस्स्वाहा-

अषाढाभ्य इदन्न मम ॥समुद्राय स्वाहा- समुद्रायेदन्न मम ॥ कामॉय स्वाहा- कामायेदन्न मम ॥ अभिजित्यै स्वाहा-अभिजित्या इदन्न मम ॥ उत्तराषाढानक्षत्रस्य-विश्वेभ्यो देवेभ्यस्स्वाहा- विश्वेभ्यो देवेभ्य इदन्न मम ॥अषाढाभ्यस्स्वाहा- अषाढाभ्य इदन्न मम ॥अनपजय्यायस्वाहा- अनपजय्यायेदन्न मम ॥जित्यैस्वाहा- जित्या इदन्न मम ॥

श्रवणनक्षत्रस्य- विष्णॅवे स्वाहा-विष्णवे इदन्न मम ॥ श्रोणायै स्वाहा- श्रोणाया इदन्न मम ॥ श्लोकॉय स्वाहा- श्लोकायेदन्न मम ॥श्रुताय स्वाहा- श्रुतायेदन्न मम ॥

श्रविष्ठानक्षत्रस्य- वसुॅभ्यस्स्वाहा-वसुभ्यइदन्न मम ॥ श्रविॅष्ठाभ्य स्स्वाहा-श्रविष्ठाभ्यइदन्न मम ॥ अग्रॉय स्वाहा-अग्रायेदन्न मम ॥ परीत्यैस्वाहा- परीत्या इदन्न मम ॥

शतभिषङ्नक्षत्रस्य- वरुॅणाय स्वाहा-वरुणायेदन्न मम ॥ शतभिॅषजे स्वाहा- शतभिषजे इदन्न मम ॥भेषजेभ्यस्स्वाहा-भेषजेभ्य इदन्न मम ॥

पूर्वप्रोष्ठपदनक्षत्रस्य- अजायैकॅपदे स्वाहा-अजायैकपद इदन्न मम ॥ प्रोष्ठपदेभ्यस्स्वाहा-प्रोष्ठपदेभ्य इदन्न मम ॥ तेजॅसे स्वाहा-तेजस इदन्न मम ॥ ब्रह्मवर्चसाय स्वाहा- ब्रह्मवर्चसायेदन्न मम ॥

उत्तरप्रोष्ठपदनक्षत्रस्य- अहॅये बुध्नियॉयस्वाहा-अहये बुध्नियायदन्न मम ॥ प्रोष्ठपदेभ्यस्स्वाहा- प्रोष्ठपदेभ्यइदन्न मम ॥प्रतिष्ठायैस्वाहा- प्रतिष्ठाया इदन्न मम ॥

रेवती नक्षत्रस्य- पूष्णे स्वाहा-पूष्ण इदन्न मम ॥ रेवत्यैस्वाहा-
रेवत्या इदन्न मम ॥ पशुभ्यस्स्वाहा- पशुभ्य इदन्न मम ॥
अश्विनीनक्षत्रस्य- अश्विभ्याꣳस्वाहा- अश्विभ्यामिदन्न मम ॥अश्व
युग्भ्याꣳस्वाहा- अश्वयुग्भ्यामिदन्न मम ॥श्रोत्रॉयस्वाहा-श्रोत्रायेदन्न
मम ॥ श्रुत्यैस्वाहॉ-श्रुत्या इदन्न मम ॥
अपभरणीनक्षत्रस्य- यमायस्वाहा-यमायेदन्न मम ॥ अपभरॅणीभ्य
स्स्वाहा-अपभरणीभ्य इदन्न मम ॥ राज्यायस्वाहा-राज्यायेदन्न
मम ॥ अभिजॅित्यै स्वाहा-अभिजित्या इदन्न मम ॥
अनन्तरं ब्रह्मादि आयुर्देवता पर्यन्तदेवतानां सकृत्सकृत्
समिदन्नाज्या ऽऽहुतीर्जुहुयात् ॥ तदनन्तरं आयुष्यसूक्तेन एकवारं
आज्येन हुत्वा हविषः उत्तरार्धाद्विरवदाय अर्यमणं बृहस्पतिमिति
द्वाभ्यां स्विष्टकृतञ्जुहोति-
अर्यमणं बृहस्पतिमिन्द्रन्दानॉय चोदय । वाचं विष्णुꣳ सरॅस्वतीꣳ
सवितारॅञ्च वाजिनम् । सोमꣳराजॉनं वरुॅणमग्निमन्वारॅभामहे ।
आदित्यान् विष्णुꣳ सूर्यं ब्रह्माणॅञ्च बृहस्पतिꣳस्वाहा- अग्नये स्विष्टकृत
इदन्न मम ॥अनूयाजसमिधमग्नौ प्रहरति इत्यादि जयादि उत्तरतन्त्रं समाप्य
उपस्थानं कुर्यात् ॥ पुनः पूजां कृत्वा आवाहितदेवताः उद्वास्य-
हिरण्यगर्भं गर्भस्थं हेमबीजंविभावसोः ।
अनन्तपुण्यफलदं अतश्शान्तिंप्रयच्छ मे ॥
--नक्षत्रे--राशौ जातस्य--शर्मणः मम सहकुटुम्बस्य सर्वेषां
आदित्यादि नवग्रहकृत सकलविध बाधकनिवृत्यर्थम्

अनुष्ठितनवग्रहमखकर्मणः सम्पूर्णसाङ्गफलसिध्यर्थं नवग्रहमखकर्तृभ्यः ब्राह्मणेभ्यः तत्फलस्वीकरणार्थं उक्तदक्षिणाप्रत्याम्नायं यत्किञ्चित् हिरण्यं आदित्यादि नवग्रहप्रीतिकर धान्यवस्त्रादीनि च नानागोत्रेभ्यः ब्राह्मणेभ्यस्तेभ्यस्तेभ्यस्सम्प्रददे नमः न मम ॥ओंतत्सत्॥

तीर्थप्रोक्षणम्-

देवस्यॅत्वा सवितुः प्रॅसवे ।अश्वनोर्बाहुभ्याम् ।पूष्णो हस्ताभ्याम् । अश्विनो भैषॅज्येन ।तेजॅसेब्रह्मवर्चसायाभिषिञ्चामि ॥

अक्षीभ्यान्ते नासिॅकाभ्याङ्कर्णाभ्याञ्छुबुॅकादधिं । यक्ष्मꣳ शीर्ष्णयॅम्म स्तिष्काज्जिह्वाया विवॅृहामि ते ॥ ग्रीवाभ्यॅस्त उष्णिहाभ्यः कीकॅसाभ्योऽनूक्यात् । यक्ष्मॅन्दोषण्यॅमꣳसाभ्यां बाहुभ्यां विवॅृहामि ते ॥ आन्त्रेभ्यॅस्ते गुदाभ्यो वनिष्ठोर् हृदॅयादधिं । यक्ष्मम्मतॅस्नाभ्यां यक्नः प्लाशिभ्यो विवॅृहामि ते ॥ ऊरुभ्यान्तेऽष्ठीवद्भ्याञ्जङ्घाभ्या म्प्रपॅदाभ्याम् ।

यक्ष्मꣳश्रोणीभ्याम्भाससाध्वꣳससो विवॅृहामि ते ॥मेहॅनाद्वलङ्कॅरणा ल्लोमॅभ्यस्ते नखेभ्यॅः । यक्ष्मꣳसर्वॅस्मादात्मनस्तमिमं विवॅृहामि ते ॥ अङ्गॅादङ्गाल्लोम्नो लोम्नो जातम्पर्वॅणि पर्वॅणि । यक्ष्मꣳसर्वॅस्मादात्मन स्तमिमं विवॅृहामि ते ॥ द्रुपदादिवेन्मुॅमुचा नः ।स्विन्नस्नात्वी मलॅादिव । पूतम्पवित्रेॅणेवाज्यम् । आपॅश्शुन्धन्तु मैनॅसः ॥भूर्भुवस्सुवो भूर्भुवस्सुवो भूर्भुवस्सुवॅः ॥ तीर्थप्राशनम्- अप्सु मे सोमॅो अब्रवीत् ।अन्तर्विश्वॅानिभेषजा । अग्निञ्चॅ विश्वशॅम्भुवम् । आपॅश्च विश्वभॅषजीः ॥ अक्षताशीर्वचनम् ॥ हारती ॥

आयुष्यहोमप्रयोगः

आचम्य - पवित्रं धृत्वा-इष्टदेवताभ्यो नमः । कुलदेवताभ्यो नमः । सर्वेभ्यो ब्राह्मणेभ्यो नमः । सुमुखश्च इत्यादि गणपतिपूजनं कृत्वा दर्भेष्वासीनः दर्भान्धारयमाणः पत्न्या सह-

शुक्लाम्बरधरं विष्णुं शशिवर्णम् चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

ओंभूः - भूर्भुवस्सुवरों ममोपात्त समस्तदुरित क्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं शुभेशोभने --शुभतिथौ --गोत्रोद्भवस्य-- नक्षत्रे --राशौ जातस्य --शर्मणः मम वार्षीकजन्मनक्षत्रे अब्दपूर्तौ --वारादियोगेन यो दोषस्समजनि तद्दोष परिहारार्थं ग्रहचारपीडा परिहारार्थ समस्तभूतोपसर्गानिवारणार्थं वेदोक्त आयुषः अभिवृध्यर्थं अपमृत्युदोषपरिहारार्थं सर्वारिष्टशान्त्यर्थं सर्वाभीष्टसिध्यर्थं एभिर्ब्राह्मणैस्सह अन्योन्य साहाय्येन बोधायनोक्तप्रकारेण आचार्यमुखेन ऋत्विङ्मुखेन च आयुष्यहोम कर्मकरिष्ये ॥ अस्य कर्मणः आरम्भमुहूर्तलग्नापेक्षया आदित्यादीनां नवानां ग्रहाणां आनुकूल्यसिध्यर्थम् यत्किञ्चित् हिरण्यदानञ्च करिष्ये ॥ महागणपतिं यथास्थानं कृत्वा -ग्रहप्रीतिकर हिरण्यदानं कृत्वा- आचार्यवरणं ऋत्विग्वरणञ्च कुर्यात् ॥ आचार्यः आचम्य पवित्रं धृत्वा- यजमानसङ्कल्पानुसारं अन्योन्यसाहाय्येन आयुष्यहोम कर्मकरिष्ये ॥ लौकिकाग्निं प्रतिष्ठाप्य प्रणीतान्तं कृत्वा -नवग्रहमखवत् ब्रह्मॅ जज्ञानं इत्यादिभिः कलशं प्रतिष्ठाप्य वरुणाऽऽवाहनान्तं कृत्वा- प्रतिमायां आयर्देवतां आवाहयेत्-

आयुँष्टे विश्वतौ दधदयमग्निर्वरेण्यः । पुनँस्ते प्राण आयँति परा यक्ष्मꣳ सुवामि ते ॥आयुर्दा अँग्ने हविषौ जुषाणो घृतप्रँतीको घृतयौनिरेधि । घृतम्पीत्वा मधु चारुगव्यँम्पितेवँ पुत्रमभिरँक्षतादिमम्-अस्यां

प्रतिमायां आयुर्देवतां अग्निमायुष्मन्तं ध्यायामि। आयुर्देवतां अग्निमायुष्मन्तं आवाहयामि। आयुर्देवतायाः अग्नेः आयुष्मतः इदमासनम्॥ यजमानस्य नक्षत्रदेवतां कुलदेवतां इष्टदेवतां ग्रामदेवताञ्च तत्तन्मन्त्रेण आवाहयेत्॥ कल्पोक्तप्रकारेण प्राणप्रतिष्ठां कृत्वा पुरुषसूक्तविधानेन षोडशोपचारपूजां कुर्यात्॥ चरुद्वयनिर्वापः- अग्नय आयुष्मते जुष्टन्निर्वपामि।त्रिः॥ प्राणाय जुष्टन्निर्वपामि। त्रिः॥अग्नय आयुष्मते वो जुष्टं प्रोक्षामि॥प्राणाय वो जुष्टं प्रोक्षामि॥ब्रह्मवरणादि मुखान्तं कृत्वा- चरोः अवदानधर्मेणावदाय

आयुँष्टे विश्वतौ दधदयमग्निर्वरेण्यः। पुनँस्ते प्राण आयँति परा यक्ष्मꣳ सुवामि तोश्म् आयुर्दा अँग्ने हविषो जुषाणो घृतप्रँतीको घृतयौनिरेधि। घृतम्पीत्वा मधु चारुगव्यँम्पितेवँ पुत्रमभिरँक्षतादिमꣳस्वाहा- अग्नय आयुष्मत इदन्न मम॥ स्विष्टकृतमवदाय अन्तःपरिधि सादयित्वा अथाज्याहुतीरुपजुहोति। प्राणचरुं विभज्य सम्पाताभिहुतङ्करोति। यो ब्रह्मा इत्यष्टभिर्मन्त्रैः षड्विंशतिशतकृत्वः तदाहुतीनां अष्टसहस्रं सम्पद्यते-

यो ब्रह्मा ब्रह्मण उज्जहार प्राणैश्शिरः कृत्तिवासाः पिनाकी।
ईशानो देवस्सन आयुर्ददाति तस्मै जुहोमि हविषा घृतेन स्वाहा॥
ईशानायेदन्न मम॥
विभ्राजमानस्सरिरस्य मध्याद्रोचमानो घर्मरुचिर्य आगात्।
स मृत्युपाशादपनुद्य घोरादिहायुषेणो घृतमत्तु देवस्स्वाहा॥
घमरुचय इदन्न मम॥
ब्रह्मज्योतिर्ब्रह्मपत्नीषु गर्भं यमादधात्पुरुरूपञ्जयन्तम्।
सुवर्णरम्भग्रहमर्कमर्च्यन्तमायुषे वर्धयामो घृतेन स्वाहा॥
ब्रह्मज्योतिष इदन्न मम॥
श्रियं लक्ष्मीमौबलामम्बिकाङ्गां लक्ष्मीञ्चयामिन्द्रसेनेत्युदाहुः।
तां विद्यां ब्रह्मयोनिꣳ सरूपामिहायुषे तर्पयामो घृतेनस्वाहा॥

ब्रह्मयोन्या इदन्न मम ॥
दाक्षायण्यस्सर्वयोन्यस्सुयोन्यस्सहस्रशो विश्वरूपा विरूपाः ।
ससूनवस्सपतयस्सयूथ्य आयुषेणो घृतमिदक्षुषन्ताम् स्वाहा ॥
दाक्षायणीभ्य इदन्न मम ॥
दिव्या गणा बहुरूपाः पुराणा आयुश्छिदो न प्रमथ्नन्तु वीरान् ।
तेभ्यो जुहोमि बहुधा घृतेन मानः प्रजाꣳरीरिषो मोत वीरान्स्वाहा ॥
दिव्येभ्यो गणेभ्य इदन्न मम ॥
एकः पुरस्ताद्य इदम्बभूव यतो बभूव भुवनस्यगोपाः ।
यमप्येति भुवनꣳसाम्पराये सनो हविर्घृतमिहायुषेत्तु देवस्वाहा ॥
देवायेदन्न मम ॥
वसून् रुद्रानादित्यान्मरुतोत साध्यानृभून्यक्षान्गन्धर्वाꣳश्च
पितृꣳश्च विश्वान् ।भृगून्त्सर्पाꣳश्चाङ्गिरसोथ सर्वान् घृतꣳहुत्वा
स्वायुष्या महयाम शश्वत्स्वाहा ॥वस्वादिभ्य इदन्न मम ॥
विष्णोत्वन्नो अन्तमश्शर्मयच्छसहन्त्य । प्रते धारॉ मधुश्चुत
उत्सॅन्दुह्रतेअक्षितꣳस्वाहा- विष्णव इदन्न मम ॥
अथराष्ट्रभतो जुहोति-
ऋताषाड्तधॉमाग्निर्गॅन्धर्वस्स इदं ब्रह्मॅ क्षत्रं पॉतु तस्मै स्वाहा-
ऋतासाहे ऋतधाम्ने अग्नये गन्धर्वायेदन्नमम ॥
तस्यौषॅधयोऽप्सरस ऊर्जो नाम ता इदं ब्रह्मॅ क्षत्रं पान्तु ताभ्य
स्स्वाहा-ओषधिभ्यः अप्सरोभ्य ऊर्ग्भ्य इदन्न मम ॥
सꣳहितो विश्वसॉमा सूर्यॊ गन्धर्वस्स इदं ब्रह्मॅ क्षत्रं पॉतु तस्मै स्वाहा-

सꣳहिताय विश्वसान्नसूर्याय गन्धर्वायेदन्न मम ॥

तस्य मरीचयोऽप्सरस॑ आयुवो नाम ता इदं ब्रह्म॑ क्षत्रं पान्तु ताभ्यस्स्वाहा-

मरीचिभ्यःअप्सरोभ्यःआयुभ्य इदन्न मम ॥

सुषुम्नस्सूर्यर॑श्मिश्चन्द्रमा॑ गन्धर्वस्स इदं ब्रह्म॑ क्षत्रं पा॑तु तस्मै स्वाहा-

सुषुम्नाय सूर्यरश्मये चन्द्रमसे गन्धर्वायेदन्न मम ॥

तस्य नक्ष॑त्राण्यप्सरसो॑ बेकुर॑यो नाम ता इदं ब्रह्म॑ क्षत्रं पान्तु ताभ्य

स्स्वाहा-नक्षत्रेभ्योऽप्सरोभ्यो बेकुरुभ्य इदन्न मम ॥

भुज्युस्सु॑पर्णो॑ यज्ञो ग॑न्धर्वस्स इदं ब्रह्म॑ क्षत्रं पा॑तु तस्मै स्वाहा-

भुज्यवे सुपर्णायय॒ज्ञाय गन्धर्वायेदन्न मम ॥

तस्य दक्षि॑णा अपसरस॑स्तवा नाम ता इदं ब्रह्म॑ क्षत्रं पान्तु ताभ्य

स्स्वाहा-दक्षिणाभ्योऽप्सरोभ्यस्तवाभ्य इदन्न मम ॥

प्रजाप॑तिर्विश्वक॑र्मामनो॑गन्धर्वस्स इदं ब्रह्म॑ क्षत्रं पा॑तु तस्मै स्वाहा-

प्रजापतये विश्वकर्मणे मनसे गन्धर्वायेदन्नमम ॥

तस्य॑र्क्सामान्य॑प्सरसो वह्न॑यो नाम ता इदं ब्रह्म॑ क्षत्रं पान्तु ताभ्यस्स्वाहा-

ऋक्सामेभ्यो ऽप्सरोभ्यो वह्निभ्य इदन्न मम ॥

